नं. ७८
वाक्यपदीय टीका
पत्र-६२—

१ श्रीगणेशाय नमः ॥ ॥ अविघ्नमस्तु ॥ एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशतो निर्णीतं ॥ तस्य च साधारण्येन वाचकत्वं व्यवस्थापितं ॥ इ-
दानीं मतभेदेन केषांचिन्मतेन वाचकं अन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्यानवस्थित स्वस्वरूपप्रतिपादनाय द्वितीयकाण्डमारंभः ॥ तत्राचा-
र्यमतभेदाश्रयेण तावद्वाक्योद्देशार्थमाह ॥ आख्यातशब्दः संघातो जातिः संघातवर्तिनी ॥ एकोनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ पदमाद्यं
पृथक्सर्वपदं साकांक्षमित्यपि ॥ वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनां ॥ एते ष्टौ वाक्यविकल्पाः आचार्याणां ॥ तत्राखंडपक्षे जातिः सं-
घातवर्तिन्येकोनवयवः शब्दो बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि खंडपक्षे तु आख्यातशब्दः क्रमः संघातः पदमाद्यं पृथक्सर्वपदं साकां-
क्षमिति पंच लक्षणानि ॥ अत्रापि संघातः क्रम इत्यभिहितान्वयपक्षे लक्षणद्वयं ॥ आख्यातशब्दः पदमाद्यं पृथक्सर्वपदं साकांक्षमित्य-
न्विताभिधानपक्षे लक्षणत्रयमिति विभागः ॥ इह च पदप्रकृतिः संहितेति प्रातिशाख्ये ॥ तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहिते-
त्यखंडपक्षः ॥ पदानि प्रकृतिर्यस्याः सेति खंडपक्षः प्रादुर्भवति ॥ तत्राख्यातशब्दो वाक्यमिति पाठात् शब्दार्थनिर्णय इति प्रकारेण दर्शयि-
ष्यति ॥ यथा ॥ आख्यातशब्दो नियतं साधनं यत्र गम्यते ॥ तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते इति ॥ केवलेन पदेनार्थं इत्यादिना श्लो-
काष्टकेन संघातो वाक्यमिति दर्शयिष्यति ॥ प्रत्येकमेव सद्वीर्यं इत्यादिना देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः इत्यंतेन ग्रंथेनानयो राम० १

अथ क्रमः क्रमवानित्यादिना व्याहृत्य भेदोपेनार्थ इत्यनेन वाक्यं एव स्फोटलक्षणः शब्दो वाक्यमिति दर्शितं ॥ उक्तं च ॥ येनोच्चरितेन सास्नालांगूल
खुरककुद्विषाणप्रथरूपं प्रतिपाद्यते स शब्दः ॥ तथा स्फोटः शब्दो ध्वनिः शब्दगुण इति ॥ स्फोटश्च द्विविधो बाह्य आभ्यन्तरश्चेति ॥ बाह्योपि जातिव्यक्तिभेदे
न द्विविधः ॥ तत्र जातिलक्षणस्य जातिः संघातवर्त्तिनीति ॥ व्यक्तिलक्षणस्यैकोनवयवः शब्द इति ॥ आभ्यन्तरस्य तु बुद्ध्यनुसंहृतिरित्यनेनोद्देशः ॥ तत्र जा
तिव्यक्तिलक्षणस्य बाह्यस्य पर्यायैक एवेत्यादिना प्रतन्यते ॥ क्रमवानित्यादिना ग्रन्थेन स्वरूपमुक्तं ॥ पदंतः शब्दतत्त्वमित्यादिना श्लोकचतुष्टये
न नियतं साधने साध्यमित्यनेन च श्लोकद्वयेन पदमाद्यं पृथक्सर्वपदं साकांक्षमिति लक्षणद्वयं व्याख्यास्यति ॥ अन्यदपि वार्त्तिककारीयं पारिभा
षिके शास्त्रे वाक्यलक्षणमस्ति ॥ आख्यातं साव्ययकारकविशेषणं वाक्यं ॥ एकतिङिति च ॥ जरन्मीमांसकोक्तं लौकिकमप्यस्ति ॥ अर्थैकत्वा
देकं वाक्यं साकांक्षं चेद्विभागे स्यादिति ॥ अनयोः संघातपक्षेन्तर्भावः ॥ एतेपि प्रथममेव निघातादिव्यवस्थार्थमित्यादिना विचारयिष्यते ॥ इ
त्यमष्टावेव वाक्यविकल्पा मतभेदेन संपद्यन्त इति बोद्धव्यं ॥ यत्तु नानेन हत्तावुक्तं ॥ उदाहरणमात्रमेतत् ॥ अन्यान्यपि वाक्यलक्षणानि निदर्श
यिष्यतीति ॥ तद्वार्त्तिककारीयवाक्यलक्षणादेरन्तर्भावमनपेक्ष्येति मन्तव्यं ॥ उद्दिष्टानां च वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव द
र्शितक्रमेण स्वरूपमुन्मीलयिष्यतीति नार्थ इह तत्प्रदर्शनेन ॥ वाक्यलक्षणप्रसंगेन च तथा वाक्यार्थस्य संबंधस्य च मतभेदं दर्शयिष्यति ॥

२

तत्राखंडपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः ॥ यथाह दर्शयिष्यति । विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते । वाक्यार्थ इति तामाहुरिति ॥ अवशिष्टे
षु पंचसु लक्षणेषु मध्यादाख्यातशब्दो वाक्यमित्यस्मिन्पक्षे क्रिया वाक्यार्थः । यथा वक्ष्यति । क्रिया क्रियांतराद्भिन्नेत्यादि ॥ यथा चाप्रतिभायत्स
भूतार्थायामनुष्ठानमाश्रिते ॥ फलं प्रसूयते यतः सा क्रिया वाक्यगोचर इति । संघातपक्षे क्रमपक्षे च संसर्गो वाक्यार्थः । स च । संबंधे सति यत्त्वन्यदा
धिक्यमुपजायते । वाक्यार्थमिति संप्राहुरनेकपदसंश्रयमित्यादिना दर्शयिष्यति । तथा संघातपक्ष एव सर्वभेदानुगुणपमित्यादिना प्रकारांतरे
णाभिहितान्वयपक्षे प्रतिपाद्यमानो कार्यानुमेयः संबंधो रूपं तस्य न विद्यते । इत्यनेन श्लोकेन विशेषविश्रांतः पदानामेवार्थो वाक्यार्थ इति
लक्ष्यते । पदमाद्यं पृथक्सर्वपदं साकांक्षमित्यस्मिन्पक्षद्वये संसृष्ट एव प्रथमतरं प्रक्रम्यते वाक्यार्थः । यथा निरूपयिष्यति । तेषां तु कृत्स्नो
वाक्यार्थः प्रतिभेदं समाप्यते । तथा पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः । संसर्ग एव प्रक्रांतस्तथाद्येष्वर्थवत्स्थितिः । अभिधेयः पदस्यार्थो
वाक्यस्यार्थः प्रयोजनं ॥ इत्यनेन प्रयोजनं वाक्यार्थत्वेन प्रदर्शितं । तत्केषांचिन्मते सर्वलक्षणसाधारणमिति न प्रयोजनं वाक्यार्थो वाक्य
लक्षणेषु पृथग्विभज्यते । तदेवं प्रतिभा संसर्गः । संसर्गवशान्निराकांक्षो विशेषावस्थितः पदार्थ एव संसृष्टो वाक्यार्थः क्रिया प्रयोजनं चेति
षड्वाक्यार्था इह प्रदर्शिताः । संसर्गः संसर्गवशाद्विशेषावस्थितः पदार्थश्च वाक्यार्थमभिहितान्वयः । संसृष्टे क्रियायां वान्विताभिधानः । प्रति राम०
२

भामांत्वेकरसैवप्रतिपत्तिरितिनतत्र काचिदभिहितान्वयान्विताभिधानचर्च्चा। प्रयोजने त्वभिहितान्वय एव। विधिनियोगभावनासंसर्गात्मकवाक्या
र्थनिरूपिताः। यस्माद्भावनाक्रिययोः पर्यायतामायशो लक्ष्यते। केवलं महत्तरार्थप्रसयार्थतायामत्र वैयाकरणमीमांसकयोर्विवादः। किंचाभाव
नासकर्मिकैवाकर्मिकापि क्रियेति प्रसारिभेदे साध्यत्वाविशेषादभेद एवानयोः। यथा धात्वर्थभूता क्रिया साध्यरूपैव तथाभावनापीति कथमवांतर
भेदाद्भेदोनयोर्भवेत्। विधिनियोगो तु लिङ्गाद्युक्तसांतेष्वेव वाक्येष्वर्थाविति सर्वविषयत्वादनादृतावेहेति न तन्मद्दर्शने कृतं। तत्तदनादिवाक्यार्थविक
ल्पाहितवासनाप्रबोधजन्माक्रमवद्भिरिवाक्रमैर्व्वहीरूपतयाध्यस्तैः पदार्थैश्चित्रीकृतस्वविकल्पविशेषोल्लिख्यमान आकारो बहीरूपतया
ध्यस्तो निर्विभाग एव शाब्दो वाक्यार्थ इति प्रायशः प्रतिभासोदार एवासौ मंतव्यः। वाक्यमपि तत्तदनादिवाक्यविकल्पाहितवासनाप्रबोध
जन्मक्रमवद्भिरिवाक्रमैः पदैश्चित्रीकृतस्वविकल्पोल्लिख्यमान आकारविशेष एव बहीरूपतयाध्यस्तइ
ति प्रायशोत्र ध्यनुसंहितास्वसमोदारमेवेति नतन्मतानुसारेण वाक्यवाक्यार्थयोः स्वरूपसंग्रहो वेदितव्यः। नैयायिकादीनां तु पूर्वपूर्ववर्णस्मृ
तिसचिवोऽन्त्यो वर्णो न शब्दः स्वस्यानुभवविषयीक्रियमाणः पदं यथा तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव पदं न शब्दः स्वस्यानुभवविष
यीक्रियमाणं वाक्यमिति प्रायशः संसर्गपक्ष एवांतर्भवति। तथा पूर्वपूर्वपदार्थस्मरणसचिवेनान्त्येन पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इ

२ तिआद्यपक्षः संसर्गपक्ष एवास्तां न भेद इति न न्यूनसंग्रहेण व्यासिद्धेव कृत्स्ना। अथ यात्रानवयवए कस्मिन्स्फोटात्मके वाक्ये प्रतिभालक्षणे च वाक्या
3 र्थे वाक्यवाक्यार्थयोर् ध्यासरूपः संबंधः पदं स्यात्। वाक्यत्वं तस्य वाक्यार्थत्वं इत्यादि। अवशिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योग्यताख्य ए
व शब्दार्थयोः संबंधो मीमांसकदृष्ट्या। शाब्ददर्शनानुसारेण तु विज्ञानवादनयेन बौद्धे शब्दार्थे सर्वत्र कार्यकारणभाव एव। वाक्यार्थवादे तु तत्र
संकेतलक्षणो सौ बोद्धव्यः। नैयायिकाद्यनुसारेण च संकेतलक्षण एव। सा विशेषमत्र वाक्यवाक्यार्थसंबंधानां संक्षेपतः स्वरूपं बोद्धव्यं। संबंधेषु
मध्यादत्राध्यासमेव दर्शयिष्यति पदकांडे तु सर्वानभिधास्यति। तत्र वैयाकरणस्यावेडः ऐवैकोनवयवः शब्दः स्फोटलक्षणो वाक्यं प्रतिभैव वाक्या
र्थो ध्यासश्च संबंध इति पदवादिपक्षदूषणपरः परं टीकाकारो व्यवस्थापयतीत्यस्य कांडस्य संक्षेपः॥ अथ वार्त्तिककारमीमांसको क्रमो वा कालक्ष
णयोः किं समावेश उत भिन्नविषयतेति विचारार्थमाह॥ निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितं॥ साकांक्षावयवं तेन न सर्वं तुल्यलक्षणं॥३॥
इह पदविधिः सामर्थ्ये इति परिभाषितः। तत्र सत्यपि पदानां सामर्थ्ये निघातादयः क्वचिन्नेष्यंते॥ यथा॥ अयं दंडो हर अनेन ओदनं पच मम भ
विष्यति ओदनं पच तव भविष्यतीति। अत्रानेनेति सर्वनाम्ना दंडस्य परामर्शाद्धरतिना सह तस्य सामर्थ्यं तथा युष्मदर्थस्य ओदनेन संबंधात्तच्च स
र्थस्य तेन सह सामर्थ्यं॥ एवं च सति सामर्थ्ये तिङ्ङतिङः इति निघातः प्राप्नोति। तेमयावेकवचनस्य इति वा देशो। न चेष्यंते। वाक्याभेदात्सामर्थ्या
२

भावेपीष्यते। यथा नद्यास्तिष्ठति कूले शालीनां ते ऐंद्रं नंदास्वामी इति। अत्र नद्यास्तिष्ठतीत्यस्य च संबंधानुपपत्तेः सामर्थ्यं नास्तीत्युच्यते च निघातः॥ तथा शा-
लीनां पुष्पदस्त्यसामर्थ्याभावः॥ इष्यते चैतन्मयावेकवचनस्येति युष्मदादेश इत्यालोच्य वार्त्तिककृता निघातादिव्यवस्थार्थमारब्धं। समानवाक्ये निघा-
तयुष्मदस्मदादेशा वक्तव्या इति एवं चायं दंड इत्यत्र सत्यपि सामर्थ्ये नास्ति निघातस्समस्तं गौरव्यवधिमतो भिन्नवाक्यतया व्यवस्थानात्। अत्र ली-
सया हारेण स्वयं दंड इत्येकं वाक्यं। हरानेनेति च द्वितीयं वाक्यं। नद्यास्तिष्ठतीत्यादौ तु व्यवधिमतोः पदयोः सामर्थ्याभावेप्येकवाक्यत्वव्यवस्थि-
तौ अपवर्त्तन एव निघातादय इति नास्त्येषामव्यवस्था। समानवाक्ये निघातादयो वक्तव्या इत्युक्तौ तत्र वाक्ये विज्ञाते समानवाक्यत्वं ज्ञायत इति
प्रसंगात्तत्र वार्त्तिककारेण द्विविधवाक्यलक्षणमुक्तं। आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङिति चेति। एवं च मीमांसकोक्तेनास्य सर्वत्र
समावेशोस्ति न वेति विचार्यते। शास्त्रे वाक्यकारेण निघातादिव्यवस्थार्थमुद्धाकालक्षणं परिभाषितं तेन मीमांसकोक्तं वाक्यलक्षणं सकलं
न तुल्यलक्षणं। साकांक्षावयवमित्यनेन मीमांसकोक्तवाक्यलक्षणोक्तं चितं तत्र क्वचिद्देते समाविशतः। यथा नद्यास्तिष्ठति कूले। शालीनां ते
ऐंद्रं नंदास्वामी इति। अयं दंडो हरानेन ऐंद्रं नंप चनवभविष्यतीत्यादावसमावेशः। मीमांसकवाक्यलक्षणसमाश्रयणे नात्र मा भूदिति निघाता-
दय एकप्रयोजनत्वात्। न चेष्यते। तस्माद्वार्त्तिककारीयमेव वाक्यलक्षणं ज्यायः॥ ३॥ अथात्र प्रसंगान्मीमांसकवाक्यलक्षणमर्थद्वारेण प्रदर्शयि-

४ तुमाह॥ ॥साकांक्षावयवं भेदे परानाकांक्षशब्दकं॥ कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते॥४॥ भेदे विभागे विशेषजिज्ञासायां च स्यात्साकांक्षावयवं। अविभागे तु
परानाकांक्षाः शब्दाः पदानि यस्मिन् तत् परानाकांक्षशब्दकं। कर्मप्रधानं। क्रियापदप्रधानमित्यर्थः। तस्यैव प्रधानाभिधेयप्रयुक्तत्वादित्यभिप्रायः। गुणवद्वि
शेषणपदयुक्तं। एकार्थमेकप्रयोजनं॥४॥ इदानीं वार्त्तिककारीयस्य वाक्यलक्षणस्य व्याप्तिमाशंक्याह॥ ॥संबोधनपदं यच्च तत्क्रियाया विशेषकं॥ व्रजा
नि देवदत्तेति निघातोत्र तथा सति॥५॥ व्रजानि देवदत्तेत्यत्र देवदत्तेत्येतत्पदं नाव्ययं न च कारकं नापि तद्विशेषणमिति वाक्यलक्षणेनासंगृहीतत्वादा
ष्टमिकश्चामन्त्रितस्येति निघातो न प्राप्नोतीति चोद्यं। आख्यातं साव्ययकारकसविशेषणमिति सामान्येनाभिधानात् क्रियाविशेषणस्याप्याख्या
तस्य वाक्यत्वे तद्दोषः। तथाह्यत्र संबोध्यमानदेवदत्तविषया व्रजतिक्रिया। अत्र संबोध्यमानदेवदत्तविषयायाः संबोध्यमानयज्ञदत्तविषयाया वा पृथ
गेवेति विशिष्टैवात्र व्रजतिक्रिया। क्रियायाश्च विशेषणं कदाचित्सामानाधिकरण्येन भवति। यथा सुष्ठु करोति शोभनं करोतीति। अत्र करोत्यर्थस्य
सुष्ठुत्वादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठुत्वादीनां करोत्यादिक्रियया सामानाधिकरण्यं। एवं चासत्त्वभूतायाः क्रियाया विशेषणमिति स
त्त्वप्रधानत्वाल्लिंगसर्वनाम्ना नपुंसकेन योगः क्रियायाश्च निर्वर्त्यत्वात्कर्मत्वमिति न्यायसिद्धमेव कर्मत्वं नपुंसकता चेति क्रियाविशेषणानां कर्म
त्वं नपुंसकलिंगता चेति नारंभणीयं वचनं। वैयधिकरण्येनापि विशेषणं भवति। यथा व्रजानि देवदत्तेति। अत्र हि देवदत्त व्रजानीति देवदत्तस्य व्रजनं एम॰ ४

क्रियायाश्च सामानाधिकरण्यं नास्ति। केवलमामंत्र्य देवदत्त व्रज त्यस्यामिति देवदत्तामंत्रणं विशेषितं केवलाधाविलक्षणा व्रजनक्रियेत्याख्यातेस
विशेषणाभे वेतिवाकालक्षणसद्भावान्मवर्त्तेत एव निघातः। देवदत्त व्रजानीत्येवमुदाहरणं न प्रदर्शितं। आमंत्रितं पूर्वमविद्यमानवदिति न निघातः
स्यादिति॥ पुनरप्यव्याप्तिं वार्त्तिककारलक्षणस्याशंक्य परिहर्तुमाह॥ ॥यथानेकमपि क्त्वांतं तिङं तस्य विशेषकं। तथा तिङं तेन चाद्युक्तं तिङं तस्य
विशेषकं॥ इह पूर्वं त्वा ति पचति ततो व्रजति न तरन्न्यचन न तरन्नूसेनस्माद्युत्तरस्य व्रजतीत्यस्य निघातो न प्राप्नोति वाक्यभेदान्नदृष्यते च॥ अत्र ति
ङंताद्युत्तरस्य तु तिङंतस्यातिङ इति प्रतिषेधान्निघातनिवृत्तिः सिद्धेति नात्राव्याप्तिः। तस्माद्युत्तरस्य पचति शब्दस्य निघातः प्राप्नोतीति चोद्यमुद्भाव
नीयं॥ इष्ट एव निघातस्य प्राप्तिरेवात्रोद्भावनीया॥ अत्रोच्यते॥ नास्त्यत्र वाक्यभेदः॥ व्रजतीत्येतन्त्वाधानेनैकं क्रियापदमत्र स्थितं अन्यानि
क्रियोपनतानि तद्विशेषणान्येव यथा स्नानभोजनपानैः कृत्वैर्विशिष्यते व्रजति क्रिया तथात्र तिङंतैः स्नाति प्रभृतिभिः। अथवा नैव व्रजति क्रि
ये व विशेष्यत इत्येकैवात्र सविशेषणा व्रजति क्रिया केवलायास्तस्याः पृथगेवेत्येतन्न विशेषणमेकमेव वाक्यमिति वाक्यभेदाभावान्नास्ति
निघातासिद्धिदोषः। एकवाक्यत्वे च तिङन्ताद्युत्तरस्य तिङन्तस्यातिङ इति प्रतिषेधा ● न्निघाताभावः। यथा वक्ष्यति वद्धृष्टपि तिङंतेषु सा
कांक्षेष्वेकवाक्यता। तिङ्तिङो निघातस्य पर्युदासस्तथार्थवान् द्विः। एवं चातिङ्ग्रहणं समर्थयोजनेस्थिते वार्त्तिककारेण पठ्यमतिङ्ग्रह

५ णमनर्थकं समानवाक्याधिकारादिति। तत्राभिप्रायो वाच्यः। एवंवादिनस्तस्य वाक्यभेदोऽत्राभिमत इत्यभिप्रायः। आख्यातेनसाध्यप्रकारकविशेषणमित
त्रैकवचनस्य विवक्षितत्वादिति। तथा च टीकाकारः प्रदर्शयिष्यति। एकतिङस्य वाक्यत्वं तु शास्त्रे नियमलक्षणं। तस्मात्तिङ्ग्रहणेनार्थो वाक्यभेदान्न
विद्यत इति। तत्र कारस्य तत्तिङ्ग्रहणादेकमेवाखण्डं वाक्यमर्थैकत्वादाख्यातभेदेप्यभिमतमिति गम्यते। तदभिप्रायानुसारेणैव निरूपयिष्यति। अ
नेकाख्यातयोगेपि वाक्यं न्यायपथानुगैः। एकमेवेष्यते कैश्चिद्भिन्नरूपमिवस्थितमिति। टीकाकारस्त्वमुमेव पक्षं तत्र कारणाभिप्रायसमाश्रयेण
न युक्तियुक्तमन्यमानो वहीरूपत्वाभ्यां तेनाविर्निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षण एव वाक्यमिति क्रमेणाव्याजिहीर्षुश्चित्र
ज्ञानचित्ररूपदृष्टान्तप्रदर्शनं पूर्वमुपक्रमते। तत्र चित्रबुद्धिदृष्टान्तप्रदर्शनार्थमाह॥ यथैक एव सर्वार्थः प्रत्ययः प्रविभज्यते। दृश्यभेदानु
कारेण वाक्यार्थानुगमस्तथा॥ ७॥ चित्रज्ञानं सर्वाकारमेकमेवाप्रविभागत्वस्य दृश्यभेदसमाश्रयेण क्रियते। नीलपीताद्यनेकाकारमेव विज्ञा
नमुपजातमिति। वस्त्वस्थित्या तत्र ज्ञाने आकारभेदो नास्ति। तथा वाक्यवाक्यार्थयोः स्वरूपं बोद्धव्यं। वाक्यार्थानुगमस्तथैव तेन हि वाक्य
वाक्यार्थयोरखण्डत्वेऽपि अनेकरसमयपाण्डुरसचित्ररूपनरसिंहगवयचित्रज्ञानवत्समानमेवेत्युच्यते। यथा निर्विभागं स्फोटलक्षणं वाचकं तथा
वाक्यार्थोपि तथाविध एवेत्यनयोरेकयोगक्षेमत्वमुक्तं। एवमानन्तर्येण दृष्टान्तमुपदर्श्य बाह्यमप्युपदर्शयितुमाह॥ ॥ चित्रस्यैकस्वरूपस्य य एस्०
॥७॥
५

यथा भेदनिदर्शनैः। नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥८॥ चित्रं हि रूपमवयवविभक्तमनेकमेकमेवान्येवावयवगतैर्यथा नीलादिभिर्भेदेन
निदर्शनं प्रदर्शनं येषां तैः पृथग्रूपैरेव समाख्यानं क्रियते ॥ तथा सकृत्ते किमित्याह ॥ ॥ तथैवैकस्य वाक्यस्य निराकांक्षस्य सर्वतः। शब्दान्तरैः समाख्या
नं साकांक्षैरनुगम्यते ॥९॥ एकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं तथैव क्रियत इति ॥ न वा पदस्यार्थे प्रयो
गादिसम्मिन्दर्शने यथा खेऽन्मेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते तथा वाक्यमप्यसत्यमन्नामेवाबुधबोधनाय पदानां विभा
गो द्रष्टव्य इति प्रदर्शयितुमाह। यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः। अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ॥१०॥ पदे हि यथा प्रकृतिप्रत्ययवि
भागोऽसत्य एव बालव्युत्पादनाय क्रियते। तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यत इति बोद्धव्यं ॥ तत्र वाक्यादपोद्धृतानां
पदानां केवलमितरपदसारूप्यमात्रं दृश्यत इति प्रतिपादयितुमाह ॥ ॥ वर्णान्तरसरूपत्वं वर्णभागेषु दृश्यते ॥ पदान्तरसरूपाश्च पदभागा
अवस्थिताः ॥११॥ यथा सेध्यक्षेषु भागा वर्णान्तरसरूपा दृश्यन्ते परमार्थेन त्वव्यवच्छिन्नत्वान्निर्विभागा एव ॥ एवं वाक्ये पदान्तरसरूपाः प
दरूपा भागाः पदभागाः। पदे वा निरंशे ये भागाः प्रकृतिप्रत्ययरूपास्ते व्यवस्थिता इति ॥ एतदेव व्यक्तीकुर्वन्नाह। भागैरनर्थकैर्युक्ता वृष
भोदकयावकाः। अन्वयव्यतिरेकौ तु व्यवहारनिबन्धनौ ॥१२॥ न हि वृषभे ऋषभस्योदकयावकयोर्वोदयावशब्दयोरर्थानुगमः कश्चिद

६ स्ति। अपि तु शास्त्रे पदस्य प्रकृतिप्रत्ययोरन्वयव्यतिरेकाभ्यां विना कथमतो साधुत्वा। एवं च निरंशमेव वाक्यं वाचकमिति वृत्तावुक्तं॥१२॥ अथवा कार्थ
स्यापि तथैव नि विभागस्तं प्रति पादयितुमाह॥ शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति। विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते॥ शब्दस्य स्फोटलक्ष
णस्य विभागो नास्ति। तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति। यथा निर्दर्शयिष्यति। विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते। वाक्यार्थ इति तामा
हुः। इति। तस्य पदानुरोधेन पदार्थस्यापि प्रकृतिप्रत्ययानुरोधेन भागकल्पना॥ मूढस्तु विभागेन प्रक्रियाभेदं प्रक्रियाभेदेवार्थभेदं प्रसत्यमपि प्र
तिपद्यत इति किं कुर्मः॥१३॥ युक्तं चैतत्। यद्वाक्ये पदार्थभेदो नास्तीति दृष्टान्तप्रदर्शनपूर्वकमाह॥ ॥ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्ब
ले। देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः॥१४॥ यथा ब्राह्मणकम्बलशब्दे ब्राह्मणशब्दस्य न कश्चिदर्थो विद्यते। तथैव देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादौ वा
क्ये देवदत्तादीनां पृथगर्थो नास्ति। अनर्थकान्येव पदानि। अत एव स्थितमेतत्॥ पदत्वेऽपि निराकांक्षमेकं पदव्यतिरिक्तं वाक्यं पदार्थव्यति
रिक्तो वाक्यार्थश्च तथैवेति॥१५॥ यत्तु न मीमांसकैरुच्यते। यथा पदसंघात एव वाक्यं आकांक्षायोग्यतासन्निधानवशात्परस्परसमन्वितो वा संस
र्गश्च वाक्यार्थ इति तद्दूषयितुमाह॥ ॥संभिन्नार्थास्तिरोभूतो न विशेषवान्निष्ठते॥ उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठतां॥१६॥ इह देवद
त्त गामभ्याज शुक्लां दण्डेनेति देवदत्तादीन्यपदानि वाक्यान्तर्देवदत्तपदं तावद्यदि सामान्यमात्रे प्रथमं वर्तते तत्तस्य गवादिपदैकाले एम०
६

वाचः क्रमवन्नित्यानिरोधानादसत्त्वमेवेतिकुतः पदांतरश्रवणकालेनदर्थप्रतीतिरित्सत्त्वादेववचनपदांतरसंनिधानेनस्वविशेषेवस्थानं। अप्र
पगम्यापिस्मर्यमाणेनयापदांतरसंनिधानेविद्यमानत्वंपदस्यनविशेषेवस्थानंयुज्यतइत्याहाउपात्तस्येति॥सामान्यलक्षणस्यसकलपदार्थसा
धारणस्यार्थस्यपूर्वमुपात्तस्यवाच्यत्वेनपरिगृहीतस्येदानींपदांतरसंनिधानेत्यागःकुतोयुज्यतेशब्दार्थसंबंधस्यानित्यतामाशंक्यनचतथा
मीमांसकस्याभ्युपगमइति।तदभ्युपगम्योच्यते।नित्यत्वइति।स्वार्थान्नित्यत्वेसौपदांतरसंनिधानेशब्दःक्वेदानीमवतिष्ठते।शब्दो
नरवोध्येर्थेतस्यवाचकभावविरहास्थितिःकथंयुज्यते। अथोच्यते। अर्थप्रतिपत्तिर्दृष्टादेवदत्तेत्यादिकात्समुदायात्।साकथम
पह्नूयते।तत्राह॥अशब्दोयदिवाकार्थःपदार्थोपितथाभवेत्।एवंचसतिसंबंधःशब्दस्यार्थेनहीयते।उक्तनीत्याशब्दानयुज्यतेवा
चकाःतदभावाच्चाशब्दोवाकार्थोयद्यभ्युपगम्यतेतदपसमपरित्यदोषः।पदार्थोपिपदप्रतिपाद्योनकश्चित् [illegible] अनेकवर्णव
र्त्तित्वाद्धाच्यत्वानप्रध्वंसित्वाद्वर्णानामितिपदमप्येकंनास्तितदभावात्कःपदार्थःस्यात्।तदस्यमशब्दोवाचकोवाकार्थइतिवाच्य
वाचकभावलक्षणःसंबंधःशब्दार्थयोस्त्यक्तःस्यान्मीमांसकेनेत्याह।एवंचेति।एवंतावदभिहितान्वयवादीनिर स्तः।इदानीम
न्वितानाभिधानसमाश्रयणेनपदमात्रेपृथक्त्वंपदेसाकांक्षमित्युद्दिष्टेवाक्यलक्षणेप्रदर्शयितुकामआह॥विशेषशब्दाःकेषां

७ चित्साभान्यप्रतिरूपकाः। शाब्दांतराभिसंबंधा द्युज्जनेप्रतिपन्नर्षाः इहदेवदत्तगामभ्याजेसत्रदेवदत्तपदंगोबधानेसस्माद्धिशिष्टमेववक्रा
समुदीरितोऽभ्यमानतुसकलसाधारणंप्रतिभानाउत्तरकालंगवादिपदसंबंधाद्धिशिष्टाप्रतिपत्तिरभिव्यज्यतइतितदेववाक्यंसकलविशे
षणाखचितत्त्वमथमतरमेवोपक्रांतः संसृष्टएवार्थोवाकार्थइतिव्यख्यावक्ष्यति। पूर्वैरर्थैरनुगतोयथार्थात्मापरःपरःासंसर्गएवमक्रांतस्थार्थोंद्वर्थ
वक्तषइतिोएतदेवस्फुटीकर्तुमाह। तेषांतुकृत्स्नोवाकार्थःप्रतिभेदंसमाप्यतोउपक्रमएवविवक्षितार्थप्रसायनायाविशिष्टपदोदीरणमारभ
तइत्याद्यएवपदेप्रसेकेवासकलस्यवाकार्थस्यसमाशिरवगतव्याः। यद्येकस्मादेवपदात्सकलवाकार्थप्रतीतिःतर्हिइतरपदवैयर्थ्यमित्साश
काह।। व्यक्तोपव्यंजनासिद्धिरर्थस्यप्रतिपत्तृषुप्रतिपत्तृषुवाकार्थस्यसिद्धिरवगतिर्व्यक्तोपव्यंजनाव्यक्ताउदीरिताउपव्यंजनाअभिव्यंजकाः
पदविशेषायस्याःसातथोक्ता। अभिव्यक्ताभिव्यंजकावाकार्थावगतिरितिपदान्तराणांवाकेनात्सवैयर्थ्यमित्सन्वितामिधानप्रदर्शनं।
दूषणामप्यग्रेतत्रतत्राभिधास्यति। यथा। नियमार्थाश्रुतिर्भवेदित्यादिातथाहि। यद्येकेनपदेनसकलवाकार्थस्याऽशेषविशेषणाखचि
तस्यावगतिस्तदोत्तरेषांपदानांनियमायानुवादायवोच्चारणंस्यात्। नचैतद्युक्तमितिवक्ष्यामः। एकस्मादेवपदात्समस्तविशेषणाखचित
स्यवाकार्थस्यप्रतीतिहृत्तरेषामानर्थक्यंस्यादेवानचतस्मादेववाकार्थप्रतीतिर्दृश्यते। व्यक्तोपव्यंजनेत्संसमाधानमेवंयतः किमेकस्माद्वा एम
७

कार्थावसायोनेषामुपव्यंजकत्वा। अथ समस्तेष्वप्येवं तेष्वंशः सर्वेषां वर्णानि पदानि वाक्यार्थप्रतीतय उपादीयन्त एवेत्यन्विताभिधानमसमंजसमेव॥
एकस्य वा परपदोच्चारणकाले तिरोधानादभिहितान्वयस्याप्यसंभवः स्वार्थभागे ह्रस्वणो शब्दभागसमाश्रयणे न ह्वयोरपि पक्षयोर्दूषणं पदानि
वाक्येनान्येवेत्यादिश्लोकद्वयेनाभिधास्यति॥ संप्रतिप्रतिभाभेदव्याविख्यासयाऽखंडपक्षमेवानुबध्नन्नाह॥ अथ क्रमः क्रमवान् शब्द उपांशुयम
धीयते। अक्रमस्त्वविततैव बुद्धिर्यत्रावतिष्ठते॥ इह नित्यं शब्द एवाभिव्यक्तिस्फोटो जातिस्फोटो वा बहीरूपश्चान्तरः शब्दार्थमयो वा बुद्ध्यनुसंहारो वा
कामिति स एव वाचक उपपन्नः। यस्तु भेदप्रतिभासः सोऽसावुपाधिकृत एवेत्यर्थः। तथा पांशुपरमोपांशु व्यक्ताव्यक्ततरश्रुत्या विलंबितो विलम्बि
ततरद्रुतद्रुततरत्वेत्यादिकाः प्रतिभासाः अभिव्यंजकध्वनिकृताः न पुनः स साक्षादिति बोद्धव्याः। तस्मात् शब्दोऽव्यक्त उपांशुत्वाधीयते। सोऽभि
व्यंजकध्वनिकृतात्क्रमात्क्रमवान्नानाविधावस्थश्च कः प्रतीयते परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः उपाधिवशात्तु तत्र बुद्धिर्वि
ततेवानुगम्यत इति बोद्धव्यम्। अनेनैकोऽनवयवः शब्द इत्युद्दिष्टस्य व्यक्तिस्फोटस्य स्वरूपमुक्तमिति बोध्यम्। अथ जातिः संघातवर्तिनी त्युद्दि
ष्टस्य जातिस्फोटस्यापि दृष्टान्तप्रदर्शनद्वारेण स्फुटीकरणमाह॥ यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते। आवृत्तौ व्यज्यते जातिः कर्मभि
र्भ्रमणादिभिः॥ वर्णवाक्यपदेष्वेवं तुल्योपव्यंजनाश्रुतिः। असंतभेदे तत्त्वस्य सरूपेव प्रतीयते॥ इह भ्रमणलक्षणकर्मजातिर्यथाविशिष्टप्रय

त्वजनितेनस्वेषविशेषणाभिव्यक्ताम्पसेकपरिसमाप्तत्वात्।नचपार्श्वस्थेनसाविज्ञायते।भ्रमणानामाद्यन्तौतुभ्रमणोभ्रमणोपानिप्रतिपत्त्रासा
४ गृह्यते।एवंवर्णपदवाक्येषुस्फूर्तिमभिव्यंजकोध्वनिरसंतमभेदेनत्वस्यवर्णपदवाक्यस्फोटलक्षणस्यसाभिव्यंजिकासद्रूपेवमतीयते।परमा
र्थतोभिन्नापिसती।कीदृशीतुल्योपव्यंजनेति।तुल्यःसदृशउपव्यंजनःस्थानकरणाभिघातलक्षणोपस्याःसातथेति।तेनभिन्नमयत्वो
द्दीरितध्वन्यभिव्यक्तोपंज्ञातिस्फोटोविलक्षणएवेतिबोद्धव्यं।युक्तंचैतद्व्याख्यातिरिंशत्यास्फोटस्यपूर्वपराभावउपाधिकृतोनस्वतो।नित्यत्वादिति २५
वैनसेननित्यत्वसमर्थनार्थमाह॥ ॥नित्येषुतुकुतःपूर्वपरौवापरमार्थतः।एकस्यैवतुसाशक्तिर्यद्देवमवभासते॥ नित्येषुहिपरमार्थतःपूर्वापरभा
वोऽसंभव्युपाधिकृतोदृश्यतएव।नत्तुसदैकरूपतयाकिंनावभासते।नहितत्रस्वभावभेदस्यसंभवइत्याशंक्याह।क्रमेकस्यैसाहि।एकस्व
भावोपितथाविधशक्तियुक्तएवंवस्तुस्वाभाव्यात्।यदेवंवैतत्सेनपूर्वापरभावस्वरूपतयाउपाधिभेदानुवर्तनेनावभासतइतिगौणेनाप्यु
पाधिभेदेनैवशब्दस्यभेदप्रतिभासोनस्वतोनित्यत्वादिति।दृष्टान्तप्रदर्शनपूर्वकमाह॥ ॥चिरंक्षिप्रमितिज्ञानेकालभेदाद्यतेयथा।भिन्न २
कालेप्रकाशेतेस्वधर्मोह्रस्वदीर्घयोः।चिरमितिज्ञानंक्षिप्रमितिचयथाज्ञानत्वाविशेषादेककालमपिनैयसमाश्रयणेनभिन्न
कालमिवप्रथते।चिरज्ञानोविततप्रतिभासमिवाभाति।क्षिप्रज्ञानमेतद्द्रूपीतोनद्दद्ध्रस्वदीर्घयोर्द्धर्मःस्वभावोवगंतव्यः।नतुह्रस्वादि एभं०
८

रूपता काचित्स्फोट इति नास्ति स्फोटस्य ध्वनेर्भेदः ॥२३॥ अथोच्यते न नित्यमुपाधिवशाद्भिन्नत्वं वक्तुं युक्तं। स्वभावभेदप्रसंगादित्याशंक्याह ॥ ॥न नित्यः प
रमात्राभिः कालो भेदमिहार्हति ॥२४॥ इह कालोऽपि नित्य एवाभ्युपगतो नित्यमेकमित्यादिलक्षणकथनात्तस्येदानीं क्षणलवनिमेषत्र्यादिव्यवहाराः क
थमुपपद्यन्ते। अथ परमात्राभिस्तस्य भेद उपचर्यते। यथा परमाणोः स्वावरुद्धनभोदेशत्यागोपलक्षितः कालः क्षणः क्षणद्वयं च लवः इत्यादि। तथानि
रंशो वा केचिदौपाधिकभेदपरिकल्पनायोकः प्रद्वेषः ॥२४॥ अप्रद्वेषः। न वयं नित्यमेकमित्यादिलक्षणलक्षितं कालमतिरिक्तं जानीमः पूर्वापरीभूताः
पदार्थमात्रा एव स्वभावभिन्नाः कालः तत्समाश्रयणेन चायं क्रमयोगपद्यव्यवहारः न पुनस्तद्व्यतिरिक्तनित्यस्वभावकालकृत इति तत्राप्या
ह॥ व्यावर्तिनीनां मात्राणामभावे कीदृशः क्रमः ॥०॥ ताः पूर्वापरीभूताः पदार्थमात्रा उदयव्ययोगित्वात्प्रवेति विशरारूणां तासां कीदृशः क्रमः।
कथं च तत्समाश्रयणेन कालव्यवहार इत्यपि न किंचिदेतत् ॥०॥ अथ तथाविधपदार्थसमाश्रयेण बुद्धिरुपजायमाना कालव्यवहारं निर्वर्तयिष्य
तीत्याशंक्याह॥ ॥ ताभ्यो या जायते बुद्धिरेकासौ भागवर्जिता ॥२५॥ ताभ्यः पदार्थमात्राभ्यो या जायते बुद्धिः सापि न शक्नोति कालव्यवहारं निर्वर्तयि
तुं यत एकासौ बुद्धिर्निर्विभागेति कथं पूर्वापरव्यवहारं निर्वर्तयेत् ॥२५॥ अत्राह॥ सा हि स्वशक्त्याभिन्नेव क्रमप्रत्यवमर्शिनी। क्रमोल्लेखानुषंगेण ॥०॥ बु
द्धिर्हि भिन्नेव स्वशक्त्या क्रमप्रत्यवमर्शिनी भविष्यति यतः क्रमोल्लेखानुषंगेणैवासावनुभववासनावशादुपजायत इति कालव्यवहारं निर्व

9

९ नैनचतुरैवसा॥१०॥ एतद्दूषयितुमाह॥ तस्यो यद्बीजमाहितो ॥२६॥ नैकनानात्वयोऽलस्यानिहक्किन्त्यावति छ्रतो ॥२८॥ नैस्याद्बुद्धौ यत्र दाहितं पदार्थमात्राभिरनुभववशाद्बीजं
वासनारूपं संस्कारस्वभावं ततः किं व्यतिरिक्तेन तस्याः उताव्यतिरिक्तमिति द्वयी गतिः। व्यतिरेके तस्यास्तेन न किंचिदित्यकथनं तद्वशात् क्रमादिको व्यवहारः।
अव्यतिरेके पुनरपि सैवैकानिर्विभागेति पदार्थमात्रावत् कालव्यवहारं कथं निर्वाहयेदिति तत्त्वनानात्वाभ्यां निर्वचनं न बुद्धेः कर्तुं न पार्यत इति पत
किंचिदेतत्॥२६॥ पुनस्तत्रान्तकोऽकलनवदविभक्त एव युक्त इति मतिपादयितुमाह॥ भावनासमभेपि ते न तत्क्रमसामर्थ्यं मक्रमो व्याहतमभेदो येनार्थो भे
दवानुपलम्भतो ब्रह्मकाण्डे सर्वशंकानिवारणं एवं केस्फोटस्वरूपं निरूपितमेवं। तस्मादेतद्वाक्यमक्रमं स्फोटस्वभावमेकं वाचकं स्वपदार्थभावनावश
रेतत्पाधिवशात्क्रमसामर्थ्यं क्रमेसामर्थ्यं शक्तिर्यस्य तत्क्रमसामर्थ्यमवगतमभेनार्थो वाच्यस्वरूपो व्याहतमभेदोऽखण्ड एव पदार्थोपाधिवशाद्भेदवा
निवोपलभ्यते न परमार्थतः। यस्य उत तानि पदानि वोपलभ्यमानानि वस्तुसन्ति वा केभिन्नतानि नन व्यतिरिक्तमेकमनंशमस्याखण्डस्वभावं वा
क्यं। तस्य पदान्यपि न वर्णव्यतिरेकेणाविद्यन्ते। वर्णा अपि भागवन्त इति प्रकर्षप्राप्तो भेद एवं सर्वत्र स्यादिति परवादिनं दूषयितुमाह॥ पदानि वाक्ये
तान्येव वर्णास्ते च पदे यदि। वर्णेषु वर्णभागानां भेदः स्यात्परमाणुवत्॥२०॥ पर्यावयवव्यतिरेकेणावयविन एकस्यानंगीकारेऽवयवानामपि भागव
त्त्वाद्भागपरिकल्पनायामतिप्रसंगात् परमाणूनामवशेषः। तेषामपि केषांचिन्मते षड्भेन युगपद्योगात् सांशतायामवयवस्यानुपपत्तिः। एवं

॥२८॥

अतश्चाव्यपदेश्यपदार्थविरहितं निरीहमेव जगदापतितो नत्वेवं वर्णभागानामनुपश्लेषात्तु वर्ण एकः कश्चित्स्यात् तदभावे पदमपि न भवेदिति प्रतिपा
दयितुमाह॥ भागानामनुपश्लेषान्न वर्णो न पदं भवेत्। तेषामव्यपदेश्यत्वात्किमन्यदपदिश्यतां॥ अतश्चोक्तरीत्या भागानामसत्त्वाद्व्यपदेशविरहा
त्किमत्र वाचकमेतद्भवति। किमन्यदपदिश्यतां। अखंडस्यानंगीकरणात्पदानामुक्तेन न्यायेनानुपपत्तेः।। तिन कश्चिद्वाचकः स्यात्। अस्ति च वाक्या
र्थस्य प्रतीतिः सा सनिमित्ता भवितुमर्हति सेकएवानित्यः पदाभिधेयो खंडो व्यक्तिस्फोटे जातिस्फोटे वा वाचको गीकार्य इति सिद्धांतः। एवं तावद्बहीरूपे
व्यक्तिस्फोटे जातिस्फोटे वा वाचकमाश्रित्य वाक्यं व्याख्यातं। इदानीमंतरे वानवयवे बोधस्वभावे शब्दार्थमये निर्विभागे शब्दतत्त्वमिति यद्गीतं तदेव ना
देर्बहिः प्रकाशितं वाक्यमाह्नराचार्य इत्यांतरं बुद्ध्यनुसंहृतिरित्युद्दिष्टं व्याख्यातुमाह॥ यदंतः शब्दतत्त्वं तु नादैरेकं प्रकाशितं। तदाहुरपरे शब्दं तस्य
वाक्ये तथैकतां॥ वाक्यविचारे प्रक्रांते नस्यांतरस्यैकनानिरंशस्य वमपि पाद्यत इति न देव सत्त्वाद्वाक्यमस्मत्किं न भवति रिक्तेनासत्येन वाक्येने
त्यर्थः। न केवलं वाक्यं तथा। यावद्वाक्यार्थोप्यखंडः प्रतिभात्मकः पदार्थभागैरभिव्यज्यत इति प्रसंगादाह॥ अर्थभागैस्तथा तेषामांतरोर्थः प्र
काश्यते। तेषामांतरवाक्यवादिनामाचार्याणां मते आंतर एव वाक्यापि वाक्यार्थ इति बोद्धव्यं। तो च शब्दार्थौ विभिन्नौ वेकस्यांतरस्य तत्त्वस्य संबंधि
नौ वस्तुतः बहिः स्थितौ भेदाविव प्रतिभासेते इति बोधयितुमाह॥ एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ॥ ननु शब्दार्थयोर्वाच्यवाचकाविति

१० 10 प्रसिद्धमतः कथंतयोर्भेदइत्याशङ्क्याह॥ ॥प्रकाशकप्रकाश्यत्वेकार्यकारणरूपता। अन्तर्मात्रात्मनस्तस्यशब्दतत्त्वस्यसर्वदा॥ ३२ तस्यहिशब्दतत्त्वस्या
नात्मज्योतीरूपस्यशक्तिभेदाद्यभेदप्रतिभासोनाविरुद्धः। एतच्चादावुक्तमागमकाण्डे एकस्यसर्वबीजस्यसादिनो॥ इदमपितस्यशक्तिभेदाद्वभास
नइतिप्रसङ्गादाह॥ ॥नासेवास्तित्वनास्तित्वसामर्थ्येसमवस्थिते॥ अक्रमेक्रमनिर्भासेव्यवहारनिबन्धने॥ ३३ तस्मिन्देवैकनिर्विभागपरेतत्त्व
मात्रिसायेसकललोकसंव्यवहारः शक्तिभेदादुपनीयते॥ किंपुनरयंवाच्यवाचकविभागमात्ररूपइत्यवदोषपक्षएवउक्तः॥३३॥ इदानींपदवादि
मतमाशंक्यपुनरपिदूषयितुमाह॥ संप्रत्ययप्रमाणत्वात्पदार्थास्तित्वकल्पने। पदार्थान्प्रत्ययेसागादानर्थक्यंप्रसज्यते॥ यदिपदार्थसंप्रत्ययःप्रमाणं
पदपदार्थसत्तायाम्प्रत्यते। तदादेवदत्तगामभ्याजशुक्लांदण्डेनेत्यस्मिन्वाक्ये पूर्वपूर्वपदार्थानामुत्तरोत्तरपदार्थप्रत्ययेसार्थसागात्तत्तत्पदोपाद
नस्यानर्थक्यंप्रसज्यते॥ ततश्चानर्थकस्योच्चारणवैफल्यादुच्चारितानाह्वानस्माच्छेदमात्रात्पदार्थप्रत्ययस्यानुपपत्तेः किंनिबंधनावाक्यार्थप्रतीतिः
स्यादितिप्रत्यक्षिचिदेतत्॥ तथाचपदानामव्यवस्थितेः पदवादोऽनुपपन्नएवलक्ष्यतेइत्यभिधातुमाह॥ ॥राजशब्देनराजार्थोभिन्नरूपेणगम्यते॥ राजा
राजानंराज्ञाराज्ञेराज्ञोराज्ञिराजनीत्येवमनियतस्वरूपेणराजपदेनराजार्थप्रतीतिर्दृश्यते। यदिपदस्यसत्यतास्यात्तदानियतेनैवरूपेणसर्वत्र
नचदृश्यते॥ तेनमन्यामहेमिथ्यैवपदानीति॥ इतोपिनास्तिपदमित्याह॥ वृत्तावाक्यानसदृशंपदमन्यत्प्रयुज्यते॥ राजपुरुषइत्यस्यांहिवृत्तौराज एम्ः
१०

शब्दस्याख्यानसदृशः तत्र च देहराजपुरुषेत्यत्र राजन्याजनत्वपुरुषेत्यर्थप्रतीतिः स्यात् न चैतदिष्टं तस्मात्सार्थकानि पदानि न समस्तेऽवा ॥१०॥ नकेवलं केवलानां नि
यतरूपासंभवस्तेषां भावइत्यावयविस्थितानामित्याह ॥ यथाश्वकर्णइत्युक्ते विना वाक्येन गम्यते। कश्चिदेव विशिष्टोऽर्थः सर्वेषु मत्तयन्तथा॥ अश्वकर्णी इत्य
त्राश्वपदार्थेन विना वज्ञातेनाविशिष्टः कश्चिदर्थो गम्यते। तस्मात्सर्वेष्वपि पदेषु परामृष्टविभागेषु वाक्याभिव्यंजकेषु समस्तत्वं वा कावगतिः सर्वको वाक्या
र्थमस्य पदस्येव प्रक्रैनेनुएवं सतिपयोऽर्थरूढ्यारूढिविभागः शब्दानामुच्यते सहार्थेत्याशंक्याह ॥ वाक्येतत्र्योनरागतेः सादृश्यपरिकल्पने। केषांचिद्रूढिश
ब्दत्वं शास्त्र एवानुगम्यते॥ हस्तिवाक्ययोः सादृश्यपरिकल्पने केषांचिच्छब्दानां वाक्ये विग्रहरूपे योनरागमनीतेः रूढिशब्दत्वमुच्यते। यथा तैलपायिके
ति। अत्र चैनेत्तंपिवतीतिवाक्यवेलायामर्थप्राप्तेर्भावः। इत्यवस्थायां तैलपायिकेतिज्ञातेन तु अश्वक्रार्थस्य कस्यचित्प्रतीतिः। न च तस्य तैलपानक्रि
यालक्ष्यतइति रूढिरूपता अस्यो चानेकेषांचित्तु हस्तिवाक्ययोरर्थस्य सादृश्यात् यौगिकत्वं। यथा राजपुरुषइति। परिकल्प्यतइत्यनेन सर्वमेतदवस्तुविभा
गादिकं शास्त्रसमयएव कल्पनामात्रं। परमार्थतस्तु व्यवहारकाले निर्विभागमेवोपलभ्यतइति प्रतिपाद्यते। एतदेव शास्त्रएवानुगम्यतइत्यनेन व्यक्ती
कृतम्। कथमेतदुच्यतइत्याह॥ ॥उपादायापि ये हेयास्तानुपायान्प्रचक्षते। शास्त्रमुपायः शब्दपरिज्ञाने। ज्ञातेषु च तेषु प्रयोजनसंपत्तेरनुपयोगइ
ति तस्य परित्यागः। उपायाश्च न नियताइत्याह॥ उपायानां च नियमो नावश्यमवतिष्ठते। अर्थं कथंचित्तु हृष्टः कश्चिन्नेत्यमतिपद्यते॥ कश्चिदाचार्यः

११
गिरिनिर्विरचितेन लक्षणशास्त्रेण शब्दाननधिगच्छति। कश्चिदन्येनेति न नियमः। एतदेव स्पष्टीकुर्वन्नयं कथंचिदित्यादिना। तस्मात्तेस्य स्पष्टस्य विभक्त-
स्य वाक्यार्थविशेषस्य वाक्यमेकमनंशमेवमतीतानि निबंधनमिति पदपदार्थप्रविभागकल्पनमसमंजसमेवेति प्रतिपादयितुमाह॥ संसृष्टा वा विभक्ता वा भेदा
वाक्यनिबंधनाः॥ अन्यत्र स्थितिरेषा एवायं पदार्थस्थूलो वाक्यार्थोध्यासमात्रसंबंधगर्भः कस्मादपि वर्णान्तरानीयत एवेत्यभिधातुमाह॥ सोयमित्यभिसंबं-
धो बुद्ध्या सक्रम्यते यदा। वाक्यार्थस्य तदेकोपि वर्णः प्रत्यायकः क्वचित्॥ सोयमित्यभिसंबंधोध्यासरूपो वाक्यार्थस्य वाक्येन सह पदावक्त्रा सक्रम्य-
ते। तदेकोपि वर्णो वाक्यार्थस्य वाचको भवत्येव। किंतु नरनेकमशेषविशेषाभिधानविवक्षयोदीरितं पदमिति। एवमध्यासवशाद्वाक्यवाक्यार्थयो-
रभिन्नस्वरूपत्वाद्वाक्यार्थाभिव्यंजको वाक्यमपि स्फोटात्मकमभिव्यक्तमेवेत्युक्तो वाक्यार्थस्य तदेकोपीत्यादि। इदानीमभिहितान्यपक्षसमा-
श्रयणेन संघातपक्षस्य प्रदर्शनायाह॥ केवलेन पदेनार्थो यावानेवाभिधीयते। वाक्यस्थं तावतोर्थस्य तदाहुरभिधायकं॥ संबंधे सति यत्त्वन्यदाधि-
क्यमुपजायते। वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयं॥ ४३ केवले पदे यस्यैवार्थस्य वाचकं वाक्यस्थमपि तमेवाभिदधाति। ततः समुदाये पदानां परस्परान्व-
ये पदार्थवशाद्यदाधिक्यं संसर्गः स वाक्यार्थः। उक्तं च यदत्राधिकं वाक्यार्थः स इति। अनेकपदसंश्रयमित्यनेन संघातो वाक्यमिति दर्शितं॥ ४३ वाक्यार्थ-
स्य चास्य जातिवत्प्रत्येकपरिसमाप्तिः केषांचिन्मते संख्यावत्समुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह॥ सत्स्वनेकपदस्थोपि यत्रभेदसमाप्य एम॰
११

ते। जातिवत्समुदायेपिसंख्यावत्कल्प्यतेपदैः। ॥४४॥ अथवात्रसंघातपक्षएवप्रकारांतरेणान्विताभिधानमदर्शनात्पदार्थएववाक्यार्थइतिमक्कमितुमाह॥ सर्वभेदा
नुगुणंतुसामान्यमपरेविदुः। तदर्थांतरसंसर्गाद्भजतेभेदरूपतां॥ सर्वेषांभेदानामानुगुणंयस्मिन्नतत्तथाविधंसामान्यंसंसर्गलक्षणमाकांक्षायोग्य
तासन्निधानवशेनपदार्थांतरसंसर्गान्विषयतयारूपंवाक्यार्थः॥४५॥ तत्रचाकांक्षावशाद्येयमस्फुटरूपतावाक्यार्थस्यतामितरपदार्थसंनिधिर्निवारय
तीत्याह॥ भेदानाकांक्षतस्तस्ययापरीप्लवमानता। अवच्छिनत्तिसंबंधस्तांविशेषनिवेशिनीं॥ पूर्वत्रपदानांवाक्येनावान्तेवार्थोयावानेवकेव
लानांसंसर्गस्तुसंघातवाच्यः। इहतुतथाभूतएवसामान्यरूपः पदस्यार्थः यस्तत्तद्विशेषसन्निधौतत्तद्विशेषविश्रांतइतिसंघातपक्षेसंसर्गोवा
क्यार्थइत्युक्तं। सचपूर्वत्रजातिवत्संख्यावद्वापदार्थव्यतिरेकेणवाक्यार्थत्वेनकल्पितः। इदानींपदार्थव्यतिरेकेणान्यएवैकोनानुमेयोनस
मुदायवाच्यः किंतर्हिसर्वभेदानुगुणसामान्यरूपोविशेषांतरसन्निधानाद्विशेषविश्रांतः पदार्थएववाक्यार्थइतिदर्शयितुमाह॥ कार्यानुमेयः
संबंधोरूपंतस्यनदृश्यते। असत्वभूतमत्यंतमतस्तंप्रतिजानते॥४६॥ कार्येणपदार्थानांविशेषविश्रांतिलक्षणेनानुमीयतइतिकार्यानुमेयः इद
न्तदितितुरूपंतस्यनदृश्यते। अतएवासत्वभूतंपदार्थव्यतिरेकेणसत्वंनास्तिअस्यतमेवंभूतमाचार्याः प्रतिजानते॥ एतदेवव्यक्तीकर्तुमाह॥
नियतेसाधनेसाध्यंक्रियानियतसाधना। ससन्निधानमात्रेणनियमः सम्प्रकाशते॥४७॥ साध्यंसाधनंचपरस्परंनियतमेवकेवलमाकांक्षा

॥४८॥

१२ वशादितरपदार्थसंनिधाने प्रतिनियमः प्रत्येवं प्रकाशनं इत्याक्षिप्तपदान्तराणि पदान्येव वाक्यं पदार्थाश्च वाक्यार्थ इत्यभ्युपैति । क्रमः संघातपक्षो यो व्याख्या
तपक्षस्तत्पक्षायां समानायां विशेषमभिधातुमाह ॥ गुणभावेन साकांक्षं तच्च नाम प्रवर्तते । साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥ नामकारकप
दं क्रियायां गुणभूतं नामपदं साकांक्षमिति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षत इति । क्रमो वाक्यमित्युद्दिष्टं । क्रमपक्षं व्याख्यातु
माह ॥ ते एव विशेषा येषु पदार्थेषु व्यवस्थिताः । ते क्रमादनुगम्यन्ते न वाक्यमभिधायकं ॥ पदार्थेषु देवदत्तादिपदवाच्येषु गोकर्मिकायामस्यां क्रि
यायां देवदत्तपदार्थस्य कर्तृत्वं गोपदार्थस्य देवदत्तकर्तृकायां कर्मत्वमित्यादयो विशेषाः संत एव पदेभ्यः क्रमेणाप्रतीतेभ्यो वगम्यंत इति क्रम एव वाक्यं
५६ नवाक्यमभिधायकमित्यनेन क्रमव्यतिरेकेण शब्दात्मकेन वाक्यमभिधायकमस्तीत्युच्यते । एतदेव स्फुटीकुर्वन्नाह ॥ शब्दानां क्रममात्रे च नान्यः
शब्दोस्ति वाचकः ॥ अनपेक्षितविशिष्टानुपूर्वीकः क्रमः क्रमसमाचीनास्मिन्नसत्पर्यवसीते न्यासलक्षण इति । कः कश्चित्स्फोटादिः शब्दो वाचकोऽस्त्युप
गंतुं युक्तः । अर्पितक्रम एवोपलभ्यमानो वाचकः ॥ अपक्रम इति किमुच्यत इत्याह ॥ क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ॥ क्रमवत्सु पदार्थो
पाधिवशेनापि कालस्य धर्म उच्यते । युक्तं चैतत् । यत्क्रम एव वाक्यमित्याह ॥ एवं सम्भविनो भेदाः पदार्थेषु विभाविताः । तेषां संनिधाने व्यज्यन्ते न तु वर्णा
यपक्रमः ॥ ५२ पदार्थेषु ये भेदाः पूर्वोक्ताः संति ते केवलेषु विभाविताः संतः क्रमवत्पदार्थांतरसंनिधाने भिव्यज्यंत इति दर्शनात्क्रम एव वाक्यमिति पद एम॰ १२

क्रमो वा कथमुक्तो। वर्णक्रमस्य न नष्टेस्युक्तो। ननु वर्णेषु पदेषु क्रम इति। एतदेवोपसंहारेणास्फुटयितुमाह॥ वर्णानां च पदानां च क्रममात्रनिवेशिनी॥
पदाख्या वाक्यसंज्ञा च॥ वर्णक्रमः पदमुच्यते नाम। वाक्यसंज्ञा पदक्रम एव युक्ता नत्वर्थप्रतीतिदर्शनात्॥ क्रम एव शब्दो न वर्णपदे इत्युक्त
मुपसंहर्तुमाह॥ शब्दत्वेनेष्यते तयोः॥ तयोर्वर्णपदयोः शब्दत्वं श्रोत्रेन्द्रियग्राह्यत्वेपि वाचकत्वलक्षणं नेष्यते। अपितु क्रमस्यैवोपद
क्रमस्य शब्दत्वे वाक्यार्थेनार्थवत्त्वायामा वाक्यार्थभागेषु पदानामर्थवत्त्वम्। एवं वर्णक्रमस्यापि शब्दत्वे पदार्थेनार्थवत्त्वं ततः तदर्थवत्त्वो
वर्णानां किंचिन्नोगीक्रियत इत्याह॥ समानेपि तु शब्दत्वे दृष्टः संप्रत्ययः पदात्। प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः॥ वर्णपदत्व स्व
णस्योभयरूपस्याप्युशब्दत्वे समाने पदानां क्रमाद्वाक्यार्थस्यावगमो दृष्ट एवमेव वर्णादिसत्तः पदान्येवार्थवन्ति। न तु क्रमस्यैव वाक्यो।
संसर्गो वाक्यार्थ इति॥ इदानीं संघातः क्रमस्तथैको नवयवश्च शब्दः स्फोटात्मेति व्याख्यातानि त्रीणि वाक्यलक्षणानि। श्लोकत्रये
णोपसंहरति। न च संघातपक्षमुपसंहर्तुं नावकाशः॥ यथा सावयवा वर्णा विना वाच्येन केनचित्। अर्थवन्तः समुदिता वाक्यमप्येवमिष्य
त्रै २ ते॥ वर्णानां समुदायार्थवत्त्वे केवलानामनर्थकत्वं यथा तथा पदानां केवलानामर्थासंभवात् समुदायस्य वाक्यमिति व्याख्यातं क्रम
पक्षमप्युपसंहर्तुमाह॥ अनर्थकानामुपायत्वात् सार्थेनार्थवन्ति वा। क्रमेण त्रीणि नान्याद्वा वाक्यार्थभिन्नलक्षणे। पदानि केवला

(13)

१३ त्मनर्थकानि केषांचिन्मते स्वार्थेनार्थवंति॥ क्रमेणोच्चारितानि वाक्यं॥ तथाविधाद्वाक्याद्वाक्यार्थभिन्नलक्षणो व्यतिरिक्तस्वरूपसंसर्गात्मकं
13 ॥विशिष्टमेव वा संसर्गवशान्निराकांक्षविशेषावस्थितपदार्थस्वरूपमेव व्यतिरिक्तमुपगम्यत इति॥ स्फोटपक्षमप्युपसंहरन्नाह॥ नि
त्यत्वे समुदायानां जातेर्वा परिकल्पने। एकस्यैवार्थतामाहुर्वाक्यस्याव्यभिचारिणीं॥ इह देवदत्त गामभ्याज शुक्लां दंडेनेत्यादिकानि भि
न्नवक्त्रुदीरितानि पदसमुदायात्मकानि शब्दरूपाद्भिन्नान्येव॥ अयमर्थः॥ तत्तत्तद्वक्तृभिन्ना अपि ध्वनय एकमेव स्फोटं व्यक्तिस्फोटा
त्मकं नित्यमभिव्यंजंति॥ देवदत्त गामभ्याजेत्यादिकेषु भिन्नवक्त्रुदीरितेषु वा स्फोटजातिर्नित्या देवदत्तपदसमुदायाभिव्यंग्या वाक्यार्थ
स्यैकस्य प्रतिभात्मकस्य प्रतिपादिकेति मतभेदाज्जातिव्यक्तिस्फोटोपसंहारः॥ तदेवं संघातादीनि चोदितानि वाक्यलक्षणानि व्याख्या
तानि॥ आख्यातं वाक्यमिति व्याख्यास्यति॥ एषां च मध्यादिति॥ सूत्रकाराभिप्रायमनुसृत्याखंडपक्ष एव वाक्यवाक्यार्थयोरभ्युपग
म्यत इति प्रदर्शितं॥ इदानीं भाष्यकाराभिप्रायेणापि स एवाभ्युपगंतव्य इत्युपक्रम्यते॥ तथा च भाष्यं॥ न लक्षणेन पदकारा अनुवर्त्याः
पदकारैर्नाम लक्षणमनुवर्त्यं॥ यथालक्षणमप्रयुक्त इति॥ अत्र यदि पदानां सत्यता स्यात्तदा नैषां स्वत एव सिद्धत्वात्तदा
नि कुर्वतीति पदकारा इत्येतदसंगतं स्यात्॥ लक्षणेन च तदनुवर्तनं वस्तुसत्त्वात्तेषां पदकारैर्नाम लक्षणमनुवर्त्यमित्यप्यसंग एम०
१३

तस्मात्तत्पर्यायप्रयुक्तपदविषये पदानां सत्त्वात्तद्विभागोऽयं न सिद्ध इति यथा लक्षणं लक्षणानुसारेण पदकरणमप्रयुक्तमिति तदनुपपन्नमेव।
आह चैवं भाष्यकारः। न स्मान्मन्यामहे पदानि सन्ति एकमभिन्नस्वभावकं वाक्यं तद्बुद्धबोधनाय पदविभागः कल्पित इति। तदेतदभिधातुमाह॥
अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिः॥५०॥ यत एवं सूत्रकारस्य भाष्यकारस्य चाखण्डपक्षोऽभिरुचितः। तस्माद्वाक्यवादिभिः स्फोटवादिभिरभेदकल्प
नमाश्रितोऽकाल्पनिकः पदवादोऽभ्युपगत इत्यर्थः॥५०॥ पदवादिमतमपि प्रसंगाद्दर्शयति॥ भेदपूर्वा न भेदा ये ते मन्यन्ते पददर्शिनः॥ भेदपूर्वका
न भेदा न त्वाभिमता न्यायदर्शिनः पदमेव सत्यं ये मन्यन्ते तेषां हि कथं खण्डं वाक्यं नाम काल्पनिकमास्ते॥५१॥ अथ यदि नैवं स्थितिः तत्कथं पदप्रकृतिः संहि
तेति प्रातिशाख्ये। अत्राहि पदानि प्रकृतिर्यस्याः संहितायाः इत्यर्थो व्याख्यायते। पदानां चासत्त्वात्तत्कारणिका संहिता प्रयुक्ता स्यादित्यालो
च्याखण्डपक्षेणापि तत्संवादयितुमाह॥ पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते॥ वृत्तिभेदमेव प्रदर्शयितुमाह॥ पदानां संहितायोनिः संहिता वा
पदाश्रया॥ अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्यायत इत्यर्थः॥५२॥ इदानीं येनाभिप्रायेण भाष्ये नलक्षणेनेत्यादिकमुक्तं तम
भिव्यक्तुमाह॥ पदाम्नायस्य यद्यन्यः संहिताया निदर्शकः॥ नित्यत्वे तत्र कथं कार्यं पदं लक्षणदर्शनात्॥ यदि हि पदाम्नायः संहिताप्रदर्श
को नित्यः सत्यभूतोऽभ्युपगतस्तदा कथं लक्षणादर्शनात्सदं कार्यमिति तैर्नलक्षणेन पदकारा इत्यादिना भाष्यकारो दर्शयेत्तथा तत्र पदान्यसत्यानि

(15)

१४ तस्य प्रतिभासेनेतनत एवमभिहितमिति भाष्यकारस्य पूर्ववेदपक्षोभिमेत इति दर्शितो ॥ इदानीं पदवादिनं प्रति हूषणमाह ॥ प्रति वर्णमिव संवेद्यः पदार्थ
प्रत्ययो यथा पदेष्वेवमसंवेद्येवा कार्यस्यानिरूपणात् देवदत्तादौ पदे यथा नदकारादिवर्णे वर्णे प्रति देवदत्तप्रत्ययो जायते । तथैव देवदत्तगामभ्याजे
त्यादिवाक्यार्थस्य देवदत्तादिपदे पदे प्रतिनास्ति प्रत्ययोऽतः उच्यते । एतावतानर्थकान्येव वाक्यादेवार्थप्रतीतिर्दर्शनात् वाक्यमेवार्थवदिति । एता समुदितेष्वित्यर्थः ५
वत्यापि विधातुं पदवाद्याह ॥ वाक्यार्थः संनिविशते पदेषु संहृतिषु यथा तथैव वर्णेषु पदार्थः संहतिषु इह पदे वर्णाः । अर्थवन्तो वाक्ये पदान्य
पीति दृष्टव्यो केवलं यथा समुदितेषु पदेषु सन्त्स्वाक्यार्थः संनिविशते स्वरूपं प्रतिलभते तथैव वर्णेष्वपि बुद्धौ संहतेषु निष्ठेव पदार्थ उपजायत इ
४ ति नैतावता वर्णाः हृष्टान्तेन पदानामनर्थकत्वे एतदेव दृष्टान्तेन दर्शयितुमाह ॥ सूक्ष्मग्राह्यं यथान्येन संसृष्टं सहगृह्यते । वर्णेप्यन्येन वर्णेन संबद्धो
वाचकस्तथा ॥ ग्राह्यमपि सूक्ष्मं वस्तु रजः प्रभृति यथान्येन केनचित्सजातीयेन विलक्षणेन वा संसृष्टं सद्गृह्यते एवमर्थवानपि वर्ण एकैकं न
संप्रत्यायकोऽन्येन संसृष्टस्तु वाचक एव । एतद् क्रमभवति । अर्थवन्त एव वर्णाः प्रतिपत्तानुपाटवविरहादेकैकं न तथा गृह्यन्त इति । नात्र तेषा
मपराधः । न चानर्थकमेव पदमितिवत् कुंयुक्रमसंसक्षविरोधादित्याह ॥ ॥ पदस्योच्चारणादर्थो यथा कश्चिन्न लभ्यते । नहि किंचिन्नदं केन
चिदर्थेनानिरूपितमिति प्रसज्येत कुमनुभवविरोधात् । यथा चैवं पदोच्चारणकाले त्रिकाचिदर्थप्रतीतिरेवं तेनैवार्थेन संहता अप्यर्थ एम०
१४

वेतइतिप्रतिपादयितुमाह॥वर्णानामपिसान्निध्यात्तथासोऽर्थःप्रतीयते।केवलेसान्निध्यात्सहोच्चारणाद्यसावर्थस्तेषांप्रतीयतेतस्माद्यथासमुदिताः
परस्परंशक्ताएवेशाब्दस्मींवाचकाएवंपदान्यपिसंभूयैवेतिवर्णपदव्यतिरेकेणवाक्यंनामनास्तीतितदुक्तं।यावंतोयादृशायेचयदर्थप्रतिपादनेव
र्णाःप्रज्ञातसामर्थ्यास्तेतथैवावबोधकाइति।यदिचपदार्थनिबंधनोवाक्यार्थावभासोनांगीक्रियेततदाप्रतिनिधिकल्पनैयिकादिनियतपदप्र
श्नः श्रुतिवाक्ययोर्विरोधेश्रुतिर्बलीयसीत्यवान्तरवाक्यानामर्थविवेचनस्यात्रलक्षणानुपपत्तिःश्रुतिपंचचोद्यान्यापतेयुरिति।तानिक्रमेणप्रदर्शयि
तुमाह॥प्राप्तस्यप्रस्यसामर्थ्यान्नियमार्थापुनःश्रुतिः।तेनासंतंविशेषेणसामान्यंयदिबाध्यते॥इहयजेतेत्याख्यातपदप्रतिपाद्योयजतिर्विधित
पदिश्यतेतत्रक्रियाप्रधानमाख्यातमितिन्यायजतिक्रियासाधननिर्वर्त्यत्वसौकारकमात्रस्याक्षेपिकाकदाचिद्विशिष्टस्येवेतिद्वयीगतिः।तत्रयस्य
व्रीहित्वस्ययजतिक्रियासामर्थ्यात्प्राप्तस्यव्रीहिभिर्यजेतेतिपुनर्व्रीहिश्रुतिरुच्चरंतीनियममवगमयतिव्रीहिभिरेवनयवैरितितत्रश्रुतेनद्र
व्यविशेषेणाश्रुतंतद्रव्यसामान्यमात्रंयदिबाध्यते॥अतःकिमित्याह॥यजेतेतिपदाद्यंप्राप्तंसामर्थ्यलक्षणंव्रीहिश्रुत्यानिवर्तितंतस्यान्यप्रति
निधित्वंतां॥यजेतेत्यनयाक्रिययानिःसाधनाक्रियानभवतीतिसामर्थ्याद्यदाक्षिप्तंद्रव्यमात्रंतद्व्रीहिभिर्यजेतेतिपुनर्व्रीहिश्रुत्याबाधितंतस्य
न्निवर्तितत्वेतदभावेप्रतिनिधिर्नस्यात्॥क्रिययाद्रव्यमात्राक्षेपेव्रीहिलक्षणस्यद्रव्यस्याभावेतत्सदृशंद्रव्यांतरमेवनीवारादिकंसमानीयतन्निर्व

व्रीहेरभावे २

नैनेक्रियते। विशिष्टद्रव्याक्षेपेनु नयाक्तेनेन तदुपादानेनैनियमाय पर्यवस्यतीति कथं व्रीहिकारणकं यजनमन्यो निर्वर्तयेदिति मतिनिश्चयाभावः। तस्माद्द्रव्यमात्रा
क्षेपे प्रतिनिश्चयपपत्तिः। तदेतदेव दर्शयितुमाह॥ तस्माद्व्रीहित्वमविकं व्रीहिशब्दः प्रकल्पयतां द्रव्यत्वमविरुद्धत्वात्सामर्थ्यः सत्त्वबाधते। तस्माद्द्रव्य
मात्राक्षेपे व्रीहिशब्दो न सामर्थ्याद्व्रीहित्वमात्रमापणप्रयोजनो व्रीहित्वमेवाधिकं कृत्वाभ्युपकल्पयन्नङ्गीकुर्वन् द्रव्यत्वं न बाधते। अविरुद्धत्वात्॥
सामान्यस्य विशेषणसहाविरोधात्। अतस्य किमित्याह॥ तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि। अस्तेम वा द्विशेषाणां तत्रान्येषामदर्शनात्। ते
न च व्रीहिशब्देन व्यवच्छिन्ने कृताभ्युच्चये परत्रोपचये द्रव्यत्वे सति। कीदृशे सहचारिणि। अविरुद्धकार्यसमवेते। द्रव्यविशेषाणां तत्रान्येषां समस्ता
नाम सेभवादर्शनमनाक्षेपणं वा एतदेवोन्मीलयितुमाह॥ न च सामान्यवत्सर्वे क्रियाशब्देन लक्षिताः। विशेषा न हि सर्वेषां सतां शब्दोऽभिधायकः। ७०॥
यजातिना हि क्रियाशब्देनात्र द्रव्यत्वसामान्यवत्सर्वे विशेषास्तदन्तर्गता न लक्षिता आक्षिप्ता अपितु द्रव्यत्वमेव। तदेव चाभ्युच्चयीकृतं व्रीहिशब्दे
न। सामान्यमात्राक्षेपः किमिति नाङ्गीक्रियत इत्याशंक्याह॥ न हीत्यादि। न हि सकलसंनिहितविशेषाभिधायकः शब्दः परिदृष्टः। तथाऽप्रतीतेः। ७०॥
एतदेव दृष्टान्तेन स्फुटीकर्तुमाह॥ शुक्लादयो गुणाः सन्तोऽपि यथा तत्राऽविवक्षिताः। तथाऽविवक्षाभेदानां द्रव्यत्वसहचारिणां व्रीहिभिरित्यत्र य
थाशुक्लकृष्णादिगुणायोगो न विवक्षितः तथा च व्रीहिभिर्यजेतेति भेदानां द्रव्यविशेषाणां सामान्याविरोधिनामविवक्षैवेति। न तत्स्वस्थितमेत

त। पदत्रयजनितक्रियाक्षिप्तद्रव्यमात्रास्तु स्वयामिधायको व्रीहिशब्दो न द्रव्यविशेषवचन इति न तस्य न क्रिया प्रतिनिधीयमाने द्रव्यं तु प्रतिनिधीयत
इति मुख्याभावेन तत्सदृशनीवारादिद्रव्यं तेनोपादानेन यागनिर्वृत्तिरिति प्रतिनिधिसमाश्रयणेन विध्यर्थानुष्ठानं सिध्यतीति न तदेव सादृ॰ न देन
देव प्रतिनिधिप्रयोजनमाह॥ ॥ अथ तं निधौ प्रतिनिधिर्नाम न्नित्यस्य कर्मणः। काम्यस्य वा प्रवृत्तस्य लोपः स्यापदि दर्शिते। मुख्यस्याप्त न्निधाने ऽभा
वे मा भून्नित्यस्य कर्मणो लोप इति प्रतिनिधिरुपपद्यते। काम्यस्य वा प्रवृत्तस्य तथैव लोपो मा भूदिति प्रवृत्तस्य काम्यस्येत्यनेन तदाह। यन्मु
ख्याभावे काम्ये प्रवृत्तिरेव न ज्ञापयति॥ प्रवृत्तौ वा केनचिद्वैगुण्येनासंपत्तौ समुदायस्य प्रतीतेः न चापि प्रतिनिध्युपादानेन तन्निर्वर्त्तनं विधेयं।
अन्यथा शिष्टविगर्हणालक्षणः प्रत्यवायः। एवं द्रव्यमात्राक्षेपपक्षे प्रतिनिधिमुपपाद्येदानीं पदपदार्थानामनंगीकरणोऽखंडवादिनोऽह
षणमाह॥ ॥ विशिष्टैव क्रिया येन वाक्यार्थः परिकल्प्यते। द्रव्याभावे प्रतिनिधेस्तस्य तस्मात्क्रियोदितः। येनाखंडवाक्यवादिना व्रीहिकारिका
यजतिक्रिया निरस्तावयवा वाक्यार्थः व्रीहिभिर्यजेतेत्यत्र वाक्यार्थ इत्युच्यते तेन द्रव्यस्य व्रीहिलक्षणस्याभावे यदा प्रतिनिधिसमाश्रयणेन तन्नि
र्वर्त्तनं कार्यं तदा व्रीहिभिर्यजेतेति व्रीहिकारणकयागलक्षणस्य वाक्यार्थस्य त्यागात्प्रतिनिधिना तन्निर्वर्त्तने नीवारैर्हि का यजति कर २
क्रियान्यैवानुष्ठिता भवतीति न क्रिया प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयत इति न्यायस्योपेक्षणाद्वोदितस्याकरणमेव स्यात्। अ

१६ यत्त्वया प्रतिनिधिर्नाम्नीयत इत्युच्यते। तन्नाम्ना मा भूत्। नित्यस्य तस्य दिनान्तरानुष्ठानस्य सप्रयोजनत्वादवश्यानुष्ठानीयः प्रतिनिधिरिति पदपदार्थाना
मभावे वाक्यस्यापि खंडरूपस्याप्युपगमे प्रतिनिध्यभावः इति चोद्ये पिकादिनियतपदप्रयोगो नोपपद्यत इत्यपाभिधातुमाह॥ विज्ञातार्थपदं यच्च तदर्थ
प्रतिपादितो पिकादि यद्विज्ञातं तत्किमित्यनुपयुक्तो वा नास्तिक म्लानीयता मिथ्यैव नादानीयता मिति पदद्वयं विज्ञातार्थं तदर्थं चावगते। कोऽपि
कश्चित्कस्यचिन्नागरिकस्य म्लेच्छो नोपपद्यते। किलावनादिता अद्य खंडमेव निरस्तपदप्रविभागं वाक्यमनेकशमेव वाचकं वैयाकरणस्य मतो। अतः
किं पिकपदार्थः पृथग्विज्ञातः कश्चिद्यस्मात्तु इ विज्ञातं पिकपदार्थानुयोगो नोपपद्यते। अस्ति च तदर्थकस्य चित्तं देह इति पृथग्गे वार्थवंति
पदानि विज्ञातानि वाक्यमित्येवमवक्तुं युक्तमिति। इदानीं श्रुतिवाक्ययोर्विरोधे श्रुतिरेव बलीयसीति न्यायो न स्यादिति प्रदर्शयितुमाह॥ सामर्थ्य
मापि तं यच्च व्यक्तार्थमनुपश्यतो। श्रुतिर्वानुषंगे सा बाधिका लिंगवाक्ययोः। इह श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यालक्षणाः संदिग्ध
वाक्यार्थविचारे वाक्यविदां प्रसिद्धाः। तेषां च परस्परविरोधे पूर्वः पूर्वो बलीयानिति व्यवस्थाप्यते। तत्र श्रुवेणैच्छागमालभेतेत्यत्रालभनक्रिय
यायो द्रव्यस्य संबंधः सद्वितीयाश्रुत्या साक्षात्प्रतिपादितः। गुणस्य तु तस्यामानाधिकरण्याद्वाक्यीयः। निर्गुणस्य हि द्रव्यस्याभावाद्गुणस्य
च निरधिकरणस्यासंभवाद्वाक्यीय आश्रयाश्रयिणोः संबंधः। तदुच्यते। आश्रयाश्रयिणोर्वाक्यान्नियमस्त्वेव तिष्ठत इति। यदा तु द्रव्य एम०
१६

गुणयोर्द्वयोरप्यालंभनं क्रियया साक्षात्संबंधः स्याद्द्रव्यस्य तु क्रियया योऽभिसंबंधः स श्रुतिप्रापितत्वयोरिति तत्र श्रुत्वेतराभावेऽन्यगुणस्य छागस्यालंभन
मनुष्ठीयेत। छागाभावे च श्वेतगुणयुक्तस्य मेषस्याप्यालंभनमिति प्रतिनिधिसमाश्रयणे न श्रुतिबाधः। वक्ष्यति चात्र द्रव्यगुणाभावे प्रसेके
स्याद्विकल्पनं। श्रुतिपाशो हि संबंधो बलवान्वाक्यलक्षणादिति। यदि च वाक्कीयः संबंधो बलवान्स्यात्तदान्यतराभावे नालंभनमनुष्ठीयेतेति वि
धर्यैः श्रुतिः। अतः श्रौतस्यैव संबंधस्य वाक्याद्बलीयस्त्वादन्यतराभावेऽपि श्रुतिप्रापितमालंभनमनुष्ठितमिति न कश्चिच्छ्रुतिबाधः। तदेतन्मू
तिपादयितुमुक्तं। सामर्थ्यप्रापितमित्यादि। निर्गुणस्य द्रव्यस्याभावाच्छ्वेतगुणयुक्तस्यालंभनं क्रियासामर्थ्यप्रापितं श्रौतमेव व्यक्तार्थस्फुटीकरणाय श्वे
तमालभेतेति श्वेतादियत्नसंबध्यते। ततः किमित्याह। श्रुतिरित्यादि। तेन श्रुत्या साक्षाद्द्रव्यगुणयोः श्रुतावनुषंगोऽभिसंबंधः श्रुतिरेव तत्र लिंगवाक्ययोर्बाधि
केति न वाक्कीयसंबंधस्तत्र भवति। श्रौतवाक्ययोर्भेदमुपदर्शयितुमाह॥ अमायासोऽयमस्य श्रुत्यादिसन्निधानेन गम्यते। स यत्नप्रापितो वाक्ये श्रुतिध
र्मविलक्षणः। छागमालभेतेस च द्रव्यस्यैव साक्षात्संबंधः शुक्लादिगुणस्य तु सन्निधानवशाद्वाक्कीयोऽयत्नप्रतिपाद्यः स वाक्ये यत्नादवगतः श्रुति
धर्मविलक्षणः साक्षात्संबंधविलक्षण इति व्यक्तोऽयं। इदानीं प्रकृते योजयितुमाह॥ अभिन्नमेव वाक्यं तु यद्यभिन्नार्थमिष्यते। तत्सर्वं श्रुतिभूतं वान्य
श्रुत्यैव विरोधस्य तौ। यदि पुनरभिन्नमखंडमेव निर [illegible] स्तपदविभागं वाक्यमभिन्नार्थं श्वेतगुणविशिष्टछागालंभनरूपक एवानानार्थं यस्य तत्त

१७ 17 प्याभ्नतमभ्युपगम्यते। नदाकुत्रायं प्रविभागो यंऽस्यो नेयं वाक्कीय इति तत्र श्च सर्वस्य श्रोतत्वात्केन कस्य बाध इति न श्वे न गुणभावे छागालंभनेन छागाभा
वे च श्वेतगुणयुक्तस्यान्यस्य स्यादिति श्वेतं छागमालभेतेत्यत्रान्यतराभावे आलंभनानुपपत्तेर्विधिर्यस्य संकोच इति। अवांतरवाक्यार्थानुपपत्तिम
प्यत्रोपदर्शयितुमाह॥ वाक्यानां समुदायश्चेत्यएकार्थप्रसिद्धये। साकांक्षावयवत्वं च वाक्यार्थोपि न विघ्नते एकस्य मुख्यार्थस्य प्रसिद्धये प्रतीतये योयम
वांतरवाक्यानां समुदायः साकांक्षावयवः साकांक्षा अवयवा यस्मिन्समुदाये स तथाभूतो भिन्ना नामिदेवदत्त कश्मीरेषु वन्स्यामइत्याद्यात्मकोऽत्राव
यवार्थो वांतरवाक्यार्थात्मको न विघ्नते कश्चित्तावता नत्स्युगपत्सकलशास्त्रसंग्रहणं प्रतिपादनं वाऽसंभवीति सकलव्यवहारोच्छेदः॥ किंचासीप
दार्थोपनिबंधनावाक्येषु न्यायाः सकलशास्त्रीयलौकिकव्यवहारनिबंधनभूताः पदपदार्थानंगीकरणेन प्रकल्पितं नइत्याह॥ ॥ प्रासंगिकमिदं
कार्यमिदं तु चेत्तलभ्यते इदमाह। त्रिभेदाभ्यामत्रबाधासमुच्चयौ। कुतोस्मिन्विषयेन्याय्यः संबंधोस्यानुबाध्यते। सामान्यस्यातिदेशोयं विशेषोत्रा
तिदिश्यते। अर्थित्वमत्र सामर्थ्यमस्मिन्न्यायेनुभिद्यते। शास्त्रात्प्राप्ताधिकारोयं कुत्रासौ स्यात्क्रियांतरे। इयं श्रुत्याक्रमप्राप्तिरियमुच्चारणादि
भिः। क्रमोयमत्र बलवान्नास्मिंस्तु न विवक्षितं। इदं प्रयोगे संबद्धमंगानामप्रयोजकं। प्रयोजकमिदं तेषामत्रेदं नांतरीयकं। इदं प्रधानं शेषोयं वि
नियोगक्रमलक्षणं। साक्षाद्रस्योपकारीदमिदमारादिहोपकं। शक्तिव्यापारभेदोस्मिन्फलमत्रानुभिद्यते। संबंधाज्ज्ञातभेदोयंभेदस्तत्राविवक्षितः॥ [redacted]

एतैश्च निर्णीतैर्वाक्यगोचरोर्थस्तात्पर्यावलम्बनेन निर्णीयत इत्येतानि मीमांसकैर्लक्षणानीत्युच्यन्ते। तत्र षड्द्वादशचतुर्विंशतिभिर्वैतानि लक्षणानि
तावदिहप्रदर्श्यन्ते। एतेषां च वितत्य सोपपत्तिकं प्रतिदर्शनं स्वरूपं पदकांडे लक्षणसमुद्देशे विनिर्दिष्टमिति ग्रंथकृतैव लघुतन्त्रे प्रतिपादितं। आग
मभ्रंशाल्लेखकप्रमादादिना वा लक्षणसमुद्देशश्च पदकांडमध्ये न प्रसिद्धः। तत्र तावत् द्वादशलक्षणानि द्वादशस्वध्यायेषु सप्रपंचं प्रासंगिक
विचारसहितानि निर्णीतानि। तत्र प्रथमे चाध्याये धर्मजिज्ञासेत्युपक्रमात् को धर्मः किंलक्षणश्चेत्याद्याशंकानिरासार्थं चोदनालक्षण इत्यु
क्त्वा प्रथमेनाध्यायेन चोदनालक्षणो निर्णीतो। चोदनैव प्रमाणमित्युक्त्वा मतभेदेनापि विधिनियोगेत्यादिकात्म्यप्रचात्पाः संज्ञा उपवर्णि
ताः। तत्रैव च स्वतः प्रामाण्यं चाव्यवस्थापितं। तदनुरोधेन च प्रत्यक्षादीनामपि स्वत एव प्रामाण्यमुपपादितं। चोदनाचशब्दादिवैचित्र्याद्भिन्न
रूपेति भेदप्रतिपादनायास्या एव द्वितीयोध्यायः। भिन्नस्य च शेषशेषिभावेन विनियोगप्रतिपादनाय तृतीयोऽध्यायः। विनियुक्तस्य प्रयोज
कप्रयोजकभावप्रतिपादनाय चतुर्थः। श्रुतस्वारणादिभिः क्रमेण विनियोग इति तदर्थं पंचमः। एतत्समग्रं यदर्थं प्रसावर्थी समर्थः शा
स्त्रेणापि दृष्टोऽधिकारीति तत्प्रतिपादनाय षष्ठः। इति विविधभेदशेषशेषिभावप्रयुक्तिक्रमाधिकारिणां प्रतिपादनायाध्यायाः षडिति
षड्लक्षणानि। तत्र प्रकृतिषट्कमुपदेशषट्कमिति चोच्यते। तदनन्तरमनुक्तेतिकर्तव्यताकमपि कर्मान्यतो विध्यंतमाप्नोति सामान्यातिदे

१८

शादितिप्रतिशब्दनाप्यसप्तम ॥ कश्चित्सामर्थ्याद्विशेषा एवातिदिश्यंत इति निरूपणायाष्टम ॥ अतिदेशश्च सप्तमे त्वेष्म कृतिरेव नाविकृतियाग
द्देवताले न विपरीणामयितव्येत्यादिसमर्थनाय नवमः ॥ सामान्यस्य विशेषेण बाधाभिधानाय दशम ॥ येन सकृदनुष्ठानाद्बहुप्रयसिद्धिस्तत्तंत्रेनदर्थ
मेकादशः ॥ यदन्यदर्थमारब्धमन्यदप्येकेनैव प्रयत्नेन संभवलाघवाप्यांनिष्पाद्यति तत्प्रासंगिकोत्तरूपे द्वादशोध्याय इत्यनेनातिदेशषट्कं
न सह द्वादशलक्षणानि ॥ एतेन प्रतिपक्षप्रतान्यन्यानि द्वादशयथायोगमेतेष्वेवाध्यायेषु दर्शितानि ॥ तत्र प्रमाणस्य प्रतिपक्षासंभव ॥ नह्यप्र
माणं प्रमाणस्याने ॥ नैपुण्याभिमतसंपत्तिर्भवतिभेदस्यानुशास्त्रादिभेदभिन्नस्यान दृभेदादभेदः प्रतिपक्षः ॥ तत्र भेदस्य स्वरूपं निर्दिष्टं शक्तिव्या
पारभेदोस्मिन् फलमप्यनुमिद्यते ॥ संबंधाज्ज्ञानभेदो यामितिभेदस्त्वाविवक्षित इति तत्प्रतिपक्षः ॥ तथा शेषशेषिभावस्य गुणप्रधानभावावि
वक्षा प्रतिपक्षः ॥ सामनीयमानत्वादत्रनोक्ता ॥ तत्र शेषशेषिभावस्येदं प्रधानं शेषो यमिति स्वरूपकथनं ॥ विनियोगक्रमस्त्वयं ॥ साक्षादस्योप
कारीदमिदमाराद्विशेषकमित्यस्येवेतिकर्तव्यताया ॥ प्रभेदस्य च तिर्देश ॥ प्रयुक्तेरप्रयोजक ॥ प्रतिपक्षः ॥ तत्रेदं परांगैः संबद्धमंगानाम प्रयोज
कमित्यनेनैकफलतया प्रयोजकाप्रयोजकप्रदर्शनं कृतं ॥ प्रयोजकमिदं तेषामत्रेदं नांतरीयकमित्यनेन न फलभेदेन प्रयोजकाप्रयोजकोप
न्यास ॥ तदेवं प्रयुक्तौ द्विभेदाया ॥ सापवादाया ॥ स्वरूपं निर्दिष्टमनेन श्लोकेनेति विज्ञेयो ॥ क्रमस्याविवक्षा प्रतिपक्षः ॥ अस्य पंक्तिः साक्रम ॥१०

१८

प्रतिपक्षः ॥ २

प्राप्तिरियमुच्चारणादिभिरिति स्वरूपं। क्रमोयमत्र बलवानस्मिंश्च न विवक्षित इति प्रतिपक्षः। अधिकारिणः स्वरूपापवादो शास्त्रात्मा शास्त्राधिकारोयं
मुदासो स्वक्रियांतर इति कृतो। सामान्यातिदेशविशेषातिदेशयोस्त्वपवादविरहितेन स्वरूपं निर्दिष्टं। सामान्यस्यातिदेशो यं विशेषोत्रातिदिश्यत इ
ति। ऊहस्य संबंधाबाधोपवादः। अस्योहोस्मिन्विषये न्याय्य इति स्वरूपं। संबंधास्य न बाध्यत इत्यपवादः। तुल्यबलानामविरोधात्समुच्चयो बाध
स्यापवादः। तुल्यबलानामचरितार्थानां विरोधाद्विकल्पोपि बाधस्यापवादत्वेन दर्शितः। अत्र बाधासमुच्चयाविति बाधस्य स्वरूपमपवादश्चो
क्तः। तेत्र स्याप्यावृत्तिः प्रतिपक्षः। न स्य इदं तेत्रेणालभ्यत इति स्वरूपं। इदमावृत्तिभेदाभ्यामित्यनेन तत्रस्यावृत्तिः प्रतिपक्ष उक्तः। एकमप्यत्व
निर्वर्त्यमपीच्छावशाद्भेदेनेच्छतीति प्रासंगिकस्यापवादो भेदः। तत्र प्रासंगिकमिदं कार्यमिति प्रासंगिकस्वरूपनिर्देशः। आवृत्तिभेदाभ्यामित्य
स्माद्भेदः प्रासंगिकस्यापवादो योजनीयः। यच्चापि परेषां चोदनैव प्रमाणमिति प्रसिद्धं तथापीह टीकाकारो न्यायमात्रस्य प्रमाणत्वमंगीकरो
ति। अतः प्रकृतशास्त्रव्याख्योपयोगितत्तन्न्यायजातं प्रमत्ताप्रतिषेधोयमित्यादिना प्रदर्शयति। अत एव चोदनायामेव प्रमाणत्वस्याभा
वान्न्यायप्रमेव लक्षणनिदर्शनेन कृतो। सामान्येन वा कथम्प्राणां प्रासंगिकादीनां सापवादानामत्र निर्देशः कृत इत्यभिप्रायः। एतदुक्तं भव
ति। पदपदार्थव्यवस्थापनाप्रस्तावे योयः कश्चित्तद्व्यवस्थापने न्यायः प्रभवति स सकीर्तनीयः। न ह्यत्र चोदनायाः कीदृशं प्राधान्यं प्राधान्यं वा॥

१६ तं च प्रसंगो तु प्रत्येकं तावचिन्तितं तत्र सर्वत्रैव परस्परार्थविधानमिति मम बुद्ध्यैव विकल्प्य आरभ्यते अत्र स्वैरमादिभिः सह द्वाविंशतिर्लक्षणानि भवेयुरिति द्वेल
19 क्षणो समुद्देशात् द्रष्टव्यौ अथवा सामान्यातिदेशस्य तदभाव एवापवादः विशेषातिदेशस्य सामान्यातिदेश एव विशेषान्तरातिदेशो वेत्यनयोः सम
तिपक्षत्वमाश्रित्य चतुर्विंशतिः संपद्यन्त इत्येवमनेन क्रमेणैतानि लक्षणानि । एतदेव मनसिकृत्य षड् द्वादश चतुर्विंशतिर्वा लक्षणानीत्युक्तो
अथैषां निदर्शनार्थं लेशतः स्वरूपसहितान्युदाहरणानि टीकाकारेण प्रदर्शितानि । तत्र द्वयोरर्थिनोः कार्येण संभवि नाम प्रयोजकत्वेन निर्दि
न सामर्थ्यायोर्यत्रान्यतरस्य मुक्तेनार्थेनापरो भिसंबध्यमानः कृतार्थत्वान्पृथक्प्रयोजकत्वेनोपैति स प्रसंगः । तत्प्रयोजनकं प्रासंगिकं तत्
यथा । संघातोध्ययनो तत्र हि किंचिदेव शिष्यमुद्दिश्य प्रवृत्तेध्यापनेभेदेनाध्यापनान्तरस्याप्रयोजनेन समर्थतरात् अध्येतारः स्वतः एवार्थित्वेऽप्य
गध्यापने संभवाल्लाघवाच्चन प्रवर्तयन्ति । अपि वेके नैव मन्त्रेण तत्तदनुतिष्ठन्तीति वेदे यथा । अग्नीषोमीयस्यैव पशु यागस्य चर्ययाग्नीषोमीयं पशु
पुरोडाशमेकादशकपालं निर्वपन्ति । अत्र चाग्नीषोमीयपशुवद्यथा प्रयाजानुयाजविधानं प्रसंगात् अग्नीषोमीयं पशुपुरोडाशमप्युपकरोति
॥ शाब्दानुशासने पि यथा । सर्वादीनि सर्वनामानीत्यत्र गणत्वाभावं प्रासंगिकमुदाहरन्ति तत्र हि संज्ञासंज्ञि संबंधविधानपरो वाक्ये रूपविशे
षमात्रादृष्टतया लाघवादुभयसाधनत्वे विज्ञायते । शब्दो हस्य स्वरूपस्य निर्दिष्टः अन्यथा गणत्वप्रतिषेधो वक्तुमिति एके नैव प्रयत्नेनोभयमत्र वर्त्त
१६

तइति। अथ तन्त्रोपचार्थिनः सर्वप्रयोजकाभेदेनावृत्त्याचार्योर्थः प्रतिपन्नव्यक्तमर्थमेकमेव सम्भवाल्लाघवात्त्वप्रयोजयेति। तन्त्रे। तद्यथा। शा
लायामेकप्रदीपं व्याकरणाध्यायिनः प्रयोजयेति। वेदे यथा। प्रधानभूतायेषड्यागा आग्नेयाद्यस्तदर्थप्रयाजाद्यः ते पूर्वपश्चाद्वाहृताः स
र्वेषां तन्त्रेण साधारणोपकारकाभवन्तीत्युच्यते। शास्त्रे यथा। भिन्नार्थयोस्तपरशब्दयोस्तपरस्तत्कालस्येति तन्त्रेण। तत्र उपादाने क्रियत
इति। एवं च तन्त्रतन्त्रलक्षणेऽप्यपि तन्त्रलक्षणं प्रभवसेवेति विज्ञेयं। तद्यथा। सख्यासंज्ञायां रूपविशेषानुरोधात्प्रदेशेषु तन्त्रेणावृत्त्युगपद्दृश्यमतिपन्निरि
ति। अथावृत्तिभेदयोस्तन्त्रप्रसंगप्रतियोगिनोर्निदर्शनमुच्यते। आवृत्तौ तावत्तन्त्रप्रतिपक्षभूतायां निदर्शनं। यथा एकं वस्त्रमाभरणं वारणभूमि
षु भटानामुपयोगाय कल्पतइति। वेदे यथा सप्तदशसामिधेन्योभवन्तीति। अत्रैकशब्ददर्शने सामिधेनीषु सप्तदशत्वमावृत्तिसंख्यानात्प्र
कल्प्यते। यदुच्यते। त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेति। व्याकरणे यथा। संप्रसारणसंज्ञायां ज्ञापकपक्षानाश्रयणेन वर्णवाक्यविषययाआ
वृत्त्या कृत्स्नस्य भिन्नप्रतीयमानोपस्कारापत्तिराख्यायते। यथा चैकशब्ददर्शने एकानेकानेकग्रहणेषु वावृत्तिसंख्यानादिति परिहार उच्यते॥
भेदस्य तन्त्रप्रतियोगिनो निदर्शनं। यथा भिन्नानि पात्राणि सह भुञ्जानां भुञ्जिक्रियायां भेदेनाधिकरणभावं प्रतिपद्यन्ते। वैदिकेऽपि विषये यथा ग्रहं
संमार्ष्टीत्यत्र यः संमार्गो ग्रहविषये चोदितः सभेदेनैव व्यवतिष्ठत इति। शास्त्रे यथा। न वेति विभाषेत्यस्मिन्योगे प्रत्याख्याते उभयत्र विभाषा

णा क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेनेति विभक्तानां विभक्तार्थस्त्रिणभ्यीयत इति। अथ बाधानिदर्शनं क्रियते। अर्थित्वात्सामान्योपदेशाद्वा सति
प्रवृत्तिसंभवे दृष्टादृष्टार्थमास्यनुमानमात्रेयत्तत्ताबाधा। यथार्थित्वात्सर्वत्रैव मांसमांसेन भक्षणे। अभक्ष्यो ग्राम्यकुक्कुट इति ग्राम्यकुक्कुटभक्षणे प्र
वृत्तिघातार्थमर्थित्वात्प्राप्तमनेन बाध्यत इति वैदिकमुदाहरणं। लौकिकं यथा। ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र दधिदानमौत्स
र्गिकं तक्रदानेन विशिष्टविषयेण बाध्यत इति। शास्त्रे यथा कर्मण्यणित्यस्यातोऽनुपसर्गे क इति कप्रत्ययेन बाधेति। एषा च टीकाकृता स्वकृतौ सा
चतुष्टयबलेषु सत्संभवादिसाहित्येन बहुप्रकारा दर्शिता। न चेयमत्रापि प्रकारा एतामस्माभिर्नापि न तद्दर्शिता। यस्मात्तु त्रयोदशेयमपरिमाणा विकल्पाबाधाविस्त
रेण बाधासमुद्देशे समर्थयिष्यत इति। अथ समुच्चयः तुल्यबलानामविरोधिनां समुच्चयः। तद्यथा वेदवदन्नं भोजयत्सवर्णानं सर्पिषा शाकेनेति वेदेपि॥
ब्राह्मणेभ्यः पाद्यमाचमनं च दीयतामिति। शास्त्रेप्यविरोधात्फलभेदाच्च प्रत्ययकृत्तत्कृत्समसंज्ञाः प्रत्ययतद्धितनञ्जसंज्ञाश्चैकत्र समुच्चीयन्त इ
ति। विकल्पोपि बाधासमतियोगी। स च तुल्यप्रमाणविशिष्टानां विरुद्धानां भवति। वेदे यथा। व्रीहिभिर्यजेत यवैर्यजेतेति। लोके दधि तक्रं कौण्डि
न्याय दीयतामित्येकफलं दधितक्रदानं चोदने। शास्त्रेपि एवं तृचाविस्मादि। विधिप्रतिषेधयोरपि तुल्यबलत्वे विरोधाद्विकल्पो भवत्येव। यथा वेदे
षोडशिनं गृह्णाति न गृह्णातीति। लौकिकेपि किंचिद्दस्य दीयतां न दीयतामिति। शास्त्रेपि वा ग्रहणानर्थको विधिनिषेधसामर्थ्याद्विभयोः

सिद्धत्वादिति। यथा प्रदर्शितं त्वष्टृनप्तोः टीकाकारेण। विधिप्रतिषेधयोः खल्वपि तुल्यबलत्वे विरोधाद्विप्रतिषेधमाह।। नासिकादिभ्यो विभाषायाः
२ सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन। अयं विधिः सप्रतिषेधः विधिप्रतिषेधयोर्न्याय्युक्तो विप्रतिषेधः। अयमपि विधिर्नस्ह नामि
वकार्पिसानां कृतः प्रतिषेधविषय एवारभ्यते। सम्यथैवबद्ध ल्लक्षणं संयोगोपधलक्षणं च बाधते एवं विद्यमान पूर्वलक्षणमपि। तत्रपुर
स्त्वान्यथेपवादात् इति बाधकत्वे प्रतिषिद्धे विप्रतिषेधाद्बाधव्यवस्था प्राप्त इति। ऊहः खल्वपि प्रकृतौ समर्थानां विकारे सामर्थ्याभावान्न कृति
रूपलिंगवचनान्तरोपादानेन क्रियते। तद्यथा। प्रकृतौ अग्नये त्वा अग्निशब्दः समर्थोऽग्नौ यो दृष्टः। तत्र विकारे सूर्याय त्वा ऊहः।। इत्येवमादिना निमि
त्तभेदेन बहुभेदो भवत्यूह इति वैदिकप्रदाहरणं लोकेपि यथा देवदत्तस्योच्चानि गृहाणि। आद्योवैषवेयइत्तत्र षष्ठ्यं नमपोह्य निमित्तवशान्यथ
मानं ऊह्यते। व्याकरणेपि ऊहविषयत्वमापन्नाः सर्वे विभक्तिविपरिणामाः। तेषु हि योगान्तरे यथा विभक्त्या संबद्धाः शब्दा उपलब्धास्तत्संबंधसागे
नैव विभक्त्यंतरयोगं सम्प्रतिपद्यते। तद्यथा। उपदेशे ऽजनुनासिक इत्। इत्तो लोपः। भ्वादयो धातवः। धातोः अनुदात्तेतो ङितः आत्मनेपदमिति। अ
योह प्रतिपक्षप्राप्तं संबंधाबाधनमपि निदर्श्यते। यथा देवदत्तस्योच्चानि गृहाणि युक्तेनात्यभिजानस्येति। अत्र यद्विभक्त्यन्तस्येवस्यांति। तथा
वाक्यान्तरेप्यभिसंबंध इति। तद्यथा वदरीसूक्ष्मकंटकामधुराद्वृक्षः। पंचाला जनपद इत्येवमादिषु संबंधाबाधनं भवतीसाक्षु। वेदेपि यथा यजमानं

२१ दृंडे नदीक्षयति। अद्भिर्दीक्षयति। मेखलया दीक्षयतीत्यत्र यजमानमित्यध्याहृतमेव संबध्यते। शास्त्रेपि वृद्धगणवत्तुल्यसंख्येति योगे विधीयमानं संबं
21 धस्य स्वरूपपदार्थकस्य संख्याशब्दस्यापूर्तस्य योगो नो संज्ञिविशेषणत्वे विज्ञायते। स्योना संख्या षट्संज्ञा भवतीति। अथातिदेशनिर्देशः क्रियते। अन्य
त्रान्यधर्मपरिप्रापणमतिदेशः। तस्य च द्वैप्रकारो। सामान्यातिदेशो विशेषातिदेशश्चेति। सामान्यातिदेशो यथा। अन्यत्ररूढं सर्वं धर्मानि त्वीतमेदेव
र्थेषु प्रसिद्धेष्वनुमेयमेदस्तमेवैः संबंधिभिर्व्यपदिश्यते। तद्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्यमिति। अयावानर्थो ब्राह्मणशब्देनव्यभिचारि
ना वस्तुर्थ्यानि संबद्धानि कार्याणि तान्यसंतमलब्ध्वा ब्राह्मणव्यपदेशः क्षत्रिये तिदिश्यन्ते। तथा गुरुवद्गुरुपुत्रे वर्त्तितव्यमिति। वेदे यथा। दर्श
पूर्णमासवदन्येष्वपि यागेषु प्रचरितव्यमिति। शास्त्रेपि। स्थानिवदादेशो नल्विधाविति। अथ विशेषातिदेशः। सति सामान्यकार्येषु ब्राह्मणा निर्वातिदेशेषु सामान्ये व्यपि यागेषु प्रवर्तितव्यमिति ह
दिषु पुनरातिदेश सामर्थ्याद्धि शिष्टप्रकृतिगतकार्यातिदेशः। ब्राह्मणवदस्मिन् ब्राह्मणो ष वर्त्तितव्यमिति। अत्र ये ब्राह्मणो ब्राह्मणवदेव वर्त्ते
ते तान्यस्य यमेवेमूलोऽतिदेशो विज्ञायते। येषां तु बुद्धसंभेदान्त्र संज्ञाद्वाव्यतिकरः तेषु नियम एव क्रियते। उक्तं च। सामान्यमात्रं शब्दार्थो वि
शेषाव्यभिचारिणः। सामर्थ्यमंतरेणातो विशेषो नातिदिश्यते इति। तत्र वेदे यथा। आग्नेयवत्सौर्यं इत्यत्रैकदेवताकस्यैकदेवताकसंबंधेव
विध्यंतरं इति विध्यंतरं इति कर्त्तव्यतोच्यते। शास्त्रे रूपातिदेशादिभिः षड्भिः प्रकारैर्विशेषातिदेशः परिहृश्यते। तत्र रूपातिदेशो यथा। द्विर्वचने
२१

वीसत्रं हि धातुल्यमेवादेशस्यातिदिश्यते। ततश्च श्यपाक्रिसादीनामेव द्विर्वचनं भवति। यथाऽस्य सतु श्वक तुरिति।। नैमित्तातिदेशो यथा। पूर्ववत्
त्सन इति। अत्र पूर्वस्य यन्निमित्तं आत्मनेपदे ऽकारादि तदेव सनंतस्यातिदिश्यत इति। तादात्म्यातिदेशो यथा। सवा मैत्रे तेपरोगवत्स्वर
इति। अत्र सर्वेन मामे चित स्य मत्वां स्नूरकवत्ता तादात्म्यमापद्यते तत्त्वं लभत इति।। शास्त्रातिदेशः कार्यातिदेशो वा यथा। कर्मवत्कर्मणा तुल्य
क्रिय इति। अत्र हि शास्त्रातिदेशे यकः शपा बाधनं स्यादिति यग्विधौ कर्मकर्तुरुपसंख्यानमारभ्यते। विप्रतिषेधाद्धि शपो बलीयस्त्वमि
ति। कार्यातिदेशे तु कर्मवत्कर्मणोऽन्यते नैव यग्विधीयत इति यक एव परत्वात्स्य स्य शपा बाधेति नोपसंख्यानारंभः। व्यपदेशातिदे
शस्तु व्याकरणे नैव संभवति। संज्ञापक्षादविशेषाद्दृष्टकारणत्वेऽपि फलस्य प्रसंगाच्चेति।। अथाधिकारस्य निदर्शनं। अर्थित्वं सामर्थ्यं शास्त्रा
पर्युदासयोगित्वमधिकारः। सविघ्नेयस्यासावधिकारी। अर्थित्वमधिकारकारणं। परं हि पुरुषार्थमत्रापवर्गमाचक्षते। अस्मादप्य
र्थी प्रमाद्यति कश्चिदिति सत्येवार्थित्वे सामर्थ्यमधिकारकारणम्। उसत्रापां अपि ह्याभिनयनदृष्टक्षायामन्धो दर्शने नाधिक्रियते।।
अर्थिनः खल्वपि सामर्थ्याभावः केषुचित्कर्मसु शास्त्रेण पर्युदासात्। यथा शूद्रास्त्र्यग्न्यो नाधिक्रियते। अदृष्टार्थविशेषे हि सामर्थ्या
सामर्थ्यं शास्त्रादेव समधिगम्यते। तस्मात्प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षते। तत्र लोके यथा। अग्रयमजित्वमत्र ग्रामे नग

२२
22

रेवाधिकृत इति । तज्ज्ञानियुक्तो । वेदे यथाग्निहोत्रं जुहुयात्स्वर्गकामो ब्राह्मण इत्यत्र ब्राह्मणस्यार्थित्वादिभिरधिकार इति । शास्त्रस्य तु शब्दार्थ
पुरुषधर्मेष्वधिकारः । तत्र योद्धा शब्दः साधुरसाधुश्च । साधुरपि शास्त्रीयः प्रायोगिकश्च । शास्त्रीयोऽपि त्रेधा प्रतिपाद्यः प्रतिपादक उभयरूपश्च ॥
तत्र प्रतिपाद्यो यथा दोषत्वादिर्निपात्यमानः । प्रतिपादको यथा । प्रकृतिप्रत्ययादिः । तेन हि कुंभकारादिः प्रयोगस्थः प्रतिपाद्यते । उभय
रूपो यथा । इत्यशब्दः । सहितत्वशब्देन प्रतिपाद्यते । प्रयोगस्थं च सहितत्वशब्दं प्रतिपादयति । प्रायोगिकश्च लौकिकवैदिकभेदेन
द्विधैव । एवमसाधुर्नाम सहयोद्धा शब्दः । तेषु मध्ये प्रतिपाद्येषु व्याकरणशास्त्रस्याधिकारः । न प्रकृत्यादिषु । न हि तेन व्याकरणेन त्वसाध्येन
इति । अर्थोष्टादशधा । तत्र वक्तृमात्रमभिधेयश्च । अभिधेयोऽपि द्विधा । शास्त्रीयो लौकिकश्च । पुनरपि विशिष्टावग्रहसंप्रत्यय
हेतुत्वद्विपरीतश्च । प्रमुखः परिकल्पितरूपविपर्यासश्च व्यपदेश्योऽव्यपदेश्यश्च सत्त्वभावमापन्नोऽसत्त्वभूतश्च । स्थिरलक्षणो
प्रतीयमानस्य ३ विवक्षाप्रापितसंनिधानश्च । अभिधीयमानः प्रतिपाद्यमानश्च । अभिसंहितो नान्तरीयकश्चेति । तत्र वक्तृमात्रेणास्यार्थो यो वक्तुं
प्रतिपादयितुं न समीहितः । यस्तु समीहितः सोऽभिधेयः । तत्रैव शब्दस्याधिकारः । स च द्विधा शास्त्रीयलौकिकभेदेन । तत्र शास्त्रीय
आचार्योद्धारिकः । लौकिकस्तु खंडः । लौकिके चार्थे शब्दस्याधिकारो न शास्त्रीये । शास्त्रीयो हि पौरुषेयः परिकल्पितः । एवमत्र यो एप्र०
२२

भ्रंतोपिशब्दःसाधुत्वस्यनिमित्तभावेनप्रतिपादकोविज्ञायते।अतएवतस्यव्यभिचारेप्यव्यभिचारएवस्मर्तॄणामासचानियतावधिबहुधाप्रविभज्यते
व्याख्यातृभिः।विशिष्टावग्रहसंप्रत्ययहेतुर्यथा।कंसंघातयतीतिवलिंबंधयतीति।अत्रहर्थेननयथाभ्रंतोऽपितुविशिष्टाकारेणैवसंप्रत्ययेनगोचरीकृ
तोव्यवहारविषयतामनुपनीतानांहिपरोतोयोवाहेरेवतभावव्यवस्थितः।यथागौःशुक्लइत्यादिमुख्योयथासास्नादिमान्गौरिति।परिकल्पितोनिमित्त
वशेनरूपविपर्यासोयस्यासौपरिकल्पितनिमित्तरूपविपर्यासोगौणोऽर्थउच्यते।यथागौर्वाहीकइति।व्यपदेश्यआवापोद्धारिकएवजातिर्वाद्रव्यंवेत्ये
वमुक्तइति।अव्यपदेश्यस्त्वखंडएववाक्यार्थलक्षणइति।सत्त्वभावमापन्नोव्यपदेश्यएवापोद्धारिकसंज्ञकः।असत्त्वभूतोवाकार्यलक्षणएवाउ
क्तिभेदादेवात्रमायशोभेदकथनं।स्थितलक्षणोयथा।राजपुरुषइत्यत्रराजसंबंधित्वंपुरुषस्यनह्निनव्यभिचरति।विवक्षाप्रापितसंनिधानोयथा।रा
ज्ञःपुरुषस्येति।अत्रहिसंबंधित्वंव्यभिचरति।विशेषणविशेष्ययोर्यथेष्टत्वात्।अभिधीयमानोयथा।राजसखइत्यत्रराज्ञःसखायमितस्योऽभिधीय
ते।तस्मिंस्त्वभिधीयमानेराज्ञःसखास्येत्ययमर्थःप्रतीयमानएव।अभिसंहितोयथा।गोशब्देजातिर्द्रव्यंवेति।नांतरीयकोयथा।तत्रैववर्णसंस्थाना
दिः।इत्येवमभिधेयभेदादुपदर्शनीयाः।पुरुषधर्मावकृतत्वप्रतिपत्त्यभ्यर्थः।तत्रवक्तृधर्माआबाधः।असत्यासम्प्रतिकोपक्रान्तमनभ्यसनादय
श्चेति।प्रतिपत्तृधर्माश्चकुतस्यमानत्वमभ्युपगतएवात्रशास्त्रस्यसप्तुतादिवचनादिविधायकत्वेनाधिकारइति।अत्रचयएवधर्माःशब्दानांशास्त्रस्य

२३ 23 वाऽनधिकारविषयत्वेनोक्तास्तेनैवापेक्ष्यो वा ते। यदा सोमक्रियायां तदा इति। अथ क्रमस्य निदर्शनाय इयं श्रुत्या क्रमस्याश्रियमुच्चारणादिभिरिति। श्रुत्यादि
भेदेनाऽयं क्रमो नैकप्रकारः। तद्यथा च श्रुतिक्रमोऽर्थक्रमः पाठक्रमः कांडक्रमः प्रवृत्तिक्रमः प्रतिपत्तिक्रमः प्रयोगक्रमः बुद्धिक्रमश्चेति। तत्र श्रुतिक्रमो यथा।
स्नात्वा व्रजतीति। अत्र त्वाप्रत्ययेनैव श्रुत्या क्रम उक्तः। वेदे यथा। हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अत्र श्रुत्यैवाग्रेऽथशब्दाभ्यां क्रम उक्तः। शास्त्रेऽपि च प
रस्मैपदानां णलतुसित्यादौ यथासंख्यमनुदेशः समानामिति श्रुत्यैव क्रमः। अर्थः सामर्थ्यं तन्निमित्तः क्रमोऽर्थक्रमो यथा। भुक्त्वा स्नात्वा व्रजतीत्यत्र स्ना
नादीनामन्यथा शब्दोपात्तानामप्यर्थस्वरूपपर्यालोचनया ज्ञानादिक्रमो लक्ष्यते। वेदे यथा। अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र श्रपणस्य प
श्चाद्विनिर्दिष्टमपि पूर्वमनुष्ठीयते ततोऽग्निहोत्रमित्यर्थक्रमः। शास्त्रेऽपि गुणकर्मणि लादिविधिरित्युक्ते न पाहि गां दोग्धि पय इत्यत्र गवा कर्मणा पूर्वं
दुहेर्योगस्ततः पयसः। न ह्यनुपादाय गां कश्चित्पय आदातुमर्हति। तस्मादत्र गोपयसोर्दुहिना यः क्रमेण संबन्धः सोऽर्थसामर्थ्यादुपजायते। तस्मात्तस्य
पि प्रधाने पयसि दुहेर्गवैव पूर्वं संबन्ध इति तत्रैव लादयो नांगत्वाद्दुह्यते गौर्दुग्धा सुदोहा गौरिति। उच्चारणक्रम एव पाठक्रमो यथा। इंदुस्वर्णमातंग
पुंस्कोकिलकलापिनः। वक्रकांतीक्षणगतिस्वरकेशैस्त्वया जिताः। इत्यत्र यथापठितानां यथापठितैरेव संबन्ध इति। वेदे यथा। समिधो यजति तनूनपा
तं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येवमाम्नातेषु यथापाठमेव क्रमेणानुष्ठानं। शास्त्रे यथा। विप्रतिषेधे परं कार्यं पूर्वत्रासिद्ध स्म० २३

मिति च। अत्र हि शास्त्रपाठमेवापेक्ष्येदं सूत्रमिदं प्रमितिप्रवस्थाप्यते। काण्डक्रमो यथा। येनैव क्रमेण ब्राह्मणक्षत्रियविशां वर्णसमाचारप्रतिपादकानि प्रक
रणान्युद्दिष्टानि तेनैवाभिधीयन्त इति वेदेषु कुत्रचिद्यान्येकस्मिन् येनैव काण्डिकाक्रमेण कर्माणि चोद्यन्ते तेनैव क्रमेण प्रवर्त्तन्ते। यथा याज्यानुवाक्यानामा
ग्नेयादीनां च। अत्र येनैव क्रमेण याज्यानुवाक्यानां संनिवेशः तेनैव क्रमेणाग्नेयादीनां सन्निवेशात् काण्डक्रमेण संबन्धः शास्त्रे यथा। द्विर्वचनकाण्ड
स्य प्रसारणकाण्डमिति। तद्देवविप्रतिषेधे स्यात् पूर्वं प्रवर्त्तते। मध्यप्रवृत्तिक्रमो यथा। येनैव क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदि
ते कार्ये प्रतिलभन्त इति वेदे यथा। सप्तदशप्राजापत्यांस्तूपरानालभेतेत्यत्र सप्तदशानां प्राजापत्यानां प्रोक्षणविशसनपर्यग्निकरणानि क्रमेण चोदि
तानि। अत्र तु प्रातः पुनरिच्छावशात् प्रवर्त्तमानस्य यत एवारम्भः पशोस्तेनानुष्ठानं तेषामाद्यस्यानुष्ठानमारब्धं तेनैव प्रवृत्तिक्रमेण पुनरपरयोरप्यनु
ष्ठानं विधत्त इति सोयं प्रतिपत्तुरिच्छावशात् प्रवृत्तः क्रमः प्रवृत्तिक्रम इत्युच्यते। शास्त्रे यथा। भाष्य उक्तं यथैवानुपूर्व्याऽर्थानां प्रादुर्भावः तथैव शब्दा
नामपि। यथा षड्भ्याम ह्युत्पत्ते प्रथमं लिङ्गसंबन्धात् स्त्रीप्रत्यय उत्पद्यते ततः कर्मसंख्यादिसंबन्धादेकवचनमुत्पद्यते। तथैव च परगादेशादिकार्यं तेनै
व क्रमेण प्रवर्त्तत इति। प्रतिपत्तिक्रमो यथा। लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यत्र यद्यपि प्रयोगे पूर्वमडागम उच्चार्यते तथापि वाक्ये विधिवाक्यार्थं प्रतिपद्यमा
नाल्लुङादीन् प्रतिपद्यामहे। पश्चादडागममिति शास्त्रीयमुदाहरणं। लोके यथा पुरुषो राजेत्युक्ते पूच्चारणक्रममतिक्रम्य राजार्थव्यवच्छेदेनैव पुरु

षस्य प्रतिपत्तिः। वेदे यथा प्रधानयागः पूर्वमुक्तः। अथ प्रवर्तनयागनिर्वर्त्तनानुसारेणैव प्रतिपत्तिमुपारोहन्ति। यथा दीक्षणीयादीनां सोमस्य च। अत्र हि सोम
यागस्य प्रधानस्य पूर्वं बुद्ध्युपारोहे पि दीक्षणीयादियागनिर्वर्त्तनपूर्वकमेव सोमप्रतिपत्तिः। प्रयोगक्रमस्तु यथा। उक्तानि सादीनि यथानुपूर्व्या अनुबंधाः
प्रयुक्तास्तथैवेत्तरेषां लभंतइति। शास्त्रीयमुदाहरणं। वेदे यथा। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र दर्शपूर्णमासयागपूर्वकमन्यानुष्ठानं विज्ञेयं। बुद्धि
क्रमो यथा। शास्त्रे वर्णानामिको यणाचीत्यादौ बुद्ध्या पौर्वापर्यकल्पनेन यथा चापौर्वापर्यमकालव्यपेतं संहितेनाचेत्पूर्वपराभावात् संहितस्य। एकवर्णवि
र्त्तित्वाद्धा च उच्चारितप्रध्वंसित्वाच्च वर्णानामित्याशंक्योक्तं भाष्यकारेण। बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तन्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ
कुर्यात्पौर्वापर्यमिति। शास्त्रे बुद्धिक्रमः। लोके विद्युतः क्रमेण प्रवृत्तौ बुद्धौ संकलयति। वेदे प्रयाजादौ नामुसन्त्वप्रध्वंसिनां बुद्ध्यैव संकलनमिति बोद्धः क्र
मः। सर्व एव वा बोद्धः क्रमो न वक्तव्यः समुत्थइति। यदाहुः प्रतिपत्तिक्रमो न वक्तव्यः समुत्थइति। अथ एषां क्रमाणां बलाबलचिंतां करोति। क्रमोपमत्रव
लवानिति। यथा वेदे प्रथमं भोजयितव्यस्ततोभ्यञ्जनमिति। अथ क्रमप्रतियोगिनं दर्शयितुमाह। अस्मिंस्तु न विवक्षित इति। क्रम इति प्रकृतो।
अविवक्षा क्रमस्य प्रतिपक्षः। न च यथा वेदेनुष्ठानादणोः क्रमाविवक्षानिमित्तवशाद्दृश्यते। लोके प्रतिपत्तृणामपि दृश्यते। शास्त्रे यथोक्तं वार्त्तिककृता॥
अतिप्रसंगो गुणात् वृद्धिप्रतिषेधे क्ङितीत्यादौ। अथ प्रयोजकाप्रयोजके निदर्शयति। इदं पारांगेः संबद्धमंगानां प्रयोजकं। अप्रयोजकमिदं तेषामत्रेदं नो
॥८२॥

नरीयकमितितन्त्रराजाख्य अन्थापायाः प्रयोजकः हत्त्यादयस्तदाधाराः अप्रयोजका अपि छत्र॥८३॥द्यपायासंबध्यमानाः प्रयोजका उच्यन्ते इह लोक
फलतया प्रयोजकाप्रयोजकभावः। फलभेदे पूर्वमुदाहरणमिति लोकवेदशास्त्रयोः पूर्वं हो। अथ शेषिविशेषो दर्शयितुमाह। इदं प्रधानं शेषाय
मिति। वेदे यथा व्रीहीनवहंतीति व्रीहयः शेषि अवघातः शेषस्तदर्थत्वात्। लोकशास्त्रयोः स्वयमुदाहरणं। अस्यैव शेषिशेषभावस्येतिकर्तव्यतो
प्रदर्शयितुमाह। विनियोगक्रमस्त्वमितितन्त्रे देवेगुणप्रधानभावस्य परिकरबंध सहितस्योपदर्शनं कृत्वा नत्वेवावान्तरभेदमाह। साक्षादस्योपकारि
दमिदमाराद्विशेषकमितितन्त्र। लोके साक्षादुपकारके यथा स्वान्नमन्त्यलंकारादि। आरात्तु देवपुत्रदारादिषु। शास्त्रेऽपि साक्षादुपकारके प्रत्यय
स्य प्रकृत्यादि। यत्तु प्रकृत्यादेर्विशेषणं तदारादुपकारकं यथा एरजि॥८४॥न्यादौ क्षिवसीनत्वादिधात्वोर्विशेषणं। कर्तृविशेषणं च यस्मादादौ इति। वेदेऽप्य
वघातादि दर्शपूर्णमासयोः साक्षादंगं प्रयाजादिकं त्वारादुपकारकं इत्येवं सप्रभेदं सपरिकरबंधं शेषशेषिभावमुपदर्श्य इदानीं भेदं प्रदर्शयितु
माह। शक्तिव्यापारभेदोऽस्मिन्निति। शक्तिव्यापारभेदाश्रयणेन बहुविधो भेदो लक्ष्यते। न च लोके वलाहकाद्विद्योतते। वलाहके विद्योतते व
लाहको विद्योतत इत्यत्र वलाहकस्यापादानाधिकरणकर्तृशक्तीनां भेदः। शास्त्रे चात्रैव विवक्षावशात् व्यापारभेद इत्येवं शक्तिव्यापार
भेदः। शक्तिभेदमात्रेण तु व्यापारभेदः यथा धनुषा विध्यतीति। अत्र हि गर्भीकृतापादानशक्तिः करणशक्तिर्विध्यत्यर्थभेदेन व्याप्रियते।

२५ नहन्तयानाष्ट्रितापादानशक्तिधनुषः कारणत्वेसंभवति। अतएवात्रसंज्ञयोर्विप्रतिषेधोवर्णितः। व्यापारभेदस्तुकुड्योनसंभवति। शक्तिभेदमंतरेण
25 व्यापारभेदस्यासंभवात्। अथफलभेदेनभेदमाह। फलमत्रतुमिष्टंतदिति। यथैकस्यदानस्यापुण्यारोग्यैश्वर्याणिभिन्नानिफलानि। अनेनला
पुण्यप्रभृतिषुसत्स्वपीतिविशेषमेवैकंफलमाह। तथावह्नीनांक्रियाणामेकंफलंपश्यव्यवहारदर्शनेप्रजानामेकोनिर्णयः। यथावक्ष्यति
भिन्नव्यापाररूपाणांव्यवहारादिदर्शनेकर्तॄणांदर्शनेभिन्नत्वेसंभवत्यार्थस्यसाधकमिति। प्रकारांतरेणापिभेदंदर्शयितुमाह। संबंधाज्ज्ञात
भेदोपमिति। यथाख्यातेषुधातूपात्तपाः। क्रियायाः प्रत्ययवाच्यकर्तृभेदेसतिक्रियाया अपिभेदः प्रतीयते। पचतः पचंतीति। यथोक्तेसाध
नभेदात्तिरुक्तफलाभावात्फलेभवतेवावबोधयितुंसाधनेभ्यः प्रसिद्धोसावितिा इदानींतस्यैवमतिपक्षभूतमभेदंदर्शयितुमाह। भेदस्त्व
त्राविवक्षितइति। अत्रशक्त्याभेदोयथा। समानकर्तृकयोरित्यत्रपक्षेोद्दनेभुंक्तइतिकर्तृकर्मणोः क्रियाभेदेनप्राप्तः शक्तिभेदोविवक्षानविव
क्षितः। तथाचसत्यत्रसमानकर्तृकत्वमुपपन्नंभवति। व्यापारभेदः प्रागेवदर्शितोधनुषाविध्यतीत्यत्र। फलाभेदोपिपूर्वमुक्तएव। यथादा
नस्यैकाप्रीतिः फलमितिकेचिदिति। संबंधाज्ज्ञातभेदत्वस्यप्रतिपक्षोपत्रनसंबंधभेदाज्ज्ञातभेदत्वं। यथाऽऽस्यतेदेवदत्तेनेमत्रभावेल
कारउत्पन्नः साधनभेदानुपादानात्क्रियाभेदमप्रतिगमयितुंनशक्नोति। देवदत्तेनेत्यस्मात्प्रतीतिरितिचेदेकपदार्थापेक्षयेनहुक्रमस्याभि पृ०
२५

रिस्म दोषः नन्दे वेश क्यादिभेदेन बहुविधोऽयं भेद इति लक्षः स्वयमेवोत्प्रेक्ष्यः। न यात नत्र प्रतिपक्षमन्तलाड्हद भेदोऽपि बहुविध एव विज्ञेयः। अनयोश्च भेदा
भेदयोः क्वचिद्धास्तवत्वं क्वचिद्विवक्षामात्रं शास्त्रात्तु विवक्षापि क्वचिल्लौकिकी। क्वचित्स्यायोक्ती सेनदप्यत्रानुसर्तव्यमिति वेदेपि भेदव्यवहारो दृश्य
तो यज्ञेनेदधाति जुहोती स्यादौ यागदाने होमरूपादनुबंधभेदाद पूर्वस्य भेदः। अभेदोऽपि यथा यस्मामप्याग्नेयादिषु त्रागान्नामेकस्मिन्नेवापूर्वे सा
ध्ये ऐकामिष्यतदिति। एवं षड्द्वादशचतुर्विंशतिस्थललक्षणानि माकृतानि वैकृतानि च समप्रतिपक्षाणि दर्शितानि। इदानीं षड्द्वादशचतुर्विंशति दू.४
यतिरिक्तास्त्वप्यमी बहुप्रकारान्न्यायाः पदार्थानिष्कृयहेतवः संतीति मोढवादिनया टीकाकारः प्रदर्शयितुमाह॥॥ प्रसज्यप्रतिषेधायं पर्युदासोः
यमत्रतु इदं गोत्रामिदं मुख्यं व्यापीदं गुरुलघुर्द्वभेदेनां गांगिभावो साबहुभेदं विकल्प्यते। इदं नियम्यते स्मात्रयोऽपत्त्वमुपजायते। असावा
कांतो हष्टालिङ्गाद्वेदोनुमीयते। अयं शब्दादयो हूसपदार्थः प्रविभज्यते इति वाक्येषु येधर्माः पदार्थोपनिबंधनाः सर्वेते नप्रकल्प्यन्तदं
चेत्स्याद्वाचकोऽतेत्र प्रसज्यप्रतिषेधोयमिति। यत्र क्रियापदेन नञः संबंधो वाक्यभेदश्च। शास्त्रे यथा। कर्त्तरि च कारक इति। वेदे यथा। ब्राह्म स्म ३
णोन हंतव्यः। नान्नतेवदेदित्यादि। लोके यथा। असूर्यपश्याराजदारा इति। पर्युदासो यमत्रत्विति। पर्युदासः खलु प्रसज्यप्रतिषेधविपरीतस्त
त्रत्याख्यातेन नैव नञः संबंधः एकवाक्यता चाउक्तेच। नामधात्वर्थयोगे नैव नञ् प्रतिषेधक इति। तत्र शास्त्रे यथा। आनोऽनुपसर्गे क इति॥

२६ 26 वेदे यथा। अत्र ब्राह्मणाः सोमविक्रयी इत्यत्र जातिमात्रानुगमेन ब्राह्मणसदृशस्य कस्यचिदेव प्रतिपत्तिः। यथा च नोद्घेनमादित्यमौ क्षेनेत्येवमादिस्मा
नैमुद्राहरणमह्रूरविप्रकर्षादत्र वैदिकमेव। लोके यथा। ब्राह्मणमानयेति। इदं गौणमिति। शास्त्रे यथा। तत्पुरुषः समानाधिकरण इति।
अत्रावयवानां समानाधिकरणत्वात्तत्पुरुषस्यापि समानाधिकरणत्वं। वेदे यथा। आदित्यो यूपः यजमानः प्रस्तर इति। अत्र गुणाद्याकचक्यादेर्यूपा
दिरूपादित्यादिरिष्यते। लोके च सिंहो माणवकः गंगायां घोष इत्यादिः इदं मुख्यमिति। अत्र शास्त्रे यथा। धातोः प्रातिपदिकादित्यादावभिधेयस्य मु
ख्यत्वं। वेदे यथा। यजमानोऽध्वर्युमन्वारभत इत्यत्राध्वर्युयजमानौ मुख्यावेव। लोके यथा। अग्नौ माणवक इति। व्यापीदमिति। शास्त्रे यथा। एकस्मि
न्दूरात्संबुद्धाविति न त्वाहि लौकिक्याः संबुद्धेर्ग्रहणं व्यापित्वान्नानद्ग्रहणे हि शास्त्रीयापि संबुद्धिः परिगृहीता भवति। वक्ष्यति चाविषये कृत्रिम
स्यापि लौकिकः क्वचिदुच्चारना। व्याप्नोति दूरात्संबुद्धौ न या च ग्रहणं द्वयोरिति। यावन्तश्चोभयानुग्रहस्तत्र सर्वमनुगतं व्यापित्वेनेति। वेदेऽपि स
ने३ र्वे प्रधानयागविषयाः ज्योतिष्टोमेनेत्याद्यधिकारविषयः। लोकेऽपि यथा कयाचिदिति कर्तव्यतया सन्निहितत्वमास्तिंधुस्नानं। यदुच्यते। उपोष्य र
जनीमेकां सन्निहत्यां नरोत्तमः। सोऽर्यतमसि गंगायां चान्द्रे चापि विमुच्यत इति। अत्र सकृदेव स्नानात्त्रैलोक्याभ्यन्तरगतसर्वतीर्थस्नानमि
तिव्याप्युदाहरणं प्रसंगादुक्तम्। गुरु लघ्विदमिति। तत्र शास्त्रे यथा। पृषोदरादीनि यथोपदिष्टमिति शिष्टप्रसिद्धसाधुशब्दोपगतिपादनेन लघुरूपा ३०
२६

म॰। स एव तु प्रातिपदिकाद् नभिहित कर्मादिगते क्तवा दोस्यादयस्त्यादिना गुरुः। लोकेपि लोहितशालिमानयं ग्राम इत्यादि वचनव्यक्तिषु कर्मधारय
मत्वर्थीययोरेकत्र क्रियमाणयोः गुरुप्रक्रम उपजायते लघुत्वे तु प्रक्रमस्य बहुव्रीहित्वं चेति। वेदे गुरुत्वलाघवव्यवहारस्तत्र प्रसंगाद्दृत्रिषु। तत्राद्य
नैगुरुः क्रमो यथा॥ त्रिः प्रथमामन्वाह त्रिरुत्तमामिति। तत्र प्रसंगयोः क्लृप्तलाघवव्यवहारो यथा॥ निदर्शितं प्रागिति॥ भेदे नांगांगिभावो यथेति॥
।त्र ५ यथा शास्त्रे। संयुक्तविधाने षत्वस्यापसेकर्त्रीकादित्यादि। वेदे यथा॥ एकस्य वा वयवः संबध्यमानो व्यवह्रियते रपि वाकांतरैः संबंधमुपयाति
यथा॥ छिद्रेणेत्यादि छिद्रत्वस्यादिभिरिति। एवमेकैकस्य वांगांगिभावद्वारा नीबहूनामंगिनां यथा प्रदर्शितमेकमंगमिति पुनरस्योपादानं।
लोकेपि मणिः शाणोल्लीढः शरदि सरिदाश्यानपुलिना कलाशेषश्चंद्रः सुरतमृदिता बालललना। मदक्षीणो नागः समरविजयी हेति
प का ४ निहतस्तनिम्नाशोभंते गलितविभवाश्चार्थिषु नरा इत्यादि। दौर्लिकार्थैकस्याएव क्रियायाबहुभिर्वाक्यैः संबंध इति। बहुभेदं विकल्पत इति॥
तत्र शास्त्रे यथा। क्वचिन्नाशविकल्पः क्वचिदप्राप्तविकल्पः क्वचिदुभयविकल्पः। वेदे यथा॥ यत्किंचित्प्रागग्नीषोमीयात्सर्वमुपांशुकर्त
व्यमित्यत्रोपांशुत्वे प्राप्ते दीक्षणीयायामोपवरमुच्चैः स्वरविधानमित्यादि। लोकेपि यथा। किं तारुण्यतरोरियमित्यादेर्महाकविभिरुत्प्रेक्षिता वि
कल्पाः इदं नियम्यत इति। शास्त्रे यथा॥ पतिः समास एवेति प्राग्धातोरित्यादि। वेदे यथा॥ नक्षत्रे दृष्ट्वा वाचं विसृजेदिति। अत्र नियत एव का

24

२७ लेवाग्विसर्गौ नियमितः। लोकेपि यथा। पार्थस्य धनुर्द्वे रसञ्चयानुकूले पार्थो नियम्यते। अस्मात्प्रयोगत्वमुपजायत इति। यथा शास्त्रे उरः स्थानेऽस्माः
27 प्रमज्जमानस्येव रूपान्तं प्रति प्रयोगत्वमुपजायत इति। यथा वा पदस्यैकस्मिन्नुदात्ते स्वरिते वा क्रियमाणे वर्ज्यमाने शेषस्य निघाते प्रयोगत्वमुपजायते।
वेदे यथा। अग्निष्टोमेन यजेतेत्यत्र वैकल्पिकस्येव प्रयोगत्वं लोके यथा च्यते। धुरि धुर्यो नियुज्यत इति। योयः कश्चिद्दर्थी समर्थः शास्त्रेण पर्युदस्तः
सप्रयोगपद्धस्य च्यते। अस्य वा कान्तरे हस्वाल्लिंगाद्धेदः प्रतीयत इति। शास्त्रे यथा अर्थः प्रयाणान्तपर इति वचनात्स्मो ह्रतेस्थानिवद्भवतीति वेदे यथा। अ
क्ताः शर्करा उपदधाति इत्यत्र केनाक्ता इत्याकांक्षायां तेजो वै घृतमिति घृतलक्षणेर्वाक्यान्तराल्लिंगात् घृतेनाक्ता इति विशेषः प्रतीयते। लोके यथा॥
रामोसौ भुवने विख्यातो दाशरथिः परशुरामो वेति संशये वाक्यान्तरगतादेकवाणाहतसप्तैणीभूतविशालतालविवरोऽङ्गीरोः स्वैः समभिरिति लिंगाद्दा
शरथिः प्रतिपत्तिरेवेति। अन्येन व्यारूपो हस्य पदार्थः प्रविभज्यत इति। शास्त्रे यथा ह्रस्वशीर्षेयासइत्यस्माद्यासशब्दारूपो हृस्वविधानभावो वैयासंद
तिविभज्यते। वेदे यथा वायव्यं श्वेतमालभेतेत्यस्माद्वाक्याद्वायव्यपदार्थोद्रपोहृस वायुर्वै क्षेपिष्ठादेवतेति प्रविभज्यते। लोकेपि राजपुरुषः इत्यत्र कोकस्य
राज्ञः पुरुषः कस्येति प्रश्नोत्तरयो राजपदार्थप्रविभागः॥ इदानीं प्रकृते चोद्यमुपसंहर्तुमाह॥ इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः। सर्वे ते न प्रकल्प्ये
रन्पदं चेन्स्यादवाचकमिति। अनेनैवाक्येष्वप्युपगम्यमाने वाक्येषु पदसमुदायरूपेषु सत्सु पदार्थोपनिबन्धने ये धर्मा वाक्यार्थानुग्राहिणः पदार्थस्य २७

॥८८॥

विशेषसंप्रत्ययप्रतिबद्धास्ते सर्वे ऽत्राविद्यमानोद्देशप्रविभागेन प्रतिष्ठां लभेरन् यदि सत्संपदं वा च कं न स्यादिति पदवादी प्रत्यवतिष्ठते । एवं पदवादि
नाः खंडवाक्यवादिनो दूषणाशूनेसमापितेदानीमेतत्समाधातुमखंडवाक्यवाद्याह ॥ ॥ अविभक्तेऽपि वाक्यार्थे शक्तिभेदादपो[illegible]ते । वाक्या कृ २
न्तरविभागेन यथोक्तं न विरुध्यते । एतत्सर्वं यथोक्तमस्मिन्पक्षे न विरुध्यते । तथा चास्मिन्पक्षे अविभक्ते निर्विभागे वाक्यार्थे एकस्मिन्नपि तस्मिन्न्या
नकरसादिवत्समाश्रीयमाणे शक्तिभेदसमाश्रयणेन चापोद्धृते कृतापोद्धारे सत्यवान्तरवाक्यार्थोपजननात्सर्वमेतत्सिध्यतीति तात्पर्यं । यथा
शाकदर्शने निर्विभागमेकमेव सकलत्रैलोक्यविलक्षणं सत्त्वं स्वलक्षणमभ्युपगम्यते । तत्रादितरपदार्थव्यावृत्तिसमाश्रयणेन च जाता
दिव्यवहारः कश्चिन्निर्वाह्यते । तथैवाखंडवाक्यवादिनां शक्तिभेदाद्वाक्यार्थप्रविभागकृते सर्वं युज्यत इति न कश्चिद्दोषः । वाक्यान्तरविभागे
नाविभक्तेऽपि वाक्यार्थे इति च वाक्यवाक्यार्थयोरेकयोगक्षेमत्वादुक्तं । पदार्थासंभवपूर्वके चोद्ये वाक्यान्तरविभागेनेत्यत्र समसमीचीनमिव
लक्ष्यत इति चेत् । बाध्यबाधकभावादिन्यायो वाक्येष्वपि दृश्यते ॥ ततो महावाक्यापेक्षयावान्तरवाक्योपप्लवेन तदपि न विरुध्यत इत्युपदर्शितं । तदुप
दर्शनेन परिमितपरिमाणेऽपि वाक्ये पदार्थापोद्धारनिबंधना अप्येते न्यायाः संभवंतीत्युपदर्शितमेवं भवति । एतदेव प्रसिद्धदृष्टान्तोपदर्शनेन द्रढयितुमाह ॥
॥ यथैवैकस्य गंधस्य भेदेन परिकल्पना । पुष्पादिषु तथा वाक्येऽप्यर्थभेदोऽभिधीयते ॥ त्वक्चंदनादावेक उपसंनिविष्ट एव गंधस्तस्य त्वपोद्धारसमाश्रये

२८

॥९४॥

णाभेदः कल्पनैवं पुष्पार्थोऽयं वंदनगंधइत्यादिना यथा वा कल्प्यार्थापोद्धारसमाश्रयेणेन पदार्थभेदउपपाद्यते। अयं देवदत्त पदार्थोऽयं गोपदार्थ इत्यादि। दृष्टां
तांतरमाह॥ ॥ गवये नरसिंहे वाप्येकज्ञानाहृते पथा। भागज्ञानं तरस्यैव सदृशं प्रतिपद्यते॥ एकज्ञानेनाभिन्नेनैवाहृते विषयीकृते परिच्छिन्ने गवयादौ स
ति तदेकदेशं प्रसिद्धज्ञानांतरस्यैव प्रतिपद्यते। एवमपोद्धारसमाश्रयणेन सर्वन्यायसमर्थने कृते तत्समानयोगक्षेमतया प्रतिनिधिः स्फुटिवाक्य विरोधस्व
समर्थित एव। अग्रे त्वपांतरवाक्यानामर्थवत्त्वं समर्थयिष्यते। अधुना तमेवापोद्धारमाश्रित्य पिकादिसंदेहे चोद्यमुद्भर्तुं प्रस्तावनां करोति॥ ॥ अप्र
सिद्धं तु यद्भागमदृष्टमनुपश्यति। तावत्तावत्तं विदं नरः। सर्वत्र प्रतिपद्यते॥ तत्र च गवयादौ भागमप्रसिद्धमदृष्टमनिश्चितमनुपश्यति मूढः परमार्थेन
स्फुरं विज्ञस्य सर्वत्र निर्विभागेनास्मिन् कुतश्चित्कारणान्तरे। सर्वत्रायमसंविदं नावस्तुनः प्रतिपद्यत इति। प्रकृते योजयितुमाह॥ ॥ तथा पिका
दियोगेन वाक्येत्वंत विलक्षणो। सदृशस्यैवसंज्ञानमसत्तोऽर्थस्य मन्यते॥ वनात्पिकस्यानीयतामित्यत्र हूनाहूतस्यानीयतामित्येन स्याद्वाकांतर
दत्तं न विलक्षणमेवावनादानीयतामिति चात्रासन्नेवार्थो वनाहृतस्यानीयतामित्यस्य क्रमवशात्सदृश इति मन्यते। परमार्थतस्तु पिकादि
योगात्सकलमेवात्यंत विलक्षणम्। एकपदार्थसंदेहे सकलमेवाज्ञानं वाक्यमित्यत्र ते। दृष्टान्तमाह॥ एकस्य भागे सादृश्यं भागे भेदस्य लक्ष्यते॥
निर्भागस्य प्रकाशस्य निर्भागेनैव चेतसा॥ यथैकमेव नीलपीतादिज्ञानं प्रकाशस्वभावं निरंशमेवोपजातं तस्य ज्ञानत्वेन सादृश्यं मन्यते। नीलपी २८

तादिना च भेदः। वस्तुतः पुनर्भिन्नत्वमेव नीलज्ञानं पीतज्ञानादिति न तत्रानुगमः कश्चिन्। अथ वा चित्रज्ञानयोरेव भागे सादृश्यं भागे भेदं प्रतिपद्यते।
किंचिद्धि चित्रज्ञानं नीलहारितोल्लेखि किंचिद्धि नीलपीतोल्लेखीति नीलादिना तत्र सादृश्यं हरितादिना भेदं प्रतिपद्यत इति दार्ष्टान्तिके योजयितुमाह॥
तथैव भागे सादृश्यं भागे भेदो वसीयते। भागाभावे पि वाक्यानां नामसंतं भिन्नधर्मिणां॥ प्रतीतार्थः श्लोकः। इदानीमखण्डवादी पदवादिनं दूषयितुमाह॥
रूपनाशे पदानां स्यात्कथं चावधिकल्पना। अगृहीतावधौ शब्दे कथमर्थो विविच्यते। यदि पदान्येव सत्यानि तदा दध्यानुपेत्यादिसंहितायां रूपविना-
शात्सदस्यनियतस्याभावे कमवधिं गृहीत्वा तदर्थो विविच्यतां। अतः प्रविभागशून्यं वाक्यमेवैकं सत्यमभ्युपगन्तव्यं। अर्थखण्डपक्षेऽप्येतो धावतीत्य-
तन्त्रमनूद्य प्राकरणिकं कथमेकं वाक्यं। अत्र हि स्याद्वेतेन तद्रूपं संहितावशाद्धि नष्टमित्येतन्न दार्ष्टान्तिकं वाक्यं कथं तद्वद्गतिः। तत्राह। संसर्गद्वयरू-
पाणां शब्देन तत्र व्यवस्थितः। नानारूपेषु तद्रूपं तेन परमिष्यतेऽश्वेतइ साहो शब्दे त्वनन्तत्वा खण्डपक्षे रूपाणां संसर्गद्वयव्यवस्थितेः। अत एव तद्रूप-
मपरं तत्रैव व्यवस्थितं तेषु नानारूपेषु प्रत्यायकमिष्यत इत्यदोषः। एतदेव व्याचिख्यासुराह॥ तस्मिन्नभेदे भेदानां संसर्गद्वयवर्तिनां। रूपं रूपा-
न्तरात्तस्मादनन्यस्याविभज्यते॥ तस्मिन्नभेदे एकस्मिन्नेव वस्तुनि इत्येवं रूपे भेदानां स्यादितः पृथक्तया इत्येतेषां संसर्गद्वयव्यवस्थितेः। तस्मात्तद्रूपं रूपान्तराद-
नन्यदपि तत्रान्यायसमाप्स्यतो उभयार्थप्रत्यायकतया मविभज्यत इत्यस्मिन्पक्षे प्रतीयते इत्येतदखण्डमेव प्रत्यायकं। अथ यद्येवमसंगान्येतान्यसमस्ता-

२९ यकयोर्विषयभेदेन भेदाभेदौ स्मृतावित्याह ॥ ॥ शास्त्रे प्रत्यायकस्यापि क्वचिदेकत्वमाश्रितम् । प्रत्याय्येन क्वचिद्भेदो ग्राह्यग्रहणयोः स्मृतः ॥१००॥ तत्राभेदं प्रत्याय्य
२१ प्रत्यायकयोः प्रदर्शयति ॥ ॥ ऊः स्वभेदमाश्रित्य यथासंख्यमकल्पितं ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यत्रोक्तं । ह्रस्वादिषु समसंख्योऽप्रसिद्धिहेतु देशनिर्देशवैष
म्यात् । सिद्धं तु समसंख्यत्वात् त्रयाणां हि विकारनिर्देश इति । तत्र ऊकाल इत्यत्र मात्रिकद्विमात्रत्रिमात्राणां संज्ञानिर्देशात् प्रत्याय्यप्रत्यायकयोरभेदे
समसंख्यत्वान्निर्देशसाम्ये संख्यातानुदेशसिद्धेः ह्रस्वदीर्घप्लुतसंज्ञाः पृथगवतिष्ठन्त इति न कश्चिद्दोषः ॥१०१॥ प्रत्याय्यप्रत्यायकयोर्भेदं निदर्शयितुमाह
॥ लृलृटोर्ग्रहणभेदो ग्राह्याभ्यां परिकल्पितः ॥१०२॥ स्यतासी लृलुटोरित्यत्र लशब्देन लृङ्लृटोः प्रत्याय्येते इति निमित्तनिमित्तिनोर्वैषम्यात्संख्यातानुदे
शाभावः प्राप्नोति । यथासंख्यमनुदेशः समानामित्यत्रोक्तं । संख्यासाम्ये शब्दतश्चेत् लादयः पाठे पदानां । टुरीरसः प्रथमस्यैवो यवायाव
इत्यादिनिर्देशः । अर्थतश्चेत् लृलुटोर्न ग्रहणमिद्युतस्तु शिलादिषु दोष इति चोद्यमेवं पक्षद्वये उपस्थिते । तत्रोच्यते । लृलुटोरित्यत्र लृरूपम्
त्सृष्टानुबन्धसामान्यमात्रं प्रत्यायकमभिन्नमेव न पुनः प्रत्याय्यभेदाद्भिन्नमत्राभ्युपगम्यते । ततश्च निमित्तनिमित्तिनोः साम्यात्संख्यातानु
देशः संगच्छत इति न किंचिदनिष्टं ॥१०२॥ अथ प्रत्याय्यप्रत्यायकयोरत्यन्ताप्यभेदं दर्शयितुमाह । यस्मिंस्तद्ग्रहणो रूपे संज्ञिनामभिधायकः । न हि प्र
तीयमानेन ग्रहणं स्यात्ति संभवः ॥ इस्त्र अस्त्र तद्यं । तस्य यस्य पदे तत्संस्पृष्टे काराकार्यो रूपग्रहणः प्रत्यायकः । तत्संज्ञिनामिव तीवर्णानामभे २९

तान्वन्यायकंभवतीतिनईकारास्कारयोरपिसोपश्लेषोवैनतेयइत्यत्रलोपःप्रवर्त्ततेयदिचात्रप्रत्याय्यप्रत्यायकयोरभेदोनाश्रीयतेतदाप्रतीयमा
नेनप्रत्याय्यमानेनान्येषांग्रहणस्यप्रत्याय्यत्वस्यासंभवइतिनात्रेष्टंसिध्येत्।तस्मात्तत्रैणोश्चानितिमेकमेवोभयोःप्रत्यायकंसंसृष्टरूपत्वादितिसत्ते
वर्ण्वेनोधावतीसस्मादुभयार्थप्रतीतिः।अवांतरवाक्योपस्थापनेनैतद्वोभयार्थप्रत्यायकंभविष्यतीतिदृष्टांतेनप्रदर्शयितुमाह॥ ॥ऊइत्येतदभि
न्नंचभिन्नवाक्यनिबंधनं।भेदेनग्रहणंचास्यपररूपमिवद्वयोः।ऊकालइत्येतदुपात्तं।तद्ध्रस्वदीर्घप्लुतानांत्रयाणांसामान्येनाभिन्नंरूपंबोद्ध
व्यं।मतत्स्वेतदेकंग्रहणकवाक्यस्थानीयंअवांतरवाक्यनिबंधनंभवतीत्याह।भिन्नवाक्यनिबंधनमिति।ऊकालोऽज्झ्रस्वसंज्ञः।ऊकालोदीर्घसंज्ञः
।ऊँकालःप्लुतसंज्ञोबोद्धव्यइति।अत्रत्यप्रत्याय्यासंसृष्टत्वादस्याभेदेनैवग्रहणंप्रत्यायकेस्थितेतेनतदाऊइत्येतद्रूपंभिन्नवाक्यनिबंधनमेवभवति।यथा
पररूपंसंसृष्टत्वादेकमपिद्वयोःप्रत्यायकंदृश्यते।तथैतदध्येतव्यं।तत्रश्वश्वेतोधावतीत्यादाववांतरवाक्योपस्थापनेनोभयार्थताभविष्यतीतियोजनी
यम्।शब्दानांभेदपक्षएववार्त्तिककारस्याभिरुचितइतिनिदर्शयितुमाह॥ ॥प्लुतस्यांगविवृद्धिंचसमाहारमचोस्तथाक्षुदस्यतापुनर्भेदःशब्देष्वतंतसा
श्रितः।प्लुतावैचइदुतौविसर्जनीयोक्तो।अंगविवृद्धिर्नोपपद्यते।नह्येचोवयवौकारइकारउकारौवेत्येवमंगविवृद्धिंक्षुदस्यतानानावेवशब्दावेकत्रसं
मिलितौवितियउपदर्शितःमागभेदःसपणक्रमः।तथाह्यचोःसमाहारंक्षुदस्यताभेदएवेष्यतइति।यदाहासमाहारोह्यचोर्भिन्नाभावादिति।तस्मात्

३० ष्वेतो धावती साहैस्सदृशयोर्मेलनमनुसरद्वानैरवाको पद्मावनेन नंत्र न्यायस्य माप्यप्रयत्नेन वा समर्थनं तन्न्यायमिति॥१०४॥ अथ तंत्रमुपसंहर्तुमुपक्रमते॥ ॥ अ
30-
र्द्धचादिषु शब्देषु रूपभेदः क्रमाग्रहात्। तेनात्र प्येकशब्दत्वे भिन्नानां स्मृतिरन्यथा॥१०५॥ यथाक्रमवशेन आचोर्द्धर्च अर्द्धर्च इति एकस्यैव शब्दस्य रूपभेदस्तथा तेन
न्याया अयमेनेकशब्दत्वे भिन्नानां रूपाणामन्यथास्मृतिः भिन्नास्मृतिर्बोद्धव्येति तंत्रमुपसंहृतो॥१०५॥ एतदेव स्फुटीकर्तुमाह॥ ॥संहिताविषये वर्णाः स्व
रूपेणाविकारिणः॥ शब्दांतरत्वं यांतीव शक्त्यंतरपरिग्रहात्॥१०६॥ एवं शब्दो नेकशक्तिवर्णैस्तया संहिताविषये प्रतिभासत इत्येकस्यैव वचनशब्दस्य संहित
योच्चारणाच्छक्त्यंतरपरिग्रहेणार्थ्यप्रसायकत्वं मन्यते॥१०७॥ कस्मात्प्रीतिमित्तभेदाद्विद्व उपजायत इति दृष्टांतप्रदर्शनेनाह॥ ॥इंद्रियादिविका
रेणादृष्टग्राहेषु वस्तुषु। आत्मलाभाद्देतोर्भिन्नं ग्रहणं सक्रमः स्मृतौ॥ यथा काचाद्युपहतचक्षुषामेकाकारमपि वस्तुनानारूपतयावभासते तथा
संहितावशादेकोपि शब्दो रूपांतरेणावभासते॥१०८॥ एतदेवोपसंहर्तुमाह॥ ॥ अभिधानक्रियायोगाच्छब्देष्वविकृतेष्वपि। रूपमत्यंतभेदेन तद्वेक
प्रकाशते॥ अभिधानक्रियासंहितयोच्चारणमेव तयायोगात्संबंधाद्विकृतेष्वपि शब्देष्वेकमेव शक्त्यंतरपरिग्रहादत्यंतभेदेन प्रकाशते॥ अ
थैनदेवागमविषये दृश्यते तेन संवादयितुमाह॥ ॥ ऋचो वा गीतिमात्रं वा सामस्वध्यानांतरं। गीतिभेदाद्विगृह्णंते ते ताएव विकृता ऋचः॥१०९॥ ऋच एवत
योद्वीरिताः सामाख्यं प्रतिलभंते। विशेषणोदीरणमात्रं वा सामायथा चानेगीतिषु सामाख्येति। ऋचो वा सामेत्येतनत्रापयितुमाह॥ ॥ जी राम ०
३०

निभेदादिसादितानेदेवंभेदाभेदविवक्षाभिन्नेनप्रत्याय्यप्रत्यायकभावेनत्वन्तंनभेदरूपेणावासंहिताविपर्ययेवसाहित्यत्वोक्तप्रकारेणानुत्तरेणानन्यमितिपक्षेणावीवांनरवाको
पन्नावनरूपेणाभ्युतोधावनीतस्तत्रैकत्वेपिवाक्यस्यार्थभेदोभविष्यतीतिनाश्रमत्पक्षेपदानामनन्यपरामेपिकाचित्क्षतिः ॥ अथपुनरपितत्रन्यायेनैनतत्स
मर्थयितुमाह ॥ उपायाःस्फुटितसंहारोभिन्नानामेकशेषिणां । तत्रेणोच्चारणेतेषां शास्त्रेसाधुत्वमिष्यते ॥ ११० ॥ उपायात्तंत्रलक्षणाद्भिन्नानामपिशब्दानामे
कस्यां स्फुटितसंहारः संश्लेषोगीर्सत्वाकीदृशानांभिन्नानामित्याह एकशेषिणामिति । एकशेषसाधर्म्यात्तंत्रेणोच्चारितानाअप्येकशेषिणाउच्चतोयपयो
कंवार्त्तिककृताहलंतस्यैकशेषनिर्देशादिति तेनैकशेषिणांतंत्रन्यायवतामितियावत् । उपायादित्यादेः पूर्वस्यश्लोकस्यस्फुटीकरणायोक्तंतंत्रेणोच्चारणाद
साद्धिनिस्मादेवंविधेविषयेभिन्नानामपिशब्दानांकिंचित्साहश्यमुपादायतंत्रेणोच्चप्रतिपादनंकार्यमित्याह ॥ पीलम्पस्फाभिचैकंरूपंभेदवतामपितंत्रेणो
च्चारणांकार्यमन्यथातेनसाधवः ॥ १११ ॥ यद्यपिचसरूपाणांवाक्यानांशास्त्रेणसाक्षात्तंत्रेणप्रतिपादनंनकृतं नाप्येकशेषस्यप्रतिपादनं तथापिसमानन्यायत्वा
त्सर्वमपिशब्दानुशासनोपयोगीतिप्रतिपादितमुक्तमेवेत्यव्युतदितिप्रतिपादयितुमाह ॥ सरूपाणांचवाक्यानांशास्त्रेणप्रतिपादितेनतंत्रेणोच्चारणा
देकंरूपंसाधूपलभ्यते ॥ ११२ ॥ एतदेवदृष्टान्तदर्शनपूर्वकमुपसंहर्तुमाह ॥ एकस्यानेकरूपत्वंनालिकादिपरिग्रहात् । यथातथैवतन्त्राणसाहृहूनामेकरू
पता ॥ ११३ ॥ यथैकोपिध्वनिर्नालिकादिपरिग्रहोपधानवशान्नानाविधषड्जऋषभादिरूपभेदवानुपजायते तथातंत्रसमाश्रयणेनप्रत्याहृतः श्वेतदूतेवमात्म

(51)

३१ 3/

कानोभिन्नानामपि शब्दानामेकरूपतास्त्विनरइत्येवंरूपेति न कश्चित्तत्र दोषः [१२३] इदानीं यदुक्तमवान्तरवाक्यानामर्थवत्त्वेन स्यादिति तत्प्रति विधातुमाह॥ ॥
यथा पदसरूपाणां वाक्यानां संभवः पृथक्तान्यवाक्यान्तराभावे स्यादेषां पृथगर्थता॥[१२४] यथाः स्वेऽपक्षे वाक्यानां पदसरूपाणामवान्तरवाक्यानामपोद्धा
रेणुद्धासंभवमुपकल्प्यार्थस्तेषां महावाक्योपयोगी व्यवस्थाप्यते। यदि तु यावन्मकल्पेन तन्तदा महावाक्यार्थसंप्रत्ययः स्यात्। तथा वाक्यान्तराभावएषां
पृथगर्थता स्यात्। यावता पोद्धारसमाश्रयणेन वाक्यान्तराणामुपकल्प्य पृथगर्थत्वमसत्यमप्येषामभ्युपगम्यत इति नात्यवान्तरवाक्यानुपपत्तिचोद्यम्॥[१२४] इदा
नीं प्रयोजनं वाक्यार्थ इति पक्षं दूषयितुमाह॥॥ अभिधेयः पदस्यार्थो वाक्यस्यार्थः प्रयोजनं। यस्य तस्य न संबंधो वाक्यानामुपपद्यते॥[१२५] वाक्यस्यार्थो वा
क्यप्रयोजनमुच्यते। नत्वभिधेयः कस्यायमर्थः स्यादित्याह। अभिधेयः पदस्यार्थ इति पदानामर्थोऽभिधेय उच्यते। एतन्निराकरोति यस्य तस्येत्यादि। ए
वं चादितः परस्परं वाक्यानां संबंधो न स्यात्। किलायः शलाकाकल्पानां वाक्यानां किंकृतः संबंधो भवति। अभिधेयद्वारकः परस्परं संबंधः स्यात्। अभि
धेयं च वाक्यानां नास्तीत्यसंबंधानि वाक्यानि प्राप्नुवंति। नियतिकं चिद्रे तत्॥[१२५] अथान्विताभिधानसमाश्रयणेनैतत्समर्थयितुमाह॥॥ तत्र क्रियापदान्येवव्य
पेक्षंते परस्परं। क्रियापदानुषक्तस्तु संबंधोऽनुमीयते॥[१२६] क्रियापदमाक्षिप्तसमस्तसाधनजातं निराकाङ्क्षं संपद्यते। क्रियापदानुषक्तः परस्परं संबन्धो नि
राकांक्षत्वसमाहृपपन्न इति न काचित्क्षतिः॥[१२६] नन्वन्विताभिधाने नयुक्तमिव प्रतिभाति। तथाहि। यदि प्रथममेव सकलविशेषयुक्तो वाक्यार्थोऽवगतः स्यात्। तन्न॰

तदुक्तस्कालभाविनां गवादीनामभिधानेन किंचित्प्रयोजनमुत्पश्यामः। अवगतार्थानां हि पदानां पुनर्वचने वैयर्थ्यमापद्यत इत्याशंकां समर्थयितुमाह॥ ॥ आहु
रित्यनुवादो वा पदार्थव्यक्तिकल्पने प्रत्येकं तु समासोर्थः सहभूतेषु वर्तते॥ अवगतार्थानामप्याहुरित्येनियमायमभिप्रायः। उक्तस्यैवार्थस्य स्फुटीकरणाय यानुवाद
स्तेषामसावितिनाश्यानर्थकः। एवमपि पूर्वस्य पूर्वस्यापि तेहितत्वात्सहत्वासंभवादन्वयस्यासंभवादर्थानवगम एव। एकस्मादेव च पदात्समस्तविशेषावि
तस्यैवाकार्थस्याप्रतीतेस्तत्तेषां चानवगतार्थानां नियमानुवादपरिकल्पनायोगादसमंजसमेवाभिहितानाभिधानपक्षः। यदा पुनः सहभूतेष्वेवासौ प्रत्येकं समा
सोर्थस्तस्य च्युतो यथोक्तः। व्यक्त्योपव्यंजनासिद्धिरर्थस्य प्रतिपत्तुः पुरुषस्येति तदानात्यैव सहभूतानामुपादाने वैफल्यमिति न कश्चिद्दोषः। तदेवं संघातादी
न्युद्दिष्टानि वाक्यलक्षणानि प्रमाहंगिकविचारसहितानि व्याख्यातानि। आख्यातं वाक्यमिति वाक्यव्याख्याप्रसंगेन च वाक्यार्थश्च अपि संसर्गसंसृष्टिनिराका
क्षपदार्थप्रयोजनलक्षणस्तद्द्वारेणोपदर्शितः। प्रतिभां क्रियां च दर्शयिष्यति। नन्वेकस्यैव वाक्यार्थस्य कथं विकल्पप्रपंच इत्याशंकां निरूपयितुमाह॥ अ
विकल्पेपि वाक्यार्थे विकल्पा भावनाश्रयाः॥ वाक्यार्थो विकल्प एव निर्विभाग एवाभ्युपगंतुं युक्तः। तस्मिंश्च तथाभूतेपि ये मी विकल्पास्ते पुरुषाणामनेक
शास्त्रभावनासमाश्रया बोद्धव्याः। न वस्तूनुपातिन इति। तद्वाक्यार्थ एक एव युक्तः॥ एतदेव प्रतिपादयितुमाह॥ ॥ अत्राधिकरणे वादाः पूर्वेषां बहुधा ग
ताः॥ अस्मिन्नधिकरणे विचारस्थाने पूर्वेषामाचार्याणां प्रवादा बहुधा गताः शास्त्रसंस्कारवासितचेतसां तेषामिति कस्य पर्यनुयोगः। क्रियते। प्रमार्थित

स्कवाक्यार्थ एक एव सर्वोपि शब्दः प्रतिभायाः एव हेतुरिति तत्स्वरूपमिदानीं प्रस्तावयितुमाह ॥ अभ्यासात्प्रतिभाहेतुः शब्दः सर्वोपरैः स्मृतः । बालानां च तिर
श्चां च यथार्थप्रतिपादने ॥११८॥ अपरैराचार्यैः सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः जडानामपि प्रतिभाहेतुरित्याह ॥ बालानामित्यादि । आस्तां विदितसमयस्य किंन
भविष्यत्सैषा प्रतिभाहेतुः । येप्यविदितसंकेता अमी बाला जडप्राया वा तिर्यञ्चः तेषामप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडा
नामपि प्राणिनां नियतपदः शब्दः संबोधनायोदीर्यते येन प्रतिनियततज्जातसत्त्वस्तोतोऽवनियतैव काचित्प्रतिभा प्रबोध्यत इति तन्मूल एव सर्वः कश्चित्ते
षां व्यवहारः । अनेनैतदुच्यते यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्तात्मकलव्यवहारमूलभूता न प्रहृवनीया तदपह्नवे सालैव विप्रलभ्यते । त
त्प्रतिभास्वरूपगमो वश्याभ्युपगमनीयः ॥११९॥ अभ्यासात्प्रतिभाहेतुरित्युक्ते कोऽयमभ्यासः किमिदानीं तनः उतजन्मान्तराभ्यासी । तस्य च किंस्वरूपं इत्याशंक्याह ॥ अनागम
श्च सोऽभ्यासः समयः केश्चिदिष्यते ॥१२०॥ स चाभ्यासोऽनागमः इदानीं तनो न भवति । न हि बालस्य तद्देशोपदिष्टः केनचिदिति जन्मान्तराभ्यासैवास च समयः इष्यते । स के
तत्स्वरूपो साविष्यते इति स्वरूपमेवास्य स्फुटयितुमाह ॥ अनन्तरमिदं कार्यमस्मादित्युपदर्शनैः । स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघा
तमात्रसमनन्तरमेव वाजिनोतियाति अङ्कुशाभिघातेन च गजा एवमन्योपि यथासंभवं प्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्व
न्तो लोके यात्रां निर्वाहयन्तीति स्थितं । एवमखण्डमेव वाक्यं प्रतिभा च वाक्यार्थ इति समाम्नायणीयं पदपदार्थापोद्धारमात्रं स प्रतिनिध्यादिकल्पनं प्रासंगिका

दिग्मायपनिर्वाहश्च भविष्यतीति व्यवस्थापितो ॥ १२० अथ पदार्थप्रविभागश्चेत्समाश्रितस्तदुच्यतां पदस्यार्थ इति प्रविभागप्रसंगात्पदार्थविवेचनं मतभेदेन कर्तुमाह ॥ ॥
अत्रार्थः सर्वशब्दानामिति प्रत्याय्यलक्षणः ॥ अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ॥ १२१ सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदाहुः ॥ एत
त्सर्वशब्दानां प्रत्याय्यलक्षणं प्रसाध्यस्वरूपं वाच्यस्य लक्षणं बोद्धव्यं ॥ केन तुल्यमेतत्स्यादित्याह ॥ अपूर्वदेवतेत्यादि ॥ अपूर्वदेवतादिपदेषु हि नाकारप्रथनं ॥ य
तु गवादिपदेषु आकारप्रथनं तत्तान्तरीयकतया बोद्धव्यं ॥ अन्यथा अपूर्वशब्दाद्देवताशब्दात्स्वर्गशब्दाद्दश्च गवादिशब्दवदाकारादिप्रथनं स्यात् ॥ यतश्च
तेभ्यो नास्त्याकारादिप्रथनं अतोऽर्थमात्रमेव तैः प्रत्याय्यत इति युक्तं ॥ अथ गवादिशब्देभ्य आकारादिप्रथनं दृष्टं तत्तस्य तदकुशकं यद्विशिष्टपदार्थप्रत्यायु
क इत्याशंक्याह ॥ ॥ प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ॥ न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ॥ १२२ सास्नादिमत्येव यदा गोशब्दप्रयोगं पश्यति तद्दृशि
नाभ्यासाच्च तत्राकारपरिग्रहोऽयः स शब्दस्य प्रत्ययो न भवति ॥ कस्मादित्याह ॥ स हीत्यादि ॥ तस्मात्प्रयोगाभ्यासेन यत्नान्तरेण शब्दावगम्यातिरिक्तेन समर्प्यते
ऽतश्च शब्दव्यापारोऽसौ न भवतीति शब्दस्यार्थमात्रमेवापरामृष्टाकारविशेषं वाच्यं युक्तमित्येकः पक्षः ॥ इदानीं कश्चित्कथं वाच्यः कश्चिन्नत्राकारो
नुनिष्पादीति पक्षान्तरमाह ॥ ॥ केचिद्भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः ॥ अनुनिष्पादिनः केचिच्छब्दार्थ इति मन्यते ॥ केचिद्भेदा जात्यादयः शब्द ॥१२३॥ २
वाच्याः ॥ केचित्तत्राप्रयोजकाः अनुनिष्पादिन एवान्येषां च शब्दार्थ इत्यपरे मन्यन्ते ॥ १२३ एतदेव प्रसाध्यातुमाह ॥ ॥ जातिप्रत्यायके शब्दे याव्यक्तिरनुषंगि

३२ णी। ननु व्यक्तिगतानां भेदान्न जातिशब्दोवलंबते। [१२४] जातिशब्दाज्जातिमात्रं प्रत्याययंति। व्यक्तिलक्षणत्वात्तु संसर्गिणी निरधिकरणाया जातेरसंभवादिति कृत्वा तद्व्यक्ति-
33 गतानाकारविशेषान् जातिपदार्थपक्षे जातिशब्दो नावलंबते। [१२५] एतदेव व्यक्तीकर्तुमाह॥ ॥ घटादीनां न चाकारान् प्रत्याययति वाचकः॥ वस्तुमात्रनिवेशित्वात्तद्-
गतिर्नान्तरीयकी। [१२५] घटादीनां प्रसिद्धानामाकाराणां वाचकः शब्दो घटादिर्न प्रत्याययति स्वबुद्धौ दृष्टाकारमात्रनिवेशित्वात्॥ न हि सकलविशेषसहितमर्थं श-
ब्दः प्रत्याययितुमलमिति तत्राकारविशेषावगतिर्नान्तरीयकी वा तु निष्पादिन्येव बोद्धव्या। [१२६] नान्तरीयकत्वमेव प्रदर्शयितुमाह॥ ॥ क्रियाविनाप्रयोगेण
न दृष्टा शब्दचोदिता। प्रयोगात्त्वनुनिष्पादी शब्दार्थ इति मन्यते। [१२६] यत्नेनेति शब्दचोदिता क्रिया कर्तृकर्मसाधनसामग्रीं विना न दृश्यते। तन्नस्वासे
साधनयोगो प्रयात तत्रानुनिष्पादी तथा शब्दार्थो विगंतव्य इत्युपसंहृतो। [१२८] अथ सर्वप्रकारगुणप्रधानभावेन पदस्यार्थ इति तृतीयं पक्षं दर्शयितुमाह॥ ॥ नियता
॥१२७॥४ त्प्रयोगाद्ये नियतं यत्नसाधनं। तेषां शब्दाभिधेयत्वमपरैरनुगम्यते। येन केनचिद्विना शब्दस्याभिधेयं न निर्वहति तत्सर्वं साध्यसाधनात्मकं शब्दाभिधेयं वक्तु-
मुक्तं। किंचित्प्रत्याय्यते अन्यत्तु नान्तरीयकतयावगम्यत इत्यपि न शोभनं। किं तु सर्वाकारमेवाभिधेयं गुणप्रधानभावेन तस्मान्नीतमित्ययं पक्षः शोभनः॥ १२८॥
समुदाय एव तु लक्ष्यतया शब्दस्यार्थ इति चतुर्थपक्षं दर्शयितुमाह॥ ॥ समुदायोभिधेयः स्यादविकल्पसमुच्चयः॥ [१२९] न तु यथाकारसमुदायं समुच्चितमेव प्रत्या-
ययति न हि बहुवचनमेव तत्र स्मात्। अथ विकल्पितं प्रत्याययति तदा वचनं विकल्पः स्यादित्याशंकाह॥ ॥ अविकल्पसमुच्चय इति। अविद्यमानो विकल्प
३२

समुच्चयोयस्मात्सौ न घात्मतत्तस्मान्न नीयत इति संभाव्यते। एतच्चोपमासमुद्देशे प्रपंचविचारणावसरे सविस्तरं प्रदर्शयिष्यते॥१०॥ अथ जातिगुणक्रियात्मकस्यार्थस्या
सत्यभूतः संसर्ग एव शब्दार्थ इति पंचमं पक्षं दर्शयितुमाह॥ असत्यो वापि संसर्गः शब्दार्थः कैश्चिदिष्यते। घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते॥ स चात्र
न घटादिरेकेणानुपलंभादसत्यभूत एवोच्यते। तस्मात्तत्संसृष्टः पदार्थ एवमसत्यभूत इति। अथ सत्यमेवासत्योपाधि विचित्रितं शब्दवाच्यमिति षष्ठं पक्षमाह॥ अस
त्योपाधि यत्सत्यं तद्वा शब्दनिबंधनं। शब्दस्य वा स्वरूपमेवाभिधेयमिति सप्तमं पक्षं दर्शयितुमाह॥ शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यतां। अभिजल्पत्व
मध्यासरूपत्वमागतः शब्द एव तद्रूपलक्षणः शब्दस्य वाच्यः। अभिजल्पस्वरूपमाह॥ ॥सोयमित्यभिसंबंधाद्रूपमेकीकृतं यदा॥ शब्दस्यार्थेन तं शब्दमभि
जल्पं प्रचक्षते॥ सोयमित्यभिसंबंधोध्यासात्मा उच्यते। तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते तदाभिजल्पः शब्द उच्यते। अध्यासवशाच्छब्दार्थयोरेका
त्मत्वेप्यर्थांशस्यैव प्राधान्यं प्रयोगवशात्। क्वचित्तु विपर्ययमेदेन द्वयोरपि दृश्यत इति प्रसंगादभिधातुमाह॥ ॥तयोरपृथगर्थत्वे रूढेष्वव्यभिचारिणां। किंचिदेव क्व
चिद्रूपं प्राधान्येनावतिष्ठते। तयोः शब्दार्थयोरध्यासवशाद्रूढेर्नियमादेवाव्यभिचारिणा अपृथगर्थत्वे एकरूपत्वे सति किंचिदेव रूपं प्रयोगवशात् क्वचिदेव लो
के शास्त्रे वा प्राधान्येनोद्रिक्ततयावतिष्ठते। तत्र लोकेर्थांशस्यैव प्राधान्यमित्यपि दर्शयितुमाह॥ लोकेर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते॥१०॥ अर्थरूपतां प्रतिपन्नो
र्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते। अयं गौरित्यादिनत्वर्थ एव बाह्यतया प्रधानमवसीयते॥१०॥ शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यत इत्या

३४ 34

ह॥ शास्त्रेतन्मयरूपत्वंप्रविभक्तंविवक्षया॥ शास्त्रेहिस्वरूपप्रधानोनिर्देशः क्वचित्क्वचिद्वार्थप्रधानोपीत्युभयरूपताशब्दस्यदृश्यते॥ इदानीमर्थेषुनशक्तिः
पृथगस्ति किंतुशब्दाधीनेतिप्रथानेशब्देविधीयतेतयैवावगम्यतेइतिस्वमाहात्म्योपस्थापितएवशब्दार्थइत्यपरंपक्षंदर्शयितुमाह॥ ॥ अशक्तेः सर्वशक्तेर्वा
शब्दैरेवप्रकल्पिता। एकस्यार्थस्यनियताक्रियादिपरिकल्पना॥ अथवा सर्वशक्तिरर्थोव्यवस्थितः।तस्यप्रतिनियतशक्त्यभिधानंशब्देनेतिनवमंपक्षंदर्शयितुम
त्रैवोक्तंसर्वशक्तेर्वेति। शक्त्यार्थः कदाचित्क्रियारूपतयाभिधीयतेकदाचित्किंचिद्रूपतयेतिनियताक्रियादिरूपताशब्दार्थतयाप्रतिपाद्यते॥ अथवाबुद्ध्युपा
रूढएवशब्दस्यार्थोनबाह्यइतिदशमंपक्षमुपदर्शयितुमाह॥ ॥ योवार्थोबुद्धिविषयोबाह्यवस्तुनिबंधनः॥ सबाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते॥ शब्दस्य
बुद्ध्युपारूढस्यैवकल्पिकस्ययोबुद्ध्युपारूढोबाह्यवस्तुनिबंधनः बाह्यवस्तुविकल्पजननद्वारेणनिबंधनंयस्यसतथाभूतः॥ सचैवैकल्पिकोर्थोभ्रमवशात्दृश्यवि
कल्पैकाकारेणबहीरूपोपिबहीरूपतयाध्यस्तः। ध्यस्तमेववस्त्ववगच्छामिशब्दादितिशब्दनिमित्ताभिमतिशब्दार्थइष्यते॥ इदानींगवादीनांशब्दानामाकारविशेष
वानर्थोऽपूर्वप्रभृतीनांसंविन्मात्रमपरामृष्टाकारविशेषमर्थइत्येकादशंपक्षमाह॥ आकारवंतः संवेद्याव्यक्तस्यातिनिबंधनाः॥ येनेप्रत्यवभासंतेसंविन्मात्रेणकेनचि
त्ययाः॥ केचिच्छब्दैः संवेद्याः प्रत्याय्याआकारविशेषवंतोव्यक्तस्यातिनिबंधनाः प्रत्यवभासंते। केचिन्निराकाराः संविद्रूपाः प्रत्याप्यंते। तेषांतथैवार्थोव्यवस्था
प्यते॥ इदानींप्रतिनियतवास्तनावशेनैवप्रतिनियताकारोर्थस्तत्वतनकश्चिदपिनियतोनाभिधीयतइतिद्वादशंपक्षमाह॥ ॥ यथेंद्रियंसन्निपतद्वैचित्र्येणोपलभ्यते॥ ३४

दर्शकं। तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा॥ [१३८] अविपरीतमप्यर्थमिदं द्वयं द्वेषु वक्तॄन्नानारूपमवभासयति यथा। तथैव नियतवासनावासितचेतसां शब्दार्थप्रती-
तिरिति नास्ति कश्चिन्नियत एकः शब्दस्यार्थः। [१३९] एतदेव व्याख्यातुमाह॥ वक्त्रा नन्वेव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु। अस्य प्रसस्यानुकारेण शब्दार्थः प्रविभज्यते। तथा हि।
सांख्येनैव सौगतप्रमतयः प्रतिपत्त्रनुकारेण तथैव शब्दार्थं प्रतिपद्यते। वक्त्रा तु वैशेषिकादिना स्वमतस्यानुसारेण वक्तुं प्रक्रान्तः। तथा च वैशेषिकेण व-
यविनं प्रतिपादयितुं घटशब्दः प्रयुक्तः। सांख्यैर्गुणसमाहारमात्रमभिमन्यते। जैनसौगतैः परमाणुसंचयमात्रमिति। तथैव तस्मात्तेषामर्थप्रतिपत्तिः। [१३९] एत-
देव व्यक्तयितुमाह॥ ॥ एकस्मिन्नपि दृश्येऽर्थे दर्शनं भिद्यते पृथक्। कालान्तरेण चैकोऽपि तं पश्यत्यन्यथा पुनः॥ [१३९] वस्तुत एकस्मिन्नेकरूपे दृश्येऽर्थे शास्त्रवासनाभेदा-
द्दर्शनं ज्ञानमस्मिन्भिद्यते। एकोऽपि च पुरुषः सुगतदर्शनसंस्कृतमतिरन्यथाध्यवस्यत्यर्थं। कालान्तरेण वैशेषिकशास्त्रश्रवणादन्यथेति। [१३९] अतः किमि-
त्याह॥ ॥ एकस्यापि च शब्दस्य निमित्तैर्व्यवस्थितैः। एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते॥ [१४०] एकस्य घटशब्दस्य निमित्तैः शास्त्रसंस्कारैर्व्यवस्थितैरेकेन
पुरुषेण नियतशास्त्रवासनावशात् क्रमेण बहुधार्थः प्रकल्प्यते। बहुभिश्च नानाशास्त्रसंस्कृतबुद्धिभिर्युगपत्स्वमत्यनुकारेण बहुधापि परिक-
ल्प्यत इति किमत्र कुर्मः। [१४१] अतः किमित्याह॥ तस्माद्दृष्टतत्त्वानां नास्त्यपराधं बहुच्छलं। दर्शनं वचनं चापि नित्यमेवानवस्थितं॥ [१४२] यत एवं तस्माद्दृष्टतत्त्वानां ६२
पुरुषाणां दर्शनमनवस्थितं। अदृष्टतत्त्वतया च सापराधं अत एव बहुच्छलं बहुविधबाधकाघ्रातं तस्मात्तेषां वचनमपि तेषां तथैवेति तत्त्वकथनं सुदुष्करमेव

३५
35

[140] स्थितो॥ नन्वसंस्तेव परावरत्वानुनयः तदनुसारेण सर्वं व्यवस्थापयिष्याम इति तदर्थमाह॥ ऋषीणां दर्शनं यच्च तत्त्वे किंचिदवस्थितं। न तेन व्यवहारोस्ति न तच्छब्दनि
[141] बंधनं॥ परमर्षीणां भगवतां दर्शनं तात्त्विकं भवति किंतु परमार्थेन व्यवहारासंभवः। व्यवहारसाधनानां शब्दानां निबंधनेन भवतीति न तेन व्यवस्था॥
व्यवहारवेलायां वा तेप्यदृष्टतत्त्वसदृशा इति पुनरव्यवस्थैव॥ यदुच्यते। रूपाण्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ। ज्ञाने प्रत्यभिलापे च सदृशौ
बालपंडितौ इति। ननु पुरुषबुद्ध्यो विचित्रा भवंतु। प्रत्यक्षेण खलु वयं यथावद्दर्शी दृष्टः तथैव व्यवहरिष्याम इत्याशंक्य प्रत्यक्षस्याव्यवस्थितिमाह॥ ॥
तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव। नैवास्ति तलं व्योम्नि न खद्योते हुताशनः॥ [142] अतिनिर्मलं गगनतलमित्यविलुप्तदृशाम प्रत्यक्षेण दृश्यते। न तत्र
किं कुर्मः। यत्र नरूपं यत्रास्ति शब्दीयमनेन दृष्टमित्येव तथैवोपगम्यते तत्स्वप्रसंहरन्नाह॥ ॥तस्मादप्रत्यक्षमप्यार्षं विद्वान्नीक्षेत युक्तितः। न दर्शनस्य प्रामाण्या
त् दृश्यमर्थं प्रकल्पयेत्॥ तस्माद्व्यवहारवेलायामसमाख्येयतत्त्वानामर्थानां यथा लौकिकैरन्वाख्यानं क्रियते तथैव तदनुसारेण शब्दार्थमाश्रित्य व्य
वहारं निर्वाहयेदन्यदपि सिद्धपेषणमाचरणीयमिति। यस्य यथैव स्वदर्शनानुसारेण प्रतिभाति तथैव तत्स्यप्तशब्दार्थ इत्येवाश्रयणीयमित्येकेनैव स्वकबद्ध
विकल्पप्रदर्शनेनेत्याह॥ ॥ असमाख्येयतत्त्वानामर्थानां लौकिके यथा। व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत्॥ [144] एवं मतभेदेन प्रदर्शितस्य द्वा
दशधा पदार्थस्य पदकांडे जातसादिप्रपंचैः प्रविभज्य स्वरूपं निर्णेष्यति। एतदत्रैव याकरणस्याखंड एव स्फोटलक्षणो वाक्यार्थोऽभ्यासः संबंधः पदार्थ

३५

स्वसंस एवेति निर्णयः। १४४ अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुवदन्नाह॥ ॥ विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते। वाक्यार्थ इति तामाहुः पदार्थैरुप
पादिताम्॥ १४४ देवदत्तादिपदेभ्यो विच्छिन्नेभ्यः स्वस्वार्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थप्रतिव्यतिरिक्तैव जायते। तां च वाक्यार्थं वैयाकरणा
आहुः। कस्मात्। उपायत्वादित्याह॥ पदार्थैरुपपादितामिति। पदार्थैः सत्यैर्वोपाधिभूतैरुपपादितामभिव्यक्तामिति॥ कीदृशीमित्याह॥ ॥ इदं तदिति सा
न्येषामनाख्येया कथंचन। प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते॥ सा चोपजायमाना आख्यातुमन्यस्य न शक्यते। केवलं स्वसंवेदनसिद्धैवासौ। प्रति
पत्त्रापि स्वसंवेदनसमये नियतेन रूपेण निरूपयितुमशक्यैवासौ। किंस्वभावासावित्याह॥ ॥ उपश्लेषमिवार्थानां सा करोत्यविचारिता। सार्वरूप्यमिवापन्ना
विषयत्वेन वर्तते॥ १४५ असंसृष्टानां पदार्थानामसावुपश्लेषं मेलनं करोति। सर्वरूपेव वाक्यपदार्थानां वासौ विषयत्वेन वर्तते। तन्निष्ठास्ते सा फलं भज
न्त इति॥ १४६ तां च न किंचित्प्राणिमात्रमतिवर्तते अतिक्रमितुमिच्छतीत्याह॥ ॥ साक्षाच्छब्देन जनितां भावनानुगमेन वा॥ इतिकर्तव्यतायां तां न कश्चि
दतिवर्तते॥ १४७ सा साक्षाच्छब्देन कदाचिद्व्यवहारकाले जन्यते। जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनां तत्काल एवेतिकर्तव्यतारूपः सर्व
स्य व्यवहारः॥ १४८ एतदेव स्फुटयति॥ प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति। समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्॥ सर्वः कश्चित्तामेव भगवतीं स्वप्रति
भां प्रमाणत्वेन पश्यति। तथा चोच्यते। सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय इति। तिरश्चां च जातमात्राणां तत्काल एव व्यवहार इति तदप

३६ ड्वेन नान्याभ्यां वचनीयः ॥ [१४९] सिद्धेव चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह ॥ ॥ यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः । मदादिशक्तयो दृष्टाः प्रतिभास्तद्वतां त-
38 था ॥ [१५०] यथा द्रव्यविशेषाणां परिपाकव्यतिरिक्तयत्नान्तरनिरपेक्षा मदादिशक्तयो दृश्यन्ते । तथैवेयं प्रतिनियतसंस्कारजन्या प्रतिभावतां स्फुटमुपलभ्यत एव जन्मा-
न्तराभ्यासहेतुकेयमिति ॥ [१५०] स निदर्शनमुपपादयितुमाह ॥ ॥ स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः । जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ॥ [१५१] पंचम-
स्वरविरावी मधुमासे पुंस्कोकिल इत्यस्य यत्नजमेतन्निसिद्धं । लूतानां तन्तुकुलायरचना च प्रतिभामाहात्म्यादेव दृश्यते ॥ [१५१] एतदेव स्फुटयितुमाह ॥ आहार-
प्रीत्यभिद्वेषप्लवनादिक्रियासु कः । जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणां ॥ [१५२] प्रतिप्राणमाहारादिक्रियानियताऽनादिप्रतिभावशादेवेति प्रसि-
द्धं ॥ [१५२] प्रतिभायामत्र शब्द एव मूलमित्याह ॥ ॥ भावनानुगतादेतदागमादेव जायते । आसन्नविप्रकर्षाभ्यामागमस्तु विशिष्यते ॥ [१५३] स चागमः कदा-
चिदासन्नोऽस्मिन्नेव जन्मन्यवगतः कदाचिज्जन्मान्तरदृष्टा आसन्नविप्रकर्षाभ्यां शब्द एव प्रतिभाहेतुः [१५३] तस्माच्च निमित्तभेदेन षाड्विध्यं दर्शयितुमाह ॥
स्वभावचरणाभ्यासयोगादृष्टोपपादिता । विशिष्टोपहिता चेति प्रतिभां षड्विधां विदुः ॥ [१५४] स्वभावेन यथा कपिः । चरणादिभ्यो हाहरणान्यूह्यानि ॥ एव-
मखंडेऽपि वाक्येऽभ्युपगते पदपदार्थभेदेन व्यवहारो न निर्वहतीति पदार्थः सामान्यं न मतभेदप्रदर्शनपूर्वकं निर्णीतं ॥ [१५४] इदानीं मुख्यानां तदीय-
कविचारोपक्रममाह ॥ यथा संयोगिनिर्दिष्टैर्लक्षितैर्व्यप्रयुज्यते । गोशब्दो न त्वसौ तेषां विशेषाणां प्रकाशकः ॥ [१५५] इह शब्दस्य सामान्यवाजप्यायनमते स्य०

३६

। प्रविभाग २

नार्थः। व्यक्तिर्वाप्यादिमते नार्थः। तत्रेह सामान्यमात्रं वा व्यक्तिमात्रं वा तत्सम्प्रयोजकमर्थत्वेनावबुध्यते। विशेषास्तु नान्तरीयकतया तत्तोवगम्यन्ते। त
तः शब्दस्यादृष्टव्यभिचारं सामान्यमात्रमेवार्थः। यथा संयोगिनो द्रव्यविशेषाः सूक्ष्मामरणादय उपलक्षणमात्रभावेन गवादीनामर्थानां स्थि
ताः न गवादिशब्दवाच्या भवन्ति। तथान्तरङ्गा अप्याकारवर्णसंस्थानादय इति न तेषामसौ प्रकाशक उच्यते।[१५५] एतदेव स्फुटीकर्तुमाह॥॥ आ
कारवर्णावयवैः संसृष्टेषु गवादिषु शब्दः प्रवर्त्तमानोपि न तानङ्गीकरोत्यसौ॥[१५६] आकारादयो व्यभिचारित्वाच्छब्दवाच्या न भवन्तीत्यर्थः १५६
। नन्वाकारवाचकानां स्थूलह्रस्वकर्बुरशबलादीनां शब्दानां किमाकारादिवाचकत्वं नाङ्गीकार्यमेवेत्याशंक्याह॥॥ संस्थानवर्णावय
वैर्विशिष्टेः प्रयुज्यते शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते॥[१५७] स्वशब्देनाकारादय उच्यन्त एवेति न सर्वत्र वयं तदप्रतीतिं ब्रूमः। यद्धि प्रयोजकं
शब्दस्य तदेव तस्य वाच्यम्। अन्यन्नान्तरीयकमिति ब्रूमः। अत आकारादिवाचकानां नावयवमात्रे एकदेशमात्रे प्रवृत्तिरङ्गीकार्या। अतः
शब्दैरर्थस्य क्वचिद्विशेष उच्यते। क्वचित्सामान्यमात्रं।[१५७] एवं च न शब्दस्य वैरूप्यं प्रत्यक्षमप्यर्थसाक्षात्कारोपनायकमेवमेवार्थस्वरूपपरिच्छेद
कं दृष्टमित्याह॥॥ दुर्लभं कस्यचिल्लोके सर्वावयवदर्शनं। कैश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नोनुमीयते॥[१५८] युगपत्सर्वावयवदर्शनस्यासंभवात्क
तिपयावयवदर्शनेन सकलार्थपरिच्छेदस्तत्रानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति।[१५८] तथैव शब्दादेकदेशावसा

येननित्यसहचारिधर्मीनतावगमोजायतइत्याह॥॥ पयाजात्यतैलादीनांगंधेनसहचारिणोनित्यसंबंधिनांदृष्टगुणानामवधारणं॥जातिगंधउप
लगंधइतिशब्दाद्विशिष्टस्यगंधमात्रस्यावगतिःतत्सहचारित्वस्पर्शाद्यवधारणंतत्रनांतरीयकेनमुख्यमितिबोद्धव्यं॥तेनघ्वशब्दोपरामृष्ट
विशेषेवस्तुमात्रएवप्रवर्त्ततइत्याह॥॥ संख्याप्रमाणसंस्थाननिरपेक्षःप्रवर्त्तते॥बिंदौचसमुदायेचवाचकःसलिलादिषु॥ एकापिजलकणि
काऽपोबहलमपिसरित्स्रोतस्त्वंथेवोच्यते॥एकापिशिलाप्रसुप्ताहिमवानपिप्रसुप्तइतिशब्दाःप्रयोजकमात्रमेवजात्यादिकंस्वार्थीकृत्यप्र
वर्त्तंतेआकारादिविशेषावभासस्तुनांतरीयकइतिस्थितं॥ननुसमुदायेषुहिदृष्टाःशब्दाअवयवेष्वपिवर्त्तंतेयथातैलंभुक्तंघृतंभुक्तंशुक्लो
नीलःकपिलइत्युक्तेतदेतत्कथं॥उक्तंचात्रजातिगुणशब्देषुप्रवर्त्तिभेदोविवक्षितः॥तेजातिगुणसंबंधभेदमात्रनिबंधनाः॥तथानेक्षितोजा
तिशब्दानांसमुदायानुपातिता॥जातिमाचक्षतेतेहिव्यक्तौवाजातिसंगता॥इति॥इहचसंख्याप्रमाणसंस्थाननिरपेक्षःप्रवर्त्तते॥बिंदौचस
मुदायेचवाचकःसलिलादिषुइति॥तदेतद्दाशंकाह॥॥ संस्कारादिपरिछिन्नेतैलादौयोव्यवस्थितः॥ आहैकदेशंतत्वेनतस्यावयववर्त्तिता॥१५॥
संस्काराःप्रघातादिपरिछिन्नेतैलादौतैलघृतादिःशब्दोव्यवस्थितोसावेकदेशंसमुदायाध्यारोपेणाह॥एतदुक्तंभवति॥नतेजातिशब्दाः
अपितुतत्सदृशाएवतेनियतपरिमाणाभिधायिनस्तदध्यारोपेणतदेकदेशवाचिनउच्यंतइति॥अतस्तेषामवयववर्त्तिताभाष्येउक्तेतिनक [redacted]

श्चिद्दोषः ॥ उक्तं च ॥ संस्कारादुपघाताद्वा वृत्तो रूपपरिमाणकोनेलादौ जातिशब्दो समस्तादवगम्यत इति । एतदर्थपरमार्थतत्त्वं बोद्धव्यमित्याह ॥
येनार्थेनाभिसंबद्धमभिधानं प्रयुज्यते तादर्थ्यापगमे तस्य प्रयोगो विनिवर्त्तते ॥ येनार्थेन जात्यादिना प्रयोजकेन वक्तुरिच्छया धर्मान्तर्भावेन प्रयु ७२
ज्यमानोपि शब्दो न तेषां सर्वेषां नियमेन प्रत्यायनं करोतीत्याह ॥ ॥ योग्यत्वसंभविनो धर्मानन्तर्णीय प्रयुज्यते । शब्दस्तेषां न सान्निध्यान्नियमेन व्य
पेक्ष्यते । एतदेवान्वयव्यतिरेकाभ्यां स्फुटीकुर्वन्नाह ॥ ॥ यथा गोमशकादीनां व्यभिचारेऽपि दृष्ट एते । गोशब्दा न तथा जातेर्विप्रयोगे प्रवर्त्तते । उपसं
हर्तुमिदानीमाह ॥ ॥ तस्मात्संभविनोर्थस्य शब्दात्संप्रत्यये सति । अदृष्टविप्रयोगोर्थः संबंधित्वेन वर्त्तते । ये यत्नेनादृष्टविप्रयोगो जात्यादि
रेव शब्दस्य संबंधित्वेन वाच्यत्वेन गम्यत इति बोद्धव्यं । एवं नामपदस्यार्थविचारं कृत्वेदानीं तस्यैव भागार्थविचारं प्रस्तौति । तत्र प्रत्ययभागस्या
र्थविचारं तावदाह ॥ ॥ वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः । तेन प्रत्ययभागस्य संख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वार्था इति शेषं ॥ ०॥
इदानीं प्रकृतिभागस्यार्थमभिधातुं प्रकृतिप्रत्ययसमुदाय एव संख्यादिविशिष्टस्यार्थस्याभिधायक इत्याह ॥ ॥ स्याद्वा संख्यावतोऽर्थस्य समुदा
योऽभिधायकः । अथवा संख्याद्युपलक्षितमेवार्थं प्रकृतिप्रत्ययसमुदायोऽभिधत्त इत्यभिधातुमाह ॥ ॥ विना संख्याभिधानाद्वा संख्याभेदसम
न्वितानार्थानित्स्वरूपभेदेन काश्चिद्दाङ्गवादयः ॥ स्वरूपभेदेन द्वित्वादिभेदेनेत्यर्थः ॥ न तु यदा शब्दानित्यसंबंधाविवेकेन ज्ञातः शक्तयः

स्वार्थस्य प्रतीतेर्न तदा कथमेतदवगतमयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इत्याशंक्यापोद्धारस्यान्वयव्यतिरेकौ निमित्तमिति प्रतिपादयितुमाह ।। ।। ये शब्दानि
त्यसंबंधा विवेकेस्नातं शक्यः । अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ।। विवेके सति शब्दार्थविभागे कृते सति च प्रातिपदिके प्रत्यये चासंस
कत्वादिविशिष्टे वृक्षत्वमात्रमवगम्यत इत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्यययोरर्थविभागो व्यवस्थाप्यते ।। न त्वापि शकात्वाशकात्वाभ्या
मन्वयव्यतिरेकाभ्यां वास्त्रिप्रत्ययतत्प्रतिपादने कर्तव्यमित्याह ।। ।। यत्र चाव्यभिचारेणानयोः शक्तिप्रकल्पना । नियमस्तत्र यत्रान्वयव्यतिरेकावु
पलभ्येते तत्रैव नियमः । न तु शक्तेर्विषय इत्याह ।। ।। न त्वेवं नियमानुदृष्टवादिषु भिवतामन्त्रीसाद्दावसति तुडाद्दावर्ष्मदर्शनाद्वृक्षाणां
पचतीत्यादौ तस्य साहाय्यमात्रे स्थापितेन पृथगर्थतेति उक्तं च ।। भावकर्मकर्त्तारः सर्वधातुकार्था इति चेदकाद्दिबद्धेषु नियमानुप
पत्तिरनर्थत्वात् । विकरणार्था इति चेन्न कृताभिहितेषु विकरणाभावः इति । यत्र तु पृथगेव तयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृश्यते तत्र
पृथगर्थाभिधानमेवांगीकार्यं । न तदुपलक्षणार्थत्वं कल्पनीयमित्याह ।। ।। संभवे चाभिधानस्य लक्षणा तु न कल्प्यते । आपेक्षिको
हि संसर्गो नियतः शब्दशक्तयः ।। प्रकृतिप्रत्यययोः पृथगर्थाभिधानसंभवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः प्रत्य
यार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति नियमकल्पना । ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति रामः

तत्किमित्रिपरस्परापेक्षितया स्वार्थमभिधानमित्याह॥ आपेक्षिकाद्यत्साहित्यस्मात्संसर्गे प्रकृतिप्रत्ययार्थयोः शब्दशक्त्योऽन्वयव्यतिरेकापेक्षितानि
यतारवसातिरिक्त एव प्रतीयंत इति॥ यत्र त्वपेक्षायामपि न पृथगर्थो पलभ्यते तत्रापोद्धारो नाश्रयणीय इत्याह॥ ॥ न कूपसूपयूपानामन्वयो
र्थस्य दृश्यते॥ अतो र्थान्तरवाचित्वे संघाते सव्यपेक्षतो न हि एकाप्रमेकं विद्याकाचिदर्थी नावेदनो प्रजापते निदेवेशकाशकावन्वयव्यतिरेका
वाश्रित्यापोद्धारेण व्याख्यानं पदभागयोः कार्यमित्युक्तं तत्र किं सनिमित्तमथ निर्निमित्तमेवेत्याशंक्य सनिमित्तमेव पदभागयोः पदस्य चा
न्वाख्यानं कार्यमितीदानीमुपपादयितुमाह॥ ॥ अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु। बहूनां संभवेर्थानां निमित्तं किंचिदुच्यते॥ यत्र व
लबहूनि निमित्तानि संभवन्ति तत्र किंचिदेवान्वयेन नाश्रित्य व्याख्यानं क्रियत इत्युच्यते। एतदेव दर्शयितुमाह॥ ॥ वेरवाशिष्ठगिरिशास्त्वथै
कागारिकादयः। केश्चित्कथंचिद्व्याख्याता निमित्तावधिसंकरैः॥ वीरस्यदं वेरवीरया वा। तथा वसिष्ठस्यदं वासिष्ठं न कृतं प्रोक्तं वा वासिष्ठं। गिरौ
शेत इति गिरिशः ऽस्य च्छंदसीति डप्रत्ययः ऽथवा गिरिं श्यतीति आतोनुपसर्गे क इति के गिरिशः इत्येवं निमित्तावधिसांकर्येण व्याख्याने कृतोनेनु
निपतनमेव निमित्तमत्र किंचिदुच्यतामित्याशंक्यो पायानामनिपतत्वादनियतमिति प्रतिपादयितुमाह॥ ॥ यथा पथः समाख्यानं वृक्ष
वल्मीकपर्वतैः। अविरुद्धं गवादीनां भिन्नैर्व्यसहचारिभिः॥ यथा वृक्षादिभिर्भिन्नैरुपाश्रमैर्तैरेवकस्यचित्पथः समाख्यानमविरुद्धं तथा

३६ गवादीनां शब्दानां भिन्नैरेव सह चारिभिरन्वाख्यानं इति बोद्धव्यं [७४] अर्थस्य चावस्थाभेदा बहवः संति येन च सोवस्थाभेदः परिदृष्टस्तेनैवासौ तत्समाख्या
39 नं करोतीत्याह॥ अन्यथा च समाख्यानमवस्थाभेददर्शिभिः। क्रियते किंशुकादीनामेकदेशेवधारणात्॥ [७५] किंशुको नेति किंशुकशब्दं प्रयुंजते इति भिन्नमे
व निमित्तं एतदेव वक्तीकर्तुमाह॥ ॥केश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः। गवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितं॥ [७६] गोलक्षणस्यार्थस्य नानाविधा
अवस्था दृष्टाः तदनुगमेनैवार्थमाङ्गराचार्याः एवं शब्दस्य प्रकृतिवाच्यमेव निमित्तं॥ तत्र च बहुविधनिमित्तप्रदर्शनं॥ इदानीं स्वरूपमेव शब्दानां प्र
वृत्तिनिमित्तमन्वाख्यानायोपादीयत इति पक्षं प्रदर्शयितुमाह॥ ॥गौरित्येव स्वरूपाद्वा गोशब्दो गोषु वर्त्तते। व्युत्पाद्यते न वा सर्वं॥ अथ कस्मा
द्गौरित्युच्यते। गौरित्येव हि गौर्गवि वर्त्तत इत्यौक्थिक्याः। अतश्च स्वरूपमात्रमयुक्तं सर्वे शब्दा इत्यसत्पक्ष एवेत्याह॥ व्युत्पाद्यते न वा सर्व
मिति केश्चित्स्वरूपं वाच्यं च निमित्तमुच्यत [illegible] इत्याह॥ ॥केश्चिद्वचोभयथेष्यते॥ [७७] एवं सनिमित्तमन्वाख्यानं निमित्तं च वाच्यं बहुधा केश्चित्क
ल्पितं किंचिदुक्तं॥ स्वरूपं वा निमित्तमुभयथैव वेति दर्शितं [७८] इदानीं किं भिन्नमेव रूपं शब्दस्याहोस्विदभिन्नमिति विचार्यते। यदि भिन्न
मेव तदागमनं गरलं गज इत्यादिषु गादीनां भिन्नत्वाद्भेदेनैवोपादानं प्राप्नोति। ततश्चानंत्याद्दशकात्वमन्वाख्यानस्येत्याह॥ ॥सामान्ये
नोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः॥ जात्यंतरस्य दृष्टापि विशेषाः प्रतिपादकाः [७९] शब्दभेददर्शिने भिन्नानां सामान्यसमाश्रयेण लाघवार्थम्
३६

दुपदेशः शास्त्रे क्रियते। विशेषार्थे तु ऽस्यैव जातं तत्र वक्ष्यति पादकाद्युच्यन्ते॥ एतदेवाह॥ ॥ अर्थान्तरे च यद्वृत्तं तस्य कृत्स्नं तथा विदुः। तुल्यरूपेण तत्
दूरूढावन्यस्मिन्ननुषज्यते। तेनदन्यस्मिन्नृत्यरूपेण रूढावनुषज्यते। रूढो च तुल्यरूपत्वरूपेणान्यस्मिन्नानुषज्यते तेन तत्तल्लिङ्गिन्नमेवासादृश्यात्त्रैकत्वम
न्यतेपरमार्थतत्त्वभिन्नाः शब्दागवादयः स्वतन्त्रमुपजिभिन्ना एवेत्याह॥ ॥ भिन्नाविजियजीधातुर्निष्पन्नो विषयान्तरे। कैश्चित्कथंचित्तु दृष्टो चित्रं हि प्रति
पादनं॥ अन्योयजिरन्यइजिरिति नियतो बोद्धव्यो। इजिः किंस्वेवयजिरन्यत्रादिन्तरस्मिन्निति च्चा चार्यैः पुनः क्वचित्केदाश्रयेणानिर्दिष्टो क्वचिदभेदेनेति प्रति
पादयितुमाह॥ केश्चिदित्यादि। कश्चिद्यजेः कितिसंप्रसारणं शास्ति। इष्टः इष्टमिति। तज्जातेनसन्तत्र्येष्टातिप्रष्टापृष्टं प्रष्टव्यमिति। कश्चिद्दिजिमेवोपदि
शति। तस्य तज्जातीयादेशं विदधाति। इति प्रतिपादनेवैचित्र्यं॥ अवस्थाभेदाश्रयेणापि प्रतिपादनं दृश्यत इत्याह॥ ॥ एवं च बालवायादिजित्वरीवदु
पाचेरत्राभेदाभेदाभ्युपगमेन विरोधोऽस्ति कश्चन। इह विदूरात्प्रभवति वैदूर्यं इह जितेवैदूर्यशब्दं व्युत्पादयन्ति। न च विदूरादसौ प्रभवति। बालवायाद्दुत
तो विदूरे केवलं संस्क्रियते। तत्रोक्तौ बालवायो विदूरं च प्रकृत्यन्तरमेव वा॥ न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेदिति। बालवायो वृत्तिविषये विदू
रमापद्यते। तत तस्य बालवायात्प्रभवति वैदूर्यमणिरिति सिद्धं। अतो बालवायविदूरयोरभेदोऽभ्युपगतः। अथवान्यो वृत्तिविषये विदूरशब्दउ
च्यते यथा। वणिग्भिर्वाराणसी जित्वरीति। आदिशब्दाद्धि अवगारवणशब्दाविति भेदो वर्ग्नतव्यः। अतो भेदाभ्युपगमे भेदाश्रयणे वा न कश्चिद्दो

४० 40
षः। भेदपक्षाश्रयणेऽवसामान्यमाश्रित्य लाघवेनोपदेशः क्रियते। अभेदपक्षे त्वभिन्नरूपसमाश्रयणेनैवेति न किंचिदवद्यं। ततोऽप्रदिशब्दभेदपक्षः तदा धा
तूपसर्गयोः पृथक्त्वकल्पनमित्याह॥॥ अडादीनां व्यवस्थार्थं पृथक्त्वेन विकल्पनं। धातूपसर्गयोः शास्त्रे धातुरेव तु नादृशः॥ अड्द्विर्वचनव्यवस्थार्थं
केवलं धातवः पृथगुपदिष्टाः। वस्तुतः पुनर्विशिष्टक्रियावचना एव तदृशा इति सोपसर्गाणामेव धातुत्वं। एतदेव प्रतिपादयितुमाह॥॥ तथाहि संग्रामयतेः सो
पसर्गाद्विधिः स्मृतः। क्रियाविशेषाः संघाते प्रक्रम्यन्ते तथाविधाः॥ असंग्रामयत शूरमिति संग्राममपिषते। सोपसर्गस्यैवाड्द्विर्वचनदर्शनात् सोपसर्गस्यै
वास्य धातुत्वं। अत उपक्रम एव व्यातेविशिष्टैव धातुवाच्या क्रिया निर्वर्त्तयितुमुपक्रम्यत इत्याख्यातानां स्वरूपप्रदर्शनार्थमाह॥ क्रियाविशेषा
इत्यादि। संघाते धातूपसर्गसमुदाये ऽसर्थः। तथाविधा अभिन्ना भिन्ना वा। अतः किं भवतीत्याह॥ ॥कार्याणामन्तरंगत्वमेवं धातूपसर्गयोः॥ ए
वंच धातूपसर्गाश्रयाणि यानि कार्याण्यंतरंगाणि उच्यंते इति पूर्वं तान्येव प्रवर्त्तन्ते। यथा सुडादयः॥ तथाभूतेव च सा क्रिया साधनसंबंधं गच्छती
त्याह॥॥ साधनैर्याति संबंधं तथाभूतैव सा क्रिया॥ तथाभूतैव उपसर्गविशिष्टैव कारकसंबंधमुपगच्छति। एवं चानुभूयत इति कर्मणि लकारः सि
ध्यति। तथा पल्लवुकोरसि दृढतां भरणीया। अड्भ्यासव्यवायेपीत्यनारंभणीयमेवेति स्थितं। उक्तं च॥ कारकाणां प्रवृत्तिर्विशिष्टक्रियायां अन्य
था कृत्वा मां सोढमप्रवर्त्तते अन्यथा च शुष्कोदन इति। इत्युपसर्गसंबंधायाश्च तस्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्वमेवोपसर्गेण संबंधः। इद्दा [redacted] ४०

नोपसर्गधातुः साधनेन युज्यत इति क्रमसमाश्रयणेनाख्यानस्वरूपं प्रतिपादयितुमाह ॥ ॥ प्रयोगार्हेषु सिद्धः सन्नेर्थो विशिष्यते । प्राक्तु साधनसं-
बंधात्क्रियानिवोपजायते । लब्धात्मनस्तस्याविशेष्यत्वोपपत्तेः प्रयोगार्हेषु धातुषु सिद्धः सन्नर्थो भेत्तव्यो विशेष्यो भवत्युपसर्गादिभिः न तु पूर्वकालत्वा-
ख्याते विशेषणयोगः । यदि प्राक्साधनसंबंधात्क्रियाविशेषः स्युच्यते तदानुत्पन्नायास्तस्याः स्वरूपाभावेन कथं विशेषसंबंधः स्यादित्याह ॥ प्राक्चेत्साद्धि ॥
उक्तंच ॥ साधनैः क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टीति पूर्वं साधनसंबंधः ततउपसर्गैस्तद्विशेषणमुपपन्नं । अस्मिंश्च पक्षे ऽभ्यासव्यवायेपि सादेः भणीयं
प्रत्वं तु कोऽप्रसिद्ध इति तु किं कर्तव्य एकदेशासिद्धत्वं न वक्तव्यं प्रत्ययस्तं तदंगत्वात्साधनाभिधायकाद्धातुकाश्रयो गुणः प्रवर्त्तत इति सिद्धौ । अथ पूर्वं धातु-
रुपसर्गेण युज्यत इत्यमुं पक्षं समाधातुमाह ॥ ॥ धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा । धातुत्वं कर्मभावश्च तथान्यदपि दृश्यतां ॥ क्रियावचनो धा-
तुरित्युक्तं । साधनसंबंधाच्च प्राक् क्रियानिर्वृत्तेरसंभवाद्यथा भाविसाधनसंबंधसमाश्रयणेनोपक्रम एव धातुत्वं धातुसंज्ञोच्यते । यथा च धातोः
कर्मण इत्युच्यते कर्मणो धातुरितीषि कर्मत्वस्य भावित्वादुपक्रम एवेषि कर्मत्वमुक्तं । तथान्यदपि दृश्यतो भाविसंबंधादुपक्रम एव विशिष्टक्रियाव-
त्त्वं दृश्यतां को दोषः । एवं च भिन्नपक्षाश्रयणेन तथाविधविशेषनिवर्त्तनं शोभनतरमुच्यते । क्रियाविशेषाः संघाते प्रक्रमं तेन तथाविधाः इति ॥२८६॥
उपक्रम एव चासौ क्रियाविशिष्टे वाभ्युपगंतुमुक्तेति दृष्टांतप्रदर्शनपूर्वकमाह ॥ ॥ बीजकालेषु संबद्धा यथा लाक्षारसादयः । वर्णादिपरिणा-

५१

४१
मेनफलानामुपकुर्वते॥ बीजवापकालएवयथालाक्षारसादयोबीजसंबंधादुत्तरकालंवर्णरसादिपरिणामेनफलोपकारंकुर्वंति। तथादार्ष्टांतिके
योजयितुमाह॥ ॥ बुद्धिस्थादभिसंबंधात्तथाधातूपसर्गयोः॥ अभ्यन्तरीकृतोभेदः पदकालेप्रकाशते॥ धातूपसर्गयोः संबंधबुद्ध्यासमुल्लिखितोयो
ऽन्तर्नीतिः केवलंतस्मात्संबंधात्तयोर्धातूपसर्गयोः संबंधेपदकालेपदनिष्पत्तौससामर्थ्योभेदः प्रकाशतेतेनतुल्यत्वमितीहत्तोपसर्गसंबंधायायाएवसा
धनयोगउपपन्नः॥ एवमपोद्धारपक्षेणाविवाक्येपदस्यपदभागयोः प्रकृतिप्रत्यययोः शक्ताशक्तत्वान्वयव्यतिरेकसमाश्रयरोतेनसन्निमित्तमन्वाख्या
नंकर्तुमनेकधाप्रर्भ्यः क्वचित्त्रिभिन्नस्वरूपंवेसाख्यातोतत्रश्चपदमेकमनेकंचेतिनामपदंलेशतोनिर्णीतं। आख्यातमपिक्रियाविशेषाः संघातैः
प्रक्रमंतेनतथाविधाइत्यादिनाभेदाभेदविचारपूर्वकमपिनिदर्शितमायांइदानींनामाख्यातोपसर्गनिपाताश्चेतिचत्वारिपदजातानीतिनि
रुक्तकारेः तत्रनामाख्यातस्वरूपंप्रदर्शितंउपसर्गाणांप्रदर्शनीयमितितत्स्वरूपंप्रदर्शयितुमाह॥ ॥ क्वचित्संभविनोभेदाः केवलैरनिदर्शिताः॥
उपसर्गाणांसंबंधेव्यज्यंतेप्रपरादिना॥ क्वचित्प्रचलादौप्रकर्षादीनांसंभवात्केवलैस्तैस्तेषामप्रतीतेरुपसर्गसंबंधात्तदवगमइतितेषूपसर्गाणां
विशेषद्योतकत्वमुच्यते। अतएवचोक्तंतमेवविशिनष्टीत्यत्रइति तर्हिद्योतकत्वमेवकिंतेषांआहोस्वित्पक्षांतरमपीत्याह॥ सवाचकोविशेषा
णांसंभवाद्द्योतकोपिवा॥ शक्त्याधानायधातोर्वासहकारीप्रयुज्यते॥ केवलंनद्योतकाः यावद्वाचकाअपिदर्शयते। यथाप्रतिष्ठतइत्यादौधातो [illegible]
४१

गतिनिवृत्तिवाचकत्वेनैव तु गतिवाचकत्वं व्यवस्थाप्यते। तथा चोक्तं। धात्वर्थं बाधते कश्चिद् इति। संभवाद् द्योतकोऽपि वेत्येतद् द्वादिवेवकारिकायां व्या
ख्यातं। अथ तृतीयमपि पक्षं दर्शयितुमुक्तं शक्त्याधानाय इत्यादि। संभूय धातूपसर्गौ वर्थमाहतुरिति शक्तिमात्रमुपसर्गैः कृतं तत्र स्पर्धाभिधाने सहका
रिणा उपसर्गेण। अत्रापि उक्तं कश्चित्तमनुवर्तते इति। प्रतिष्ठत इत्यादौ प्रसिद्धार्थात् गतिनिवृत्तिवाचकत्वे उपसर्गस्य गतिवाचकत्वं स्थापितं। इदानी
मनुमानेन द्योतकत्वमेव सर्वत्रास्य व्यवस्थापयितुमाह॥॥ स्थादिभिः केवलैर्यश्च गमनादिर्न गम्यते। तत्रानुमानाद्द्विविधात्तद्धर्मा प्रादिरुच्यते। १९
तिष्ठतिर्गतिनिवृत्तिं प्रसिद्धामभिदधाति। अतः केवलेनैतेन गमनेन प्रतिपाद्यत इत्यनेकार्था धातव इति कृत्वानुमानाद्गतिवाचकत्वमपि तस्य
व्यवस्थाप्यते। उपसर्गस्तु तद्द्योतक एव। गतिनिवृत्तौ तु प्रसिद्धत्वात्तिष्ठतेः प्रशब्दस्य गतिवाचकत्वमुच्यते। वस्तुतस्त्विमात्त्वनुमानेन प्रादेर्द्योतक
त्वमेव सामान्यतो दृष्टेन विशेषतो दृष्टेन च। तथा हि तत्रेत्यादि। धातुरनेकार्थः उपसर्गश्च द्योतक इत्यनुमानेन व्यवस्थाप्यते। द्विविधमनुमानं भ
वति। विशेषतो दृष्टं सामान्यतो दृष्टं चेति। तत्र विशेषेणोपसर्गाणां द्योतकत्वं। तथा च प्रशब्दो धर्मी॥ आदिकर्मद्योतक इति साध्यो धर्मः प्रशब्द
त्वात्। पूर्वादिति पश्चादिदृष्टप्रशब्दवदिति विशेषतो दृष्टेनानुमानेन तद्धर्मप्रशब्दस्य समानधर्मा सर्वोऽपि प्रादिरुपसर्गो [illegible] द्योतकत्वधर्मयुक्त
उच्यत इति। धातुश्च सामान्यतो दृष्टेनानुमानेनानेकार्थः। यथा। तिष्ठतिर्द्धर्मी॥ अनेकार्थ इति साध्यो धर्मः॥ धातुत्वात्। उभयवादिसंमतयजत्वा

४२ घ्नेकार्थधातुवद्दिति। एवं सामान्यतोदृष्टानुमानान्नहूर्म्यो धातुरप्यनेकार्थ उच्यत इतियोजना। इदानीं सम्प्रयार्थाभिधायकत्वमपि दर्शयितुमा
ह॥ ॥ अप्रयोगेधिपर्योश्चयावद्दृष्टं क्रियान्तरांतस्याभिधायको धातुः सह नाम्नापमनर्थक ॥ अध्यागच्छति पर्यागच्छती सत्राधिपरी अनर्थकावागच्छ
तीत्यस्माद्देवोपरिभावविशिष्टस्य वा सर्वतोभाव विशिष्टस्य वाप्यागमनस्य प्रकरणादिनावगतत्वात्। लौकिकशब्दव्यवहारे लाघवं प्रसना
द्रादिति स्पष्टार्थमेवाधिपर्योः प्रयोगः॥ समुदाय एव विशिष्टार्थाभिधायक इत्यधिपर्योः केवलयोर्धातोश्चात्रानर्थकत्वमनर्थान्तरवाचित्वमित
र्थः। अतो धातूपसर्गौ संभूयैवार्थविशेषं ब्रूत इति धातोरर्थाभिधाने सहकारिण उपसर्गाः। उपसर्गाणां हि द्योतकत्वमेव न तावधिपरी अनर्थकावि
ति केवलानर्थकतया। नहि तयोरुपसर्गयोः केवलयोस्तत्रार्थोस्ति। अत एवोक्तं कश्चित्तमनुवर्तत इति। प्रसंगात्स्वार्थिकप्रत्ययानां स्वरूपमाह॥ ॥ तथै
व स्वार्थिकाः केचित्संघातान्तरहेतवः। अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः॥ यावकः इत्यादौ कनादयः संभूयैवार्थबोधका बोद्धव्याः। यावशब्दा
त्केवलात्प्रयोगे वकन्प्रकृतिर्यावशब्दो व्यवसित इति संघातान्तरहेतव इत्यस्ति बोद्धव्याः। अत एवाह। अनर्थकेन संसृष्टा इति। यावशब्दः कन्प्रकृति
रनर्थक एवासमुदायस्य परस्परशक्ता। हि न विशेषस्तत्रार्थवान्नतासंभूयस्वार्थमाहेत्याह। प्रकृत्यर्थानुवादिन इति। ननु प्रकृतिभागस्येदानीमेवा
नर्थकत्वमुक्तं। अतः कथं प्रकृत्यर्थानुवादिन इत्युच्यते। ताहशपमात्रादिसमिप्रायः। कन्प्रकृतिकेवलयावशब्देन सदृशमभिमन्यत इति ॥ ४२

तदभिप्रायेणामरूक्तस्यर्थात्तुवादिनरस्य क्तोवस्कृतत्वमेघानोनरक्ततयइसेवबोद्धव्यो। अथ निपातानामर्थे नैयत्येन स्वरूपं प्रदर्शयितुमाह॥ ॥ निपाताद्यो-
तकाः केचित्पृथगर्थाभिधायिनः। आगमा इव केपि स्युः संभूयार्थस्य वाचकाः। तेषामुपसर्गवद्द्योतकत्वं क्वचित्प्रयाद्दक्षश्च लक्षस्व सादौ चादौ नो।
केवला नो च केषांचित्पृथगर्थाभिधायित्वं वाचकत्वमेव सिद्धमित्याह। केचिदित्यादि। केचिन्निपाता आगमवत्संभूय वाचकाः। तत्प्रायेषां पृथगर्थ-
प्रकल्पनमिति पाठः। तेषां मते निपातानां द्वैविध्यं। केचिदर्थवंतः केचिदनर्थका इति। तत्र केचिन्निपाताः पृथगर्थप्रकल्पनेन स्वस्वार्थाभिधायिनः।
तेतो द्योतकाः स्वार्थवन्तः स्वरूपकथनं यमे त्वनर्थकास्तेषां स्वरूपमाह। आगमा इत्यादि। निपाता च लौकिके प्रयोगे ऽनियम इत्याह॥ ॥ उपरिष्टात्सत्ता-
द्वा द्योतकत्वेन मिथ्यते। तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा। पूर्वपक्षाद्यप्रयुक्ताः स्तदर्थद्योतनं कुर्वंतीति तेषु विकल्पसमुच्चयाद्येषु द्योतक-
त्वमेव प्रयुज्यमानेषु स्थितं। अथ वाचका एव कस्मान्नोच्यंते। किं द्योतकत्वेनेत्यर्थद्योतकत्वं दृष्टीकर्तुमाह॥ ॥ चादयो न प्रयुज्यंते पदत्वे सति
केवलाः। प्रत्ययो वाचकत्वेपि केवलो न प्रयुज्यते। एते हि चादयः केवला न प्रयुज्यंते। न ते वाचका न भवंतीति बोद्धव्यो। चादयो धर्मी॥ वाचका
न भवंतीति साध्यो धर्मः। केवलानामप्रयोगात्। यदि हि वाचकाः स्युस्तदा गवादिवत्केवलानामपि तेषां प्रयोगः स्यात्। इत्यनुमाने। नन्व-
त्र प्रत्यनुमानमस्ति। चादयो धर्मी द्योतका न भवंतीति साध्यो धर्मः केवलानामप्रयोगात्। प्रत्ययवत्तत्राह। पदत्वे सतीति। एतदुक्तं भवति।

43

४३ 43

ननिर्विशेषणोयंहेतुरपितुपदत्वेसतिकेवलानामप्रयोगात्द्योतकाएतइतिपदत्वेसतीत्यनेनप्रत्ययव्यावृत्तिः।एतदेवदर्शयितुमाह॥प्रसमोवा
चकत्वेपीत्यादि।प्रत्ययस्यकस्यचिद्वाचकत्वेपिपदत्वाभावात्केवलस्याप्रयोगः॥अथशब्दशक्तिस्वाभाव्याच्चादिपदस्यासत्त्वभूतोर्थः पृथगर्थः
नद्वाचकत्वाद्वाचकत्वंव्यवस्थाप्यतेतन्नदनुपपन्नं।शङ्कानुग्रहार्थयथानदर्थवाचकानांसमुच्चयादीनांप्रयोगेषष्ठीश्रूयते।वृक्षस्यसमुच्चयः
प्लक्षस्यसमुच्चयइतिनद्वन्निपातप्रयोगेपिषष्ठीश्रूयेत।वृक्षश्चप्लक्षश्चेतिस्यादेवंयदिसमुच्चयाभिधायकाःस्युः नचैवं।किंतर्हिसमु
च्चिताभिधायिनएतइत्युच्यतेतदभिधानेचव्यतिरेकोनास्तीत्याह॥॥समुच्चिताभिधानेपिव्यतिरेकोनविद्यते॥यद्येवंसमुच्चितस्यसत्त्वभू
तस्याभिधानेऽसत्त्वइतिप्रतिषेधान्निपातसंज्ञाया अभावेनतत्पूर्विकाया अव्ययसंज्ञाया अभावाच्चादेरपिविभक्तेःश्रवणंप्राप्नोतीत्याह॥॥
असत्त्वभूतोभावश्च॥एतदुक्तंभवतिइहशब्देरर्थाभिधानेस्वाभाविकमितिस्थितं॥अत्रनिपाताःशब्दशक्तिस्वभावादेवासत्त्वभूतार्थाभि
धायिनःप्रतीयन्तइतिससनिदर्शनमाह॥॥क्रियात्वेनाभिधीयते॥अत्रयथेत्यनुषङ्गः।यथापाकएवोभयत्रनामपदस्याख्यातस्यचवाच्यः
शब्दशक्तिस्वाभाव्यात्तुपचतीत्याख्यातेनासत्त्वभूतोसावभिधीयते।पाकइत्यत्रनामपदेनपरिनिष्ठितसत्त्वभावसिद्धइति।तद्वन्निपातैःसमुच्चि
तादेरसत्त्वभूतस्याभिधानमितिनविभक्तेरुत्पत्तिः।उक्तंचानेदंवाचनिकं।लिंगसंख्यादिस्वाभाविकमेवातएवाऽऽसमानमधीयानानांकेचिद ४३

१८७

र्थैर्युज्यंते। अपरे नेति। एवं वाचकत्वात्समुच्चिताभिधानेप्याख्यातपदवदसत्त्वभूतार्थाभिधायित्वाद्विभक्त्यभावः। अस्त्वेवमपि समुच्चिताभिधायि
त्वाद्याख्यातेत्वाणां तदभिधायकानां विशेषणेन योगलक्षणानि पातानामपि स्यात् यच गुणवचनानामाश्रयतो लिंगवचनानि भवंती। सत्त्व
वाचकत्वाद्विभक्त्यभावात् शोभनच वृक्षश्च इति प्रयोगोस्ति। तथा चान्यत्रोक्तं। प्रतिप्रयोगं जातं गे संबंधमुपगच्छति। विशेषणानां तेनाधर्मीज्ञाति स्मात्र न ३
तिपद्यते। ततश्च पंचालाजनपदो बहुधनो रमणीयइति भवति॥ अथ त्वेवं तस्य विशेषणानां नजाते: ततः पंचालारमणीयाबहुधनाजनप
दइति भवति। एतदाशंकां समर्थयितुमाह॥ ॥समुच्चिताभिधानेपि विशिष्टार्थाभिधायिनां। गुणैः पदानां संबंधः परतंत्रात्मवाचकः। गुणैर्विशे
षणैः पदानां विशिष्टार्थाभिधायिनां [illegible] संबंध उपपद्यते। निपातानां तु शक्तिस्वाभाव्यात् समुच्चित्वे वि पि नियतपरतंत्रत्वाद्विशेषण
योगोनास्तीति न कश्चिद्दोषः। एतदुक्तं भवति तदपि शक्तिस्वाभाव्यमेवयत्तेषां नित्यपरतंत्रत्वं नामेति ततः समुच्चिताभिधानेपि न केवलः प्रयो ग्र ४
+१९८+ ३ गोन्नापि विशेषणसंबंध इति स्थितं। एवं च नामाख्यातोपसर्गनिपातलक्षणं पदचतुष्टयं व्याख्यातं। अथ कर्मप्रवचनीयाः पंचमं पदमस्तुप
गतमिति तद्विचारयितुमाह॥ ॥ जनयित्वा क्रियां काचित्संबंधं विनिवर्तते। श्रूयमाणे क्रियाशब्दे संबंधो जायते क्वचित्। संबंधाक्छेदहेत
वः कर्मप्रवचनीया इष्यंते यद्दृक्ष्यति संबंधस्य भेदकाइति॥ संबंधश्च सर्वः क्रियाकारकपूर्वको भवति। तत्र काचित्संबंधं जनयित्वा क्रियावि

४४ निवर्त्तते। यथा राजपुरुष इति। अत्र हि राज्ञः पुरुषोऽयं स्मात्स्मा राजा पुरुषं बिभर्त्ति अतो भरणलक्षणक्रियाऽऽश्रया आश्रयिभावलक्षणं संबंधं
५५ जनयित्वा निवृत्ता। क्वचित् क्रियापदे अश्रूयमाणं संबंधमुपजनयति। यथा मातुः स्मरतीति। अत्र हि मातुरिति कर्मपदं। अतो मातृसंबंध
स्मरणमिति निमित्तनिमित्तिभावलक्षणं संबंधं स्मरतिक्रियाऽश्रूयमाणो वजनयति। एतदेवान्यत्रोक्तं। संबंधः कारकेभ्योऽन्यः क्रियाकारकपू
र्वकः। श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते इति। संबंधसामान्ये षष्ठी विभक्तिरुक्ता षष्ठी शेष इति। यद्येवं मातुः स्मरणं सर्पिषो ज्ञान
मित्यादौ सिद्धैवानेन षष्ठीति किमर्थमधीगर्थदयेशां कर्मणीत्यादिप्रकरणारंभ इति प्रसंगाद्विचारयितुमाह॥ तत्र षष्ठी प्रतिपदसमा
सस्य निवृत्तये विहिता दर्शनार्थं तु कारकेऽप्युदाहृतं। मातुः स्मरणमित्यादौ कर्मणि शेषत्वेन विवक्षिते सिद्धैव षष्ठीति पुनः प्रतिपद्य
नाधीगर्थेत्यादिना या षष्ठी विहिता सा नियमाय भवति। कर्मादौ शेषत्वे न विवक्षिते षष्ठ्येव भवति यदन्यत्प्राप्नोति तन्निषिध्यते।
किं चान्यत्प्राप्नोति। लुगादि। न च निदानोच्छेदनं विना न लुगादिनिवृत्तिः कर्त्तुं शक्येति समासनिवृत्तिरेव क्रियते। ततश्च ष
ष्ठ्येव भवति। यदन्यतः प्राप्नोति समासलुगादि प्राप्नोति तन्निवार्यत इत्यतः प्रतिपदं पुनः षष्ठी समासस्य निवृत्तये विहितेति को
हव्यां। अतस्तत्प्रतिपदविधाना च षष्ठी न समस्यत इति नारभणीयमेवा यद्येवं कर्मणीति किं मातुर्गुणैः स्मरणमिति कर्मण्युदा ४४

हृतो मध्याद्गुणानां स्मर्तृत्वमत्वस्यासंभवः तथाशेषत्वस्यापि। यदि शेषत्वेनाप्यविवक्षिताः स्युस्तदा तेषां षष्ठी स्यात्। तत्तीया न भवेत्। ननु तत्त्व
हृङ्गवे कल्पमेतत्स्येमेत तदाशंक्याह। दर्शनार्थत्वात्स्मरणादीनामनुगुणानां स्मरणमित्युक्ते संदिह्यते गुणाः कर्म करणं वेति। तत्रोक्तं गुणैः
स्मरणमिति गुणैरिति करणं यदा शेषत्वेन विवक्ष्यते तदा प्राप्ति पदविधाना षष्ठी मा भूदित्येवमर्थं कर्मणी त्युक्तमिति। हृङ्गवे कल्पाभा
वः। पुनः षष्ठीविधानं समासादिनिवृत्त्यर्थ एवेति स्थितं। उक्तं च॥ साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्राप्ता प्रतिपदं षष्ठी समासस्य
निवृत्तये इति॥ साधनैर्व्यपदिष्टे शेषसंबंधरत्यर्थः। एवं कर्मणोपि शेषत्वेन विवक्षितेन षष्ठी कारकाणां रेत्वकैवेति हृत्तिकारः। तेषाम
तेगुणैः स्मरणे न तु गुणानां स्मरणमिति कदाचिदपि षष्ठी। टीकाकारमते तु करणस्य शेषत्वविवक्षायां गुणानां स्मरणं गुणस्मरण
मित्यपि भवतीति मतभेदः। एवं क्रियया संबंधो जन्यत इति स्थितं ततः किमित्याह॥ ॥ स चोपजातः संबंधो विनिवृत्ते क्रियापदे। कर्मप्रव
चनीयेन तत्र तत्र नियम्यते॥ स च क्रियया प्रजनितः संबंधः तस्मिन्नेवोपजाते यदा क्रियापदं क्वचिन्न श्रूयते तदा क्रियाजनितो यस्मादिति
संदेहे कर्मप्रवचनीयेन तत्र तत्र तस्याः क्रियाया नियम्यत इति संबंधविशेषः कर्मप्रवचनीयैः प्रत्याय्यते। अत एव कर्मप्रोक्तवंतः क्रिया

४५ 45 कृतविशेषसंबंधं द्योतयंतीति कर्मप्रवचनीया उच्यंते। अथ या श्रूयमाणा या क्रियायाः आक्षेपकाः कर्मप्रवचनीयाः कस्मात्नाश्रीयंत इत्याह॥
येन क्रियापदाक्षेपः स कारकविभक्तिभिः युज्यते विपर्ययात्तस्य लिखावनुपसर्गता॥ इह येन शब्देन क्रियापदस्याक्षेपः क्रियते स कारकविभ-
क्त्या युज्यत इति दृश्यतां यथा प्रादेशं विपरिलिखतीति। अत्र विशब्दो मानक्रियाया आक्षेपकः। प्रादेशं विमाय परिलिखतीत्यर्थावगतेः
ततो विमानक्रियया प्रादेशलक्षणं कर्माक्षिप्तमिति तस्य कारकविभक्त्या वहितीयया योगः। यदा च क्रियांतराक्षेपको विशब्दस्तदा
तस्य लिखतसंबंधात्तस्यानुपसर्गत्वमेवातत एव गतिर्गतावितिनिघाताभावः। न त्वकर्मप्रवचनीयत्वं यदि क्रियापदमाक्षिप्य न तदा न द्यो-
गे कारकविभक्तिरेव स्यात्। न तु तस्य कर्मप्रवचनीययुक्ते द्वितीयेति नारंभणीयमेव स्यात्। किंतु संबंधसामान्ये षष्ठी स्यादिति तद्बाधनाय द्वि-
तीयारंभेनानदारंभः शोभेत। क्रियापदाक्षेपकत्वमन्यत्रापि दृष्टमिति तदेव दर्शयितुं कुर्वन्नाह॥ तिष्ठतेरुपयोगश्च दृष्टोऽप्रस्तजयत्रिति। अत्र
प्रत[illegible] जयत्रित्यत्र प्रतिशब्दः स्थितिक्रियाया आक्षेपकः परिदृष्टः देवा अस्माकं प्रतितिष्ठंतः प्रतिष्ठामलभमानानां जयंत्विति तिष्ठतेरु-
पयोगः आक्षेपः परिदृष्टः न याधातुना संबंधेपि सुन्वंतीत्यत्राभिशब्दस्य केवलस्य चाभिमुख्ये वृत्तिः परिदृष्टेति प्रसंगादाह॥ सुन्वंतीत्य[illegible] ४५

स्यसंहितामनुप्रावर्षदित्यत्रापि॥ तत्रहेतुहेतुमद्भावलक्षणव्यतिरेकव्यवच्छेदेऽनुनाकृते हेतुतृतीयैवपरत्वा ६

भिसुर्वीभिः केवलोपिप्रयुज्यते। तदेवं कर्मप्रवचनीयानां संबंधनियामकत्वमन्वर्थसंज्ञाश्रयेणैव स्थापितं। अप्रसत्त्वादीनां तद्रूपत्वासंभवे
कथं कर्मप्रवचनीयसंज्ञा स्यादित्याह॥॥ कर्मप्रवचनीयत्वं क्रियायोगे विधीयते। षत्वादिविनिहत्त्वार्थत्वसत्त्वादीनां विधर्मिणां। अत्र सत्वा ॥२०४॥२
दीनां कर्मप्रवचनीयत्वे विधीयते संज्ञांतरव्युदासाय वेत्यनेनैवैक संज्ञाधिकारात् कृत्स्नपसर्गसंज्ञाभावेन ह्याश्रयं षत्वादिकमुपसर्गादित्या
दिना न भवति। अन्यदपि प्रसंगाद्दाह॥॥ हेतुहेतुमतोर्योगपरिच्छेदेऽनुनाकृते। आरंभाद्बाध्यते प्राप्तातृतीयाहेतुलक्षणा॥ लक्षणेत्थंभू
तेत्यादिना सिद्धानोः कर्मप्रवचनीयसंज्ञा। लक्षणं हि ज्ञापकं यथा तथा हेतुरप्युच्यते। तत्र च यथा ज्ञाप्यज्ञापकभावे वृक्षमनुविद्योत
ते विद्युदित्यत्रानोः कर्मप्रवचनीयसंज्ञा तथा शाकल्यत्यामेमोति। तथा च तृतीयाया अवकाशः धनेन कुलमित्यादि लक्षणेत्थंभू
तेत्यस्यावकाशोऽनुज्ञापकज्ञापकभावलक्षणस्य संबंधस्यावच्छेदकः। यथा वृक्षमनुविद्योतते विद्युदिति। इहोभयं प्राप्नोति। शाकल्य
स्य संहितामनुप्रावर्षदिति। अत्र हेतुमद्भावसंभवात् तृतीयाप्राप्नोति परत्वात्। अनुर्लक्षणे इति पुनर्विधानान्न भवति। एवं कर्मप्र
वचनीयानां प्रासंगिकं विचारं कृत्वा वाचकत्वादिप्रकारत्रितयनिराकरणेन संबंधविशेषकत्वमेव व्यवस्थापयन्नाह॥॥ क्रियाया
द्योतको नायं संबंधस्य न वाचकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदकः॥ २०६॥१ प्रवचनीयादावुपसर्गवन्नायं क्रियाद्योतकः षष्ठ्याप

हेतु ३

४६ वाद्भूतमाचष्टे नीयमेवोक्तः संबंध इति न तस्य कर्मप्रवचनीयो वाचकः। नापि प्रादेशो विपरिलिखतीत्यादौ विशब्दवत् क्रियापदस्याक्षेपकः
॥ किं तर्हि विशिष्टक्रियाजनितो यः संबंध इति संबंधस्य भेदको विशेषकः कर्मप्रवचनीयः। इत्येवमपोद्धारप्रसंगेन पंचधा पदविभागः प्रद
र्शितः। एवं दर्शितं पदप्रविभागमग्रेऽन्यूनसमपंचपदार्थभेदमुपपादयिष्यति। यथा द्विधा केचित्पदं भिन्नं चतुर्द्धा पंचधापि वा। अपोद्धृ
त्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् पदार्थानामपोद्धारो जातिर्द्रव्यमेव वेत्यादि। एवमखंडवाक्यवादिनोऽपोद्धारसमाश्रयेण प्रासंगि
कादिकार्यसमर्थने विहिते तत्प्रसंगात्पदपदार्थपदभागपदभागार्थविचारः कृतः। निरुक्तकारवचनानुसारेण च नामाख्यातोपसर्ग
निपातलक्षणप्रदर्शनं कृतं कर्मप्रवचनीयाः पंचमं पदजातमिति केचित्प्रतिजानत इति तदपि प्रदर्शितं। एवं च दूषिते सुपरपक्षे
सुखपक्षे च दूषणनिराकरणपूर्वकं स्थापिते पुनरप्यखंडपक्षमेव समर्थयितुकामो वार्त्तिकविरोधमाशंक्याह॥ ॥ अनर्थकानां सं
घातः सार्थकोऽनर्थकस्तथा। वर्णानां पदमर्थेनयुक्तेनावयवाः पदे। किंच पदानामर्थयुक्तानां संघातोऽभिधीयते पुनः। अर्थान्तराववो
धेन संबंधविगमेन च। अर्थान्तरस्य संसर्गलक्षणस्यावबोधेन परिग्रहणेन कश्चिद्देवदेवदत्त गामभ्याजेत्यादिकः पदसंघातोऽर्थ
वान् कश्चित्तु दश दाडिमादिः परस्परसंबंधविगमेनानर्थक इति संबंधाद्यपेक्षत्वं तदेव दर्शयितुमाह॥ सार्थकानर्थको भेदः संबंधं गा० ४६

नाधिगच्छति । अधिगच्छतीत्येके कुटीरादिनिदर्शनात् ॥ २०९ ॥ भेदे क्रियमाणे समितियो वर्णसमुदायो सार्थकानर्थकोऽयं यथा कुटीरशब्दे कुटी
शब्दो रशब्दश्च वर्णो संबन्धमनर्थकत्वान्नाधिगच्छतीति केचित् । द्योत्येनार्थेनार्थवत्त्वात्परं संबन्धमधिगच्छतीत्यन्ये ॥ संघातार्थव
त्त्वादवयवार्थवत्त्वमपि दर्शयितुमाह ॥ ॥ अर्थवद्भ्यो विशिष्टार्थः संघात उपजायते । नोपजायत इत्येके समासस्वार्थिकादिषु ॥ २१०
राजपुरुष इत्यादावर्थवद्भ्यः संघातोऽर्थवाननुपजायते । स्वार्थिकादिषु त्ववयवार्थप्रकृतिकमर्थान्तरेणाविर्भूतमिति नास्त्यवयवा
र्थव्यतिरिक्तसंघातार्थस्य संभवः ॥ द्विविधरूपतया व्यवस्थितास्त इत्याह ॥ केचित्तु पृथक्सिद्धार्थभेदे निर्ज्ञातशक्तयः । अन्वयव्यतिरेका
भ्यां केचित्कल्पितशक्तयः ॥ २११ ॥ पुनः सिद्धार्थैर्येषां तेन यथा विधाः । यथा शमीवृक्षो दाडिमीवृक्ष इत्यादयः । कस्मादेवमित्याह । भेद इत्या
दिभेदे वाक्यस्य तिरूपस्याऽविनष्टत्वात्पृथगेव निर्ज्ञातशक्तयः । केचित्तु पश्चादन्वयव्यतिरेकाभ्यां कल्पितशक्तय इति । अ
त्र हि प्रगतेजानुनीयस्य संगतेजानुनीयस्येति प्रसंभोजानुनोः ज्ञुरिति लक्षणानुगमेनार्थः कल्प्यः । न तु पृथग्वा वाक्ये दृष्टस्य जा +२११+२
नुशब्दस्य नष्टत्वात् । तस्मात्संघातार्थवत्त्वादिति भागाः सिद्धमनैकान्तिकं च बोद्धव्यं यदप्युक्तं अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्यय
निपातानामेकवर्णानामर्थदर्शनादिति । तत्राह । शास्त्रार्थ एव वर्णानामर्थवत्त्वे प्रदर्शितः । धात्वादीनां विशुद्धानां लौकिकोऽर्थो न

४७ 47

विघ्नते॥ इत्यत्र द्विनानामर्थश्च केवलानामलौकिकः। प्रातिपदिके लक्षितस्त्वयैवार्थेन विघ्नते। अभिव्यक्ततरो योऽर्थः प्रत्ययांतेषु लक्ष्यते। अर्थवत्ता
प्रकरणादाश्रितः सतथाविधेः॥ वर्णानामर्थवत्त्वाभ्युपगमे पदवाक्ययोरभिधायकताभङ्गः स्यादित्याह॥ आन्यभेदेन चेत्कश्चिद्वर्णैरभ्यः पदवा
क्ययोः। अन्योन्यापेक्षया शक्ता वर्णाः स्यादभिधायकः॥ सबोधः॥ इदानीमतभेदं प्रदर्शयितुमाह॥ वर्णेन केन [redacted] चिन्न्यूनः संघातो योऽभि
धायकः। नचेच्छब्दान्तरमसावन्यून तेन गम्यते॥ यादि केनचिद्वर्णेन न्यूनः संघात इष्टकर्त्रीत्यभिधायकत्वादङ्गीगतिः॥ शब्दान्तरत्व
मेकशब्दत्वं वा यदि न शब्दान्तरत्वमिष्टकर्त्रीत्यभिसाम्यात्तदा न्यूनवर्णोऽपि पूर्णवर्णो निष्कर्त्रीत्यतिशब्द एवगम्यते। तस्मान्न वार्थप्रतीतिरिति बोद्धव्यः॥ २१६॥
एतदेव प्रतिपादयितुमाह। सतस्मिन्नवाचके शब्दे निमित्तान्तराद्यतिमादधतासाक्षादिव व्यवहितं शब्देनार्थमुपाहते॥ यदि केनचिद्वर्णेन न्यूनः
सन्न्यूनवर्णः परिपूर्णे शब्दे वाचकत्वे निमित्तादन्यत्राभ्यासान्म्रतिमुपनयन साक्षादिव व्यवहितम[redacted]प्यर्थं शब्देन स्मृत्युपस्थापितेनोपाह
तेऽसमर्पयतीति। अथ शब्दान्तरत्वं तदा यथा परिपूर्णवर्णो वाचकस्तथा तत्संबंधात्तन्न्यूनवर्णोऽपीति न कश्चिद्विशेषः॥ तस्मात्सदावयवानां
तदर्थप्रतिपादनमनुपपन्नमेवेति प्रतिपादयितुमाह॥ पदवाच्यो यथा नार्थः कश्चिद्गोरखरादिषु। असत्यपि प्रसमे तं तेसमुदाये न गम्यते॥ २१७॥
समान्वितइवार्थात्मा पदार्थैर्यः प्रतीयते। पदार्थदर्शनं तत्र तथैवानुपकारकं॥ गोरखरः कृतसर्पइत्यादौ यथा नैव पदानां वाच्यः कश्चिदर्थो २२०

४७

ऽस्ति॥ सत्यपि वा तत्कृचरमकालेन तदर्थप्रत्यये गौरवदस्मिन्नसमुदाये संगते सर्वथा तेनैवायमर्थोऽवगम्यते जातं तत्समये बहिः पदार्थसंस्पर्शमात्रविरहितेन समुदा
यात्तेत्रावगतेऽर्थे देवदत्तगामभ्याजेत्यादिभिः पदार्थैर्यः प्रतिभालक्षणोऽर्थः समन्वित इव परमार्थतस्तु निर्विभागः पानकरसादिवत्प्रतीयते॥
तत्र पदार्थदर्शनमवयवार्थप्रतिभासेऽनुपकारक एवमेतव्यः। यदि चैतन्नाभ्युपगम्यते तदा समुदायावयवयोर्भिन्नार्थत्वे सति द्वयोः समकालमे
व विरुद्धधर्मसंसर्गः प्राप्नोतीति पदवादिमतं दूषयितुमाह॥ ॥ समुदायावयवयोर्भिन्नार्थत्वे वृत्तिषु युगपद्भेदसंसर्गौ विरुद्धौ वक्तुं योगिणौ॥ वृ
त्तिषु समासादिकासु तुल्यकाले समुदायेन यः पृथक्कवदविभागात्पृथक्स्यार्थस्य प्रतिपादनात्संसर्गः समासार्थः पदेभ्यश्च भिन्नस्यार्थस्य प्रतीतेर्भे
दः संसर्गौ विरुद्धौ युगपत्प्राप्नुतः। न चैतत्प्रयुक्तं प्रतीतभावादिति। पदपदार्थानां च सत्त्वे ध्यादीनां वाक्ये साधनाभिधायित्वं प्राप्नोति। न चैतत्
दृष्टं साधनाभिधायकत्वेन सर्वत्राणां तेषां प्रयोगादर्शनादित्याह॥ कस्य साधनमात्रार्था न ध्यादीनामिकल्प्येत। अप्रयुक्तपदस्यार्थो बहुव्री
हौ कथं भवेत्। अधिरूढीत्यादौ समुदायस्याधिकारणहत्त्वं परिदृष्टं न कदाचिदप्यवयवस्येति। यदि च पदानि सत्यार्थानि विद्यन्ते तदा बहुव्रीहेरर्थो
नावकल्प्येतेत्याह। अप्रयुक्ते सत्यादि चित्रगुरित्यादाववयवानां सत्यार्थत्वे चित्रशब्दस्य गुणः कश्चिदभिधेयो गोशब्दस्य गोजातयः काश्चिदिति सप्र
युक्ते वाचकं पदं यस्यासावप्रयुक्तपदो देवदत्तार्थः कस्याभिधेयः स्यात्। यदि चावयवानामर्थवत्त्वं स्यात्तदा प्रभुः संभुरित्यत्रापि भुशब्दस्यार्थः पृथ
+२२१+२

४८ गुपलम्भेनानचोपलम्भ इति प्रतिपादयितुमाह ॥ ॥ प्रत्येकंत्वाद्यवयवैर्नचास्त्यर्थावधारणं ॥ उपसंहर्तुमाह ॥ तस्मात्संघात एवैको विशिष्टार्थनिबंधनो ॥ २२२
तस्मात्समासेषु विस्पष्टार्थोपस्थापनाद्धवादीनां साधनमात्रार्थवृत्तित्वासंभवाद्बहुव्रीहेरर्थस्यासंगतेः प्रत्युतास्ति साद्वावयवार्थानुपलंभादित्यु
पपत्तिचतुष्टयेन समस्तार्थानां पदानामनुपपत्तेः संघात एवैकोऽखंडः प्रविभागशून्यः स्फोटात्मा विशिष्टस्यैव प्रतिभात्मकस्यार्थस्य निबंधनम
भ्युपगंतुं युक्त इति सिद्धो संघातसाधर्म्याच्च स्फोट एवात्र संघातशब्देनोक्तः। संघातो ह्यवयवैरारब्धो इति संघातसाधर्म्यं इदानीमखंडवाक्या
न्तीयपक्षे परकीयचोद्यस्य कस्याशंकाक्रमेण समर्थयितुमुपक्रमते। तथा च यदि पदार्थानेव विविच्य तेन हादेवदत्तपरस्य तत्त्व विश्रुमित्राभोज्यं तामि
त्यत्र द्वंद्वेनैक एवाखंडः समुदायो वाक्यार्थोभिधीयते। ततश्च पदार्थभेदस्यानभ्युपगमादेकत्वे च सति बहुवचनं नोपपद्यते सा शंका समर्थयि
तुमाह ॥ ॥ गर्गाइत्येक एवायं बह्वर्थेषु वर्तते। द्वंद्वसंज्ञोपि संघातो बहूनामभिधायकः। यथा गर्गस्यापत्यानि बहूनि गर्गा इत्यत्रैकशेषकृते
गर्गशब्द एक एव निरस्तावयवविभागो बह्वर्थवृत्तित्वाद्बहुवचनांतस्तथैव द्वंद्वसंज्ञः संघातो निरस्तावयवभेदोपि शब्दशक्तिमाहात्म्याद्बहुत्व
मभिधत्त इति। सत्यपि बहुवचनेनास्तितावैतावाक्यार्थव्यतिरेकेण पदार्थासंभवात्प्रत्येकं वाक्यपरिसमाप्तियोगात्समुदायस्य च युगपत्प्रत्येकं च न क्रि
यासंभवाद्वाक्यार्थस्यानुपपत्तिरित्याशंकासमर्थनार्थमाह ॥ ॥ यथैकदेशोभुज्यादिः प्रत्येकमवतिष्ठते। क्रियैवं द्वंद्ववाच्येर्थे प्रत्येकं प्रविभज्यते २२४ ४८

द्धुरितो भवति स्फोट स्यापि ध्वनिभि रा ४

पदार्थसद्भावः ॥ २२३ ॥ अथ धवखदिरपलाशाः सिच्यंतामित्यत्र वाक्यार्थव्यतिरेकेण २

ब्राह्मणा भोज्यंतामित्यत्र यथा विनापि वाक्यार्थव्यतिरेकेण पदार्थसद्भावं पदार्थानां भुजिक्रिया प्रत्येकमवतिष्ठते। तथा द्वंद्ववाक्ये समुदायलक्षणोऽर्थः प्रत्ये
कं प्रविभज्यत इति न कश्चिद्दोषः। एतदुक्तं भवति। ब्राह्मणा भोज्यंतामित्यत्र यथा सत्यामपि समुदायप्रतिपत्तावपोद्धारबुद्ध्या प्रकल्प्यावयवान् प्रत्येकं भु
जिक्रिया समाप्यते। तथैव द्वंद्वे द्वंद्वसमुदाये प्रतिपन्ने बुद्धिपरिकल्पितमविभागसमुच्चयेन प्रत्येकं वाक्यपरिसमाप्तिर्बोद्धव्या। पुनरप्याशंकापरिहर्तु
माह॥ यच्च द्वंद्वे पदार्थस्य तत्त्वभेदेन वापेक्षणात्। सापि वावृत्तरूपेऽर्थे सर्वनामसरूपता॥ द्वंद्वांतर्वर्तिनः पदार्थस्य वाक्यार्थव्यतिरेकेण संभवात्सर्वनाम्नाप
रामर्शिनोपपद्यते। यथा जनपदे तदवधेरित्यत्र हि जनपदात्तद्भेदेन परामर्शाच्च तस्मादेवावधिभूतात्तस्य यद्भूष्यते। वाक्यार्थव्यतिरेकेण सति च प
दार्थे कथमसतः सर्वनाम्नाक्षेपणमिति पराभिप्रायमनूद्य समाधत्ते। सापीत्यादिना। नात्र किंचित्सर्वनामविधेयेन तल्लक्षणं एव न तत्र द्वंद्वे पदार्थपराम
र्शः स्यात् केवले वावृत्तिरूपे विशिष्ट एवार्थे वाक्यार्थप्रतिभामात्रेणान्वयात्सर्वनामसारूप्यमात्रमाभाति न तु वास्तवं तत्र तत्पदार्थप्रत्ययः कश्चित्प्रतिप
न्नः। यद्वक्ष्यति। यदंतरालेऽज्ञानं तु पदार्थेषूपजायते। प्रतिपत्तेरुपायोऽसौ सप्रक्रमानवधारणादिति। नन्वसति पदार्थे धवखदिरपलाशाश्छिद्यंतामित्य
त्राक्रमिकनिर्विभागो वाक्यार्थः इष्टस्तत्र च यथैव शब्दादवगतोऽर्थस्तथैवानुष्ठानमिति युगपदेवच्छिदिक्रिया प्राप्नोति न चैवमनुष्ठातुं पार्यत इत्याह॥
यथा च खदिरच्छेदे भागेषु क्रमवांश्छिदिः। तथा द्वंद्वपदार्थस्य भागेषु क्रमदर्शनं॥ यत्रापि भवतः पदार्थवाक्यार्थयोर्भेदः खदिरश्छिद्यतामित्यादौ त

(19)

४८
49
ऽपि पुरुषपदे वानुष्ठातुं न पारिता यावत् खदिरस्य प्रथमं लग्नभागं छिंद इति ततो ऽपरस्मिन् भागे तदनन्तरं सारभागमिति क्रमवर्तिन्येव छिदिक्रिया पर्यवस्यतीति
थैवद्द्वैद्वयपदार्थापोद्धारबुद्धिपरिकल्पितस्य क्रमेणादर्शनं व्यवस्थितिरनुष्ठानमिति यावत्। अथास्मिन् पर्वते खदिरपलाशाश्छिद्यन्तामि
ति खदिरपलाशच्छेदनेन निरूपितं वाक्यार्थं तत्रैकदेशमात्रेऽपि छिन्ने यदा दिष्टं गतं कृतमिति ब्रुवन्ति तदेतद्दर्शने वाक्यार्थैकदेशमुपपन्नमिदि
त्याशंक्याह॥ संघैकदेशप्रक्रान्तात् तथा संघानुपातिनः। क्रियाविशेषान्मन्यन्ते सहत्वावयवे क्रमः॥ यथा ब्राह्मणा भोज्यन्तामित्यत्र संघाता
नुपातिन्यपि भुजिक्रिया तदेकदेशप्रक्रान्ता प्रवर्तिता। अतो भुक्तं ब्राह्मणैरित्युच्यते तेन प्राधान्येन वा समुदायान्तर्गतावयवप्रवर्तितापि शब्दार्थ
परित्यागकारणतां न प्रतिपद्यत इति विज्ञेयं। यदि च परपदार्थासंभवस्तदा पूर्वपदार्थप्रधानो ऽव्ययीभाव उत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिकं
समासेष्वर्थाभिधानमनुपपन्नमित्याशंकापरिहर्तुमाह॥ प्रतिपादयता वृत्तिमबुधान्वाख्यानपूर्विका। वृत्तौ पदार्थभेदेन प्राधान्यमुपदर्शितं॥ वाक्य
पूर्विकां वृत्तिं समासलक्षणमबुधान् प्रतिपादयता तेद्वंद्वेन समासेषु पदार्थप्राधान्यमाचार्येणोपदर्शितं वाक्यपूर्विकामिति यदा वाक्यमेव वृ
शा२ त्तीभवति कार्यवैदन्याख्यानपक्षे तदैवम् क्रमित्यर्थः। एतदुक्तं भवति। अबुधबोधनाय तथा शास्त्रे प्रक्रियामात्रप्रदर्शनं कृतं न पुनस्त
हता वतापरपदार्थसत्तास्युपगता। अब्राह्मणादिष्वेन समासेऽपि पदार्थप्राधान्यं बहुधा भाष्ये विकल्पितं। तदप्यबुधबोधनाय शास्त्रप्रक्रिया ४८
यत्
इत्या।१

मात्रमप्रदर्शनमेवबोद्धव्यमित्याह॥ अभेदादभिधेयस्य नञ्समासे विकल्पितम्॥ प्राधान्यं बहुभाष्येदोषात्कप्रक्रियागतो॥ [228] परमार्थस्त्वेकमेवतत्त्वा
भिधेयरूपंसकलजनप्रसिद्धंस्थितमितिनतत्रकश्चित्पूर्वोत्र। पदार्थव्यवहारउपपद्यतइतिबोद्धव्यं। प्रतिपादयिष्यतिचाशास्त्रेष्वत्रिप्रभेदेनलो
किकोर्थोनभिधीयते। नञ्समासेयत्तत्रत्रयःपक्षाविचारिताइति। अयपदार्थासंभवेप्यत्रिषुजहत्स्वार्थविकल्पोनोपपद्यतेकिल। पदार्थासंभ
वेकुत्रैतदुच्यतइत्याशंक्यसमर्थयितुमाह॥ जहत्स्वार्थविकल्पेचसर्वार्थत्यागमिच्छतां॥ बहुव्रीहिपदार्थस्यत्यागःसर्वस्यदर्शितः॥ [229] यतएवमतएव
नत्यदर्शनाद्याचार्येणात्रिषुजहत्स्वार्थपक्षेसर्वार्थत्यागमिच्छतांबहुव्रीहौसमासेसर्वस्यपदार्थस्यत्यागउपदर्शितः। नत्रहिपदार्थव्यतिरेकेणान्यए
वसमुदायार्थोविशिष्टएवप्रतिभातीत्यतःसर्वप्रानवास्तवःकश्चित्पदार्थव्यवहारोंगीकार्यइति। नदेवंद्वंद्वेबहुवचनंप्रत्येकंवाक्यपरिसमाप्तिःस
र्वनामप्रत्यवमर्शःक्रमेणानुष्ठानमेकदेशानुष्ठानेसमुदायार्थानुष्ठानाभिमानश्चेतिपंचचोद्यान्यपोह्यासमाश्रयणेनाखंडवादिनापरिहृता
नि। बहुव्रीहौचजहत्स्वार्थपक्षेसर्वार्थत्यागोपदर्शनादखंडमेववाक्यमभिप्रेतमितिलक्ष्यते। इदानींसर्वोयंपदपदार्थव्यवहारःकाल्पनिको
ऽसत्यभूतएवनानाविधशास्त्रप्रक्रियामात्रशरणोर्वागेतव्यइत्युपपादयितुमाह॥ शास्त्रेषुकाचित्प्रकृतिरर्थःप्रत्ययेनाभिधीयते। प्रकृतौविनिवृत्तायां
प्रत्ययार्थस्वधातुभिः॥ [230] तथाचपदस्यप्रकृतिभागाश्रितमभिधेयंप्रकृत्यसद्भावेपिप्रत्ययएवाभिदधाति। यथाइयानित्यादौ। तथाप्रत्ययार्थस्वविनि
वृत्तेपिप्रत्ययेप्रकृत्यैवाभिधीयते। यथाहस्त्रिति। [231] पुनर वस्थांप्रदर्शयितुमाह॥ यमर्थमाहतुर्भिन्नौप्रत्ययावेकएवतं। क्वचिदाहपचेतीतिधातुस्ताभ्यां
प्यचा ।

५०
50

विनाक्वचिन्न । तत्र पचन्तीत्यादौ भिन्नो प्रत्ययोऽशिष्टो य प्रमर्थकर्तृलक्षणमाह तुल्यमेवैको प्याह त्रिरूहोतीत्यादौ । क्वचिद्धातुरेव तत्समर्थेताभ्यां विनैवाह ।
अहन्त्वमिद्रुइत्यादाविति किमेतत्सदार्थानां वालवत्येप्रमाणधुरामवगाहतइतिपक्षे किंचिदेतत् शास्त्रप्रक्रियाणामप्यवास्तवत्वमुपपादयि
तुमाह ॥ ॥ अन्वाख्यानस्मृतौ ये च प्रत्ययार्थी निबंधने । निर्दिष्टास्ते प्रकृत्यर्थाः स्मृत्यन्तरउदाहृताः । कस्यांचिच्छब्दानुशासनस्मृतौ ये प्रत्ययवि
धाने प्रत्ययार्थी निबन्धने निर्दिष्टास्त एव स्मृत्यन्तरे प्रकृत्यर्थी निबंधनमुदाहृता इति नास्त्येव नैयत्यं पदपदार्थानां । प्रसिद्धत्वाच्च शास्त्राभ्यासाधिवा
सितमानसाः शास्त्रव्यवहारेषु पदविभागमपि प्रयुंजत एवं यथा उद्धमतीत्येवं प्रयोक्तव्ये उद्धमीति लाघवार्थं प्रयुंजते । तथा करोषि करोमीति प्रयो
क्तव्ये करीति सितदेकदेशमात्रं प्रयुंजत एवेत्यभिधातुमाह ॥ ॥ प्रसिद्धेरूढिमिकीत्येवं शास्त्रेऽभिधीयते । न तु वस्तुभूताः शास्त्रप्रक्रियाः किमिति ना
श्रिता इत्याह ॥ ॥ व्यवहाराय मन्यन्ते शास्त्रार्थप्रक्रियाय ते [२३४] । शास्त्रार्थप्रक्रियाः केवलमबुधानां व्युत्पादनाय प्रत्ययन्ते न शास्त्राणि तत्त्वे वक्तुपायं
ते । [२३५] अथाविद्यैवास्त्यात्मप्रक्रियाभेदेनोपवर्ण्यत इत्याह ॥ शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । यद्येवं किमविद्योपदर्शकशास्त्रप्रक्रियासमाश्र
येण प्रेक्षापूर्वकारिणामित्याह ॥ अनागमविकल्पा तु स्वयं विद्योपवर्तते [२३५] । अविद्योपमर्दे न तु त्तरकालमागमविकल्परहिता शास्त्रप्रक्रियाप्रपंच
शून्या । एतदुक्तं भवत्यविद्यैव विद्योपाय इति । ननु कथमविद्या विद्यास्वरूपविलक्षणा विद्याया उपायः स्यादित्याह ॥ ॥ अनिबद्धं निमित्तेषु नि
रुपाख्यं फलं यथा । तथाविद्याप्यनाख्येया शास्त्रोपायेव लक्ष्यते ॥ [२३६] न हि कारणेषु कार्यं केनचिद्रूपदेशेन रूपेण संबद्धं वक्तुं पार्यते । यत्र यथा कार्य ५०

लक्षणे फले निमित्ते उपकारणेषु पाठ्याविरहितं कारणसमन्वयविरहितमप्युद्भूते न ह्येरणोपजायते नत्थैवाविद्याविलये स्वयं विद्योपावर्त्तमाना शास्त्रा
दुपजायते तिना ख्यातुं शक्यते। केवलमदूरविप्रकर्षेण शास्त्राभ्यासाद्घटसावनुशील्यते। ततो विद्यायाः शास्त्राण्युपायाइव लक्ष्यंते। वस्तुस्थित्या
तु अविवेकादसौ प्रकाशत इति बोद्धव्यो [२३८] शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यत इत्युक्तं। न तु शास्त्राभ्यासान्तिक्रमेणो वलोकस्य वा कश
ब्दार्थप्रतिपत्तिः समीहते इत्याह॥ यथाभ्यासेहि वागर्थप्रतिपत्तिः समीहते। सवानादिरभ्यासो मिथ्याभूत एव स्वाभाविक इव प्रतिभातीत्या
ह॥ स्वभाव इव चानादिर्मिथ्याभ्यासो व्यवस्थितः [२३९]। मिथ्यात्वमेव प्रतिपादयितुमाह॥ उत्प्रेक्षते सावयवं परमाणुमपंडितः। तथावयविनमु
क्तमन्येऽवयवेऽपुनः [२३८]। तारतम्ययोगादपकर्षप्राप्तिपरिमाणस्यानुमाय परमाणुः स्थापितस्तस्याप्यन्यः सावयवत्वमुत्प्रेक्षत इति नास्त्येव पुरु
षबुद्धीनां वास्तवत्वं। अवयविनमप्यवयवान्तरयोगिनमुत्प्रेक्षते। तथा परिमितपरिमाणं घटादिकं दृष्ट्वा लोच्यत इति लोकोऽपि विश्वप्रपंचरूपः
परिच्छिन्नतया व्यवस्थितो ध्यवसीयत इत्याह॥ घटादिदर्शनाल्लोकः परिच्छिन्नो वसीयते। समारंभाच्च भावानामादिमद्वस्तुशाश्वतो। उपायाः
शिष्यमाणानां वालानामपलापनाः। असत्येव र्त्मीनिस्थित्वानन्तः सत्यं समीहते [२४०]। समारंभादुत्पादाच्च भावानामिदं शाश्वतमपि बुद्ध्यादिम
दितिलोकैर्व्यपदिश्यते। तस्मादुपायाः शास्त्राणि जिज्ञासूनामबुधानामपलापनाः प्रतारणा एव बोद्धव्याः। यस्मान्नत्रासत्यरूपे शास्त्रप

५१ क्रियमाणे तेषां ध्वस्तित्वात् अविद्यामुन्नयन्ती प्रत्संविद्यास्वरूपं ब्रह्म समीहते प्राप्नोतीति यावत् ॥ ३४० इदानीं पुनरपि पद पदार्थनिराकरणं प्रति पादयितुमाह ॥ अन्यथा
51 प्रतिपद्यार्थपरिग्रहणपूर्वकं । पुनर्वाक्येन तमेवार्थमन्यथा प्रतिपद्यते । यदि सत्यभूताः पदार्थाः स्युस्तदा पदपदार्थप्रतिपत्त्यवसरे सर्वमन्यथा प्रति
पद्यवाक्यार्थावसरे तत्परित्यागेनान्यथैव प्रतिपन्नं दृश्यमानं नोपपद्यते । एतच्च स्वायेल्कतिनिर्देश्यादिना व्यक्तीकरिष्यति । ३४१ यदि च सत्यभूताः पद
पदार्थाः अभ्युपगम्यन्ते तदा प्रतिषेधो नोपपद्यते । तथा च पदग्रहणपूर्वकमादौ पदार्थः प्रतिपन्नः पश्चाद्वाक्यार्थप्रतिपत्त्यवसरे तदर्थपरित्यागे
नान्य एवार्थ उपजायत इति प्रतिपादयितुमाह ॥ उपात्ता बहवोऽप्यर्था येषां ये प्रतिषेधने । क्रियते ते निवर्तन्ते तस्मात्तासत्त्वनाश्रये ॥ ३४२ इहाश्वधवखदिरपलाशाद्नीया स्फो ५
नेत्यत्र पदार्थप्रतिभासमयेऽन्य एव धवादिच्छेदनलक्षणोऽर्थ उपादीयते पश्चात्प्रतिषेधेन तन्निवर्तनं क्रियते । न चैतद्युक्तं । उपात्तस्य त्यागे शब्दार्थसंबंधस्या
नित्यत्वमापद्येतेति तेषां तत्त्वनाश्रयणमेव युक्तमित्याह ॥ तस्मात्तासत्त्वनाश्रये इति । ३४२ अतो वाक्यवाक्यार्थयोरेव सत्यत्वमत्र युक्तमभ्युपगंतुमित्याह ॥ ॥
वृक्षो नास्तीति वाक्ये च विशिष्टाभावलक्षणम् । नार्थं न तु द्वौ संबंधो निवृत्तेरवतिष्ठते ॥ ३४३ एतद्वाक्यमेवाखंडं विशिष्टाभावलक्षणमिति वृक्षाभावावगतिरूप
स्य वाक्यार्थस्य लक्षणं प्रत्यायकमिष्यते । यदि पुनः पदार्थाश्च व्यतिरिक्तोऽभ्युपगम्यते तदा वृक्षलक्षणो वाक्ये व्यवस्थिते नञ्संबंधस्तस्य नोपपद्यते । तस्य
हि स्वकारणाल्लब्धात्मलाभस्य नञा निवृत्तिः कर्तुं न शक्यते । अथ यासत एव नञा संबंधस्तदाऽसत्त्वादेव निवृत्तेः सा वितिनञो वैयर्थ्यं प्रयुज्यते । सतां च न निषे स्य-
११

धोस्तितोसत्त्वेचनविद्यते।जगत्तेनेनन्यायेननञर्थःप्रलयंगतइतिति।तस्मादर्थस्यस्वतएवनिवृत्तेस्तेनसहनिवृत्तिवाचकस्यसंबंधोनविद्यते। २४३ अथोच्यते।विच्छेदे
नपदार्थविषयास्तिबुद्धिरवच्छिन्नासानञानिवार्यतइत्याह॥॥विच्छेदप्रतिपत्तौचयद्यत्नीत्यवधार्यते।एवंचबुद्धावपिनञःसंबंधोनोपपद्यतइत्याह॥अशब्दवा
च्यासाबुद्धिर्निवर्तेतस्थितातकथं। २४४ नञाशब्दवाच्योर्थःप्रतिषिध्यते।नचबुद्धिःशब्दवाच्या।शब्देनहिबाह्योर्थोभिधीयतेबुद्धिस्तत्त्वार्थालंबनानशब्दाभिधे
यत्वमर्हतीत्यतःकथंनञासाप्रतिषिध्यते। २४४ अथबुद्धिर्ननिवर्तेतेऽपितुतस्यानञामिथ्यात्वमावेद्यतइत्याह॥अथयदुक्तंज्ञानमुत्पन्नेनतन्निषेध्येतिनञाकृतोप
तद्दूपिनिराकर्तुमाह॥नञोव्यापारभेदेस्मिन्नभावावगतिःकथं। २४५ नञएवमात्मकेव्यापारविशेषेबुद्धिनिषेधात्मकेंगीक्रियमाणेतस्मिन्वृक्षस्याभावावग
तिर्नस्यात्।किलपर्युदासेसदृशप्रतिपत्तिविधायिनिनञ्व्याच्यएतदुपपद्यते।प्रसज्यप्रतिषेधेतुनैतदुपपद्यतेवृक्षाभावोहितत्रवाक्यार्थइति। २४५ अथयनि
वर्तमानएवासावर्थोभिधेयःकल्प्यतेतत्राप्याह॥॥निराधारप्रवृत्तौचप्राक्प्रवृत्तेर्नञोभवेत्।आधारमनपेक्ष्यैवनञःप्रवर्ततइतियद्युच्यतेतत्तदा
नञःप्रागेवप्रवृत्तिःप्रयोगःस्यात्।प्रतिषेद्धुमिष्टेसर्वत्रनेत्येवाभिदध्यादिति।अथविषयनियमार्थमाधारप्रयोगोनवृक्षइतिवृक्षस्यनिषेधोनघ
टादेरितिप्रतिपादयितुमाह॥अथाधारःसएवास्य।अत्रापिदूषणमभिधातुमाह।नियमार्थोपिकृतिर्भवेत्।नञैवतदर्थनिषेधेजातेपुनरासौनकृते
र्नियमायवास्यात्।निपातद्योतकाःकेचिदित्यभिप्रायेणाह।नियमद्योतनार्थोवा।अथपर्यानुक्रमप्रविसृष्टार्थपुनर्वचनमनुवादःस्यादित्याह॥॥अनु
२४६

५२ वाचोपवायवेनासर्वथैवमानर्थकमेव पदार्थानां स्यादित्याह॥॥ कश्चिदेवार्थवांस्तत्र शब्दः शेषास्त्वनर्थकाः। नञ्समासेऽश्वादौ नञ एवार्थवत्त्वमितरे
52 षामानर्थक्यं स्यात्तच्चैतदनुपपन्नं। तस्माद्वृक्षो नास्तीत्यस्मादखंडादखंड एव विशिष्टाभावरूपो वाक्यार्थः। नतु न सन्निहितः पृथगेव पदार्थः सत्यमतः क
श्चिदुपपन्नः। अत्रान्यथाप्रतिपद्यार्थमित्येतद्व्याख्यातुमाह॥ ॥विरुद्धं चाभिसंबंधमुदाहार्यादिभिः कृतो वाक्ये समाप्ते वाक्यार्थमन्यथा प्रतिपद्यते॥ उ
दाहार्यादिभिः पदैर्विरुद्धपदार्थप्रतिभासावसरेभिसंबंधमवगच्छति। यथा। उद्दाहारि भगिनियास्त्वं शिरसा तद्वाहे वहसिमा लंसाचीनं कुमनमभिधावे
तमहं सक्षीरित्यादौ तत्कालं वाक्याद्वाक्यार्थप्रतिपत्तावसरेन्यथैवार्थप्रतिपत्तिरिति न पदार्थः कश्चिदुपपन्नः। एतदेवान्यथाप्रतिपादयितुमाह॥॥
स्फुरति निंदाप्रधानेषु वाक्येष्वर्थेन तादृशः। पदानां प्रविभागेन यादृशः परिकल्प्यते॥ स्फुरति प्रधाने वाक्ये किंचिद्भवति यत्र पदार्थानिंदा। इंदोर्लक्ष्म स्म
रविजयिनः कंठमूले मुरारेर्दिङ्नागानां मदमलमषी भांजि गंडस्थलानि। अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्युद्भासंते वद धवलितं किं य
शोभिस्त्वदीयैः। अत्र पदार्थप्रतिभासवेलायां निंदावगम्यते। यस्माद्धे राजन्नलोकमेवोद्धृतां केषरांव हसि। तथाहि न सर्वव्यापि त्वदीयं यशः। यदि हि
तथा स्यात्तदा किमित्यद्यापि प्रसिद्धा एव शशलक्ष्मादयः पदार्थाः श्यामलतयाभासंते। यशसो ह्यवदाततमान्त्वदीयस्य व्यापितायां तथा भासंते श्वेता भवे
युरेवेति पदार्थात्र निंदा। स्फुरति स्फुवाक्यार्थः। तथा चाहे राजन् सर्वमेव जगद्यशसा त्वदीयेन धवलितं केवलं स्वभावस्य दुस्त्यजत्वाद्यदि परं चत्वार्य ५२

ववल्गु नित्रिजगति यशामसृणायुक्तान्तन्त्वत्सर्वमेव त्वदीयेन यशसा व्याप्तमिति। सर्वत्र त्रिलोकामपि प्रथितयशसा पल्लवितमिति वाक्यार्थः॥ निरामधानेत्क
तिः पदार्थो यथा। हे हे त्वा जिनबोधिसत्त्व वचसां किं विस्तरैः सोयपथे नास्ति त्वत्सदृशः परः परहितार्थाधानेगृहीतव्रतः। तथ्यस्त्वां प्रजनोपकारघटनाहेर्मु
प्यलब्धाध्ययशो भारमोह हनेकोषिकृपया सहायकं यन्मतः। अत्र बोधिसत्त्वचरितस्यापि त्वदीयेनानेन नतोयनिधे परार्थसंपादनसाध्वेप
नपराजयमृद्दृतिपदेभ्यः स्तुतिरवगम्यते। वाक्यार्थस्तु निरतिशयगर्हीपात्रत्वप्रतुद्धेखेद्यस्न तद्दृशि। तत्रतश्च पदपदार्थानां वाक्यत्वे कथमेतत्स्वग
च्छतद्दृशिँ अथात्र पदवादिमतमाशंकितुमाह॥ ॥ अथासंसृष्ट एवार्थः पदेषु समवस्थितः। वाक्यार्थस्याभ्युपायो सावेकस्य प्रतिपादनेँ। पदेष्व
र्थोसंसृष्ट एव वाक्यार्थस्यैकस्य संसर्गलक्षणस्य प्रतिपादनेभ्युपायः स्थितः। पदार्थपूर्वको हि वाक्यार्थावसायो व्यवस्थित इतिँ एतन्निराकर्त्तु
माह॥ ॥ पूर्वपदेष्वसंसृष्टो यः क्रमादुपचीयते। छिन्नग्रथितकल्पत्वात्स विशिष्टतरो विदुः॥ ॥ आदौ पदेष्वसंसृष्ट एव स्थितः क्रमाच्च संसृज्योपची
यते यो वाक्यार्थः स विशिष्टतरः सुतरां विशिष्ट एव। कस्मात्तच्छिन्नग्रथितकल्पत्वादिति। पूर्वं छिन्नः पश्चाद्ग्रथितो यस्तत्तुल्यो सावित्यसंसृष्टपदार्थ
पूर्वको वाक्यार्थावसायो नयुज्यत इतिँ नद्देवं प्रकृतिप्रत्यययोः परस्परमेकापायेनाप्यर्थावगतेः उभयतोऽर्थस्य संप्रत्यये सत्येकस्मादेव प्रत्ययात्क
चिदर्थप्रतिपत्तेः प्रकृतिप्रत्ययार्थयोश्चासौ कार्येण शास्त्रेष्वभिधानात् वाक्यार्थस्य च पदार्थप्रतिपत्तिविलक्षणत्वात् तन्न जर्षानुपपत्तेः सर्व

५३ त्रोपात्तमागमसङ्केतोपपत्तिषट्केन । हृत्तिष्ठविहद्द्वार्थोपपादनादिना च पूर्वोक्तेनोपपत्तिचतुष्टयेन समस्तभूतानां पदार्थानामनुपपत्तेः अखण्डपक्षे
53 च प्रतिनिध्यादिचोद्यपञ्चकस्यानेनाहंद्वाभ्ययेण चोद्यसप्तकस्य परिहारेणान्निरवद्यमखण्डमेव स्फोटात्मकं वाक्यं प्रतिभैव च वाक्यार्थ इति स्थितौ इदा
नीमपोद्धारसमाश्रयेणापि पदार्थस्याभ्युपगतत्वात् मुख्यगौणविचारमप्यामन्त्रयितुमाह ॥ ॥ एकमानुपूर्व्येनेकार्थशब्दमनेपरीक्षकाः निमित्त
भेदादेकस्यानेकार्थत्वं तस्याभिधत्ते । अत्रैकशब्ददर्शनमनेकशब्ददर्शनं चेति द्वौ पक्षौ । न चापि पदपदार्थयोः सत्त्वपदवादिमतेन । असत्त्वं च
वैयाकरणमतेनेति चत्वारः पक्षाः । प्रतिक्षिप्तमपि पक्षं व्यवहारार्थमङ्गीकरोसेवटीकाकारः । यतः सर्वपार्षदमिदं हि व्याकरणं शास्त्रोत
त्र चार्थं स्थितः इत्यत्र पुनः पदपदार्थावङ्गीकरोति । तत्रैकशब्ददर्शने शब्दोपचारः प्रसिद्धप्रसिद्धिनिमित्तकः । तत्रैव चार्थोपचारो द्विधा
स्वरूपार्थत्वेन वाह्यार्थत्वेन चेति त्रयः पक्षाः । एवमन्यत्रानेकशब्दपक्षे तैस्त्रिभिः पक्षैश्चत्वारोऽपि पक्षा भेदिता द्वादश संपद्यन्ते इति बोद्धव्यम् । तत्रै
कशब्ददर्शनसमाश्रयणेन तावद्गौणमुख्यविचारमेकमाहुरित्यादिना करोति । सर्वेषां प्रयोगेष्वेक एव गोशब्दो वाचकः । यद्येवं युगपदेव स
र्वार्थप्रकाशनं कस्मान्न करोतीत्याह । निमित्तभेदादित्यादि निमित्तभेदो वक्ष्यमाणस्तस्मात्सर्वार्थमभिधत्त इति । तत्र किं निमित्तमत आह । योग
पद्यमतिक्रमपर्यायेणावतिष्ठते । निमित्तवशान्न युगपत्सर्वार्थप्रकाशनं न करोतीत्यर्थः ॥१०॥ निमित्तभेदमाह ॥ अर्थप्रकरणाभ्यां वा योगाच्छ

२५३ द्वांतो गौणत्वात्॥ यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठत इत्यस्योदाहरणमाह॥ यथा सास्नादिमान् पिंडो गोशब्देनाभिधीयते। तथा स एव गोशब्दो वाहीकेऽपि व्य
वस्थितः। २५४ इत्येवं गौणमुख्यविभागः कृत इत्याह॥ सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः। प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपवर्ण्यते। २५५ सर्वशक्तिमत्त्वे
चानेकधर्मण इत्यनेन व्याख्यातौ। प्रसिद्धिभेदात्प्रसिद्धिविशेषाद्गोजातीये सातिशया गोशब्दस्य प्रसिद्धिः। वाहीके त्वीषदिति। तस्मात्प्रसिद्ध्यप्र
सिद्धिकृतो गौणमुख्यभावः। २५५ तथैकदर्शन एव प्रक्रियां दर्शयति॥ एको मंत्रस्तथाध्यात्ममधिदैवमधिक्रतु। असंकरेण सर्वार्थो भिन्नशक्तिर्व्यव
स्थितः। २५६ तथा चैक एव मंत्रः अध्यात्ममपि जपादौ अधिदैवेऽपि क्रतौ यजनसमयेऽपि विनियुज्यते। भिन्नशक्तित्वादसंकीर्णेन प्रतिनियतार्थतया
व्यवस्थितिं लभत इत्यर्थः। २५६ एवं शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः प्रदर्शितः। एतस्मिंश्च शब्दोपचारे शब्दार्थसंबंधस्यानित्यत्वं स्यादि
त्याशंक्यार्थोपचारमाश्रित्याह॥ गोत्वानुषंगो वाहीके निमित्तात्कैश्चिदिष्यते। अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः। २५७ अर्थः शब्द
स्य द्विविधः स्वरूपं बाह्यश्च। तत्र निमित्ताज्जाड्यादेर्गोत्वं वाहीकेऽनुषज्यते। शब्दस्तु गोत्वमेवाभिधत्त इति बाह्यार्थोपचारः। इयांस्तु वि
शेषः। गौरित्यत्र मुख्यमेव गोत्वं गौर्वाहीक इत्यत्र तूपचरितं न देववाच्यमिति। २५७ अथ स्वरूपोपचारमाह॥ तथा स्वरूपं शब्दानां सर्वार्थेष्व
नुषज्यते। अर्थमात्रं विपर्यस्तं स्वरूपे तु स्थितिः स्थिरा॥ २५८ शब्दानां स्वरूपमेव सर्वत्र वाच्यं तत्तु गोजातीये कदाचिदनुषज्यते। कदाचि

द्वाहीकरत्वनित्यत्वं नास्ति शब्दार्थसंबंधस्याप्रसिद्धप्रसिद्धिकृतस्तु गोणमुख्यविभागो बोद्धव्यः ॥ २५८ ॥ अथानेकशब्ददर्शनमाश्रित्याह ॥ ॥ एकत्वेऽपि सरूपत्वाच्छ
ब्दयोर्गौणमुख्ययोः । प्राकृतत्वं न भेदेऽपि भेदमार्गानुदर्शिनः । भेदमार्गानुसारिणः शब्दभेदवादिनः गोणमुख्यार्थाभिधायिनो गोशब्दयोर्भेदमेवाहुः । नि
त्यार्थभेदाच्छब्दभेदं मन्यन्ते । यतः शब्दार्थयोरिहाध्यासलक्षणः संबंधो व्यवस्थितः । एकत्र चेदध्यस्तस्तस्मिंस्तेनैवाभेदमापन्नः कथमन्येन सहाध्यास
मुपेयादित्यर्थः । तदेवं शब्दभेद एवोपपन्नः । एतच्च भेदाभेदस्वभावे दर्शनद्वयं शब्दानां भाष्यकारेण वार्त्तिकव्याख्यानावसरे दर्शितं । तत्रास्तु के । तत्रा
नुवृत्तिनिर्देशे सवर्णाग्रहणमनर्थकत्वात् । अत्रोत्तरं एकत्वादकारस्य सिद्धमिति । यद्येवं अनुबंधसंकरस्तर्ह्येकाजनेकाज्ग्रहणेषु चानुपपत्तिरित्यादी
नि चोद्यानि प्रापुर्वंतानि तत्रैवैतानि परिहृतानि विषयेण तु नानालिंगकरणात्सिद्धं एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानादित्येवमनेकशब्ददर्शने
स्थापितं । अथानेकशब्ददर्शनमाश्रित्य तत्रैवोक्तं । आन्यभाव्यं तु कालशब्दव्यवायाद्युगपद्देशपृथक्त्वदर्शनादित्येवं भेदाभेदौ शब्देषु व्यव
स्थापितौ । तद्व्याख्यानायेव चटीकाकारस्तत्र तत्र पक्षद्वयदर्शनं करोतीति बोद्धव्यं ॥ २५९ ॥ अथैतदेव शब्दभेददर्शनं प्रसंगाद्वैदिकेष्वपि शब्देषु योजयितु
माह ॥ ॥ सामिधेन्यंतरं चैव माहत्रावनुषज्यते । त्रयोदशैकादश वा सामिधेन्यर्था ऋचः सामिधेन्यः । तत्र त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह । एवं चा
वृत्त्या सप्तदश पंचदश वा सामिधेन्यो भवंतीति स्थितं । तत्रावृत्तं सामिधेन्यंतरमेव विभिन्नस्वरूपमनुषक्तं बोद्धव्यं । न त्वेकैवासौ पुनरावृत्तेति शब्द

भेदवादिनः ॥७०॥ एवं च मन्त्राणामपि भेदमाङ्गीरितिप्रदर्शयितुमाह ॥ मन्त्राश्च विनियोगेन लभन्ते भेदमूहवत् । विनियोगेनाभ्युपयोगादिनोपलक्षिता
अपि मन्त्रा भिन्ना एव बोद्धव्याः । यथा आह देवीरापः शुद्धा इत्यस्माद्दृश्य एव कल्पसूत्रार्थवादोऽप्यूहेनादेव आज्यं शुद्धमित्यादि । एवमूहमन्त्राणामन
न्यत्वं । तथैव विनियुक्तानां मन्त्राणामन्यत्वमेव । अन्ये तु च तेषां किं वेदत्वमस्यान्न वेत्याशंक्य वेदत्वमेव तेषां बोद्धव्यमित्याह । तान्याम्नायान्तरा
णे वपठ्यन्ते कश्चिद्वेदवत् ॥ मन्त्राणां सर्वेषां वेदत्वमेव वा वेदे तु कश्चिदेव मन्त्रः पठ्यते ॥७०॥ न चैतावता तेषामवेदत्वं । अन्यथा वेदे नर्थका एव स
र्वे पठिता इत्याह ॥ अनर्थकानां पाठो वाशेषत्वेन प्रतीयते । उपलक्षणभूता अनधिकारा एव वेदे मन्त्राः पठिताः । तैस्तु विनियोगावसरे प्र
तीयमानानामन्येषामेव वेदत्वं बोद्धव्यं । तदेवमर्थभेदाच्छब्दस्य भेदे मन्त्राणां भेदएवापठितानां चोपलक्षणार्थं नेति प्रदर्शितं । अथ स्वरूपार्थ
मेव पाठः सर्वेषां वैदिकानां केश्चिदुच्यत इत्याह ॥ शब्दस्वरूपमर्थस्तु पाठेन्येरूपवर्ण्यते । न तन्न च सर्वेषां स्वरूपवतां भेद एवेत्याह ॥ अन्यत्र भेदः
सर्वेषां । न तु पठ्यमानानामेव स्वरूपार्थत्वान्स्वरूपवत्तायुज्यते । इतरेषां तु यागाङ्गत्वे विनियुक्तानां कथं स्वरूपत्वमेव स्यादित्याह ॥ तत्र संबंधात्तु
तद्वत्तां । तत्रापि प्रवृत्तिनिमित्तस्य स्वरूपस्यैव विद्यमानत्वात्तद्वत्त्वमेव बोद्धव्यं । तस्मान्मन्त्रेषु संस्कारादिविनियोगभेदात्साठोपलक्षितानां
वा भिन्नानामेव प्रतीतिः । स्वरूपार्थत्वाद्धा भिन्नानामेषां भेद एव मन्तव्य इत्युपसंहर्तुमाह ॥ अन्यासंस्कारसावित्रीकर्म्मणि पन्नामयुज्यते । अन्या

५५ 55

जयमवबंधेषु सत्सु केवलमनीयते। सारूप्यात्त्वेकत्वव्यवहारस्तत्र बोद्धव्यः। तदेवमनेकशब्ददर्शने ऽर्थभेदाच्छब्दभेदे गौणो ऽर्थो ऽन्यः मुख्यो ऽर्थश्चान्य एव किंतु
सारूप्याद् अभेदे मुख्यार्थस्य प्रसिद्धत्वात् तद्धा च कः उपचर्यते एवमेव शब्दोपचार एवं तत्र कल्पयितुं शक्यः। न त्वेकशब्ददर्शन इव शब्दसंबंधस्यानित्यत्वा
दुपचारो ऽर्थस्याश्रीयते। अत एवाभिप्रायवता टीकाकृता तत्र तत्र शब्दोपचारार्थोपचारौ व्याख्यातौ। संबंधास्तु तदुक्ताभिप्रायत्र स्वरूपेण प्रवृत्तिनि ॥२६३॥ानत ३
मित्तेन संबंधः प्रतिपादितः। तदेव च सर्वेषां शब्दानां प्रवृत्तिनिमित्तं बोद्धव्यमिति विस्पष्टयितुमाह॥ अर्थस्वरूपे शब्दानां स्वरूपाद्वृत्तिरिष्यते। अ
र्थस्वरूपे ऽर्थवत्त्वनीतिः यावता न तु सर्वेषां स्वरूपादेव निमित्तात्प्रवृत्तिर्बोद्धव्या। न केवलं पदानां सर्वत्र स्वरूपमेव प्रवृत्तिनिमित्तं यावद्वाक्यरूपस्या
पि शब्दस्य वाक्यार्थे वर्तमानस्य प्रवृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्येति प्रसंगेन प्रतिपादयितुमाह॥ वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्ष
या। इदानीमेकशब्ददर्शने गौणमुख्यविभाग इत्युपसंहरन्नाह॥ अनेकार्थत्वमेकस्य यैः शब्दस्यानुगम्यते। सिद्ध्यसिद्धिकृता तेषां गौणमुख्य
प्रकल्पना। सिद्ध्यसिद्धिभ्यां प्रसिद्ध्यप्रसिद्धिभ्यां तत्र गौणमुख्यविभागो बोद्धव्यः। अनेकशब्ददर्शने ऽपि साहचर्याद् अभेदे पुनरपि प्रसिद्ध्यप्रसिद्धि
भ्यामेव गौणमुख्यविभाग इत्युक्तमेव। अन्योभयत्रापि गौणमुख्यविभागे निमित्तांतरमुपदर्शयितुमाह॥ अर्थप्रकरणापेक्षो यो वा शब्दांतरैः
सहायुक्तः प्रत्याययत्यर्थं तं गौणमपरे विदुः॥ अर्थप्रकरणशब्दांतरसंनिधानान्नि गौणमुख्यभावमुभयत्रापि प्रयोजयंतीत्युच्यते। एतदेव संग्रह ५५

कारिकाश्लोकप्रदर्शनेन संवादयितुमाह ॥ ॥ शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते । स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः ॥ २६७ ॥ एतन्मुख्यार्थशब्दल
+२६७+२ क्षणं गौणार्थशब्दस्वरूपमप्याह ॥ यत्नेनान्यप्रयोगेण यत्नादिव नियुज्यते । तमप्रसिद्धमन्ये तु गौणार्थाभिनिवेशिनः ॥ २६८ ॥ यत्नादिवेति अर्थप्रक
रणादेरित्यर्थः ॥ अथ प्रकारान्तरेण गौणमुख्यविभागमाह ॥ ॥ स्वार्थप्रवर्तमानस्य यस्यार्थो यो ऽवलम्ब्यते । निमित्तं तत्र मुख्यं स्यान्निमित्ती गौण इ
ष्यते ॥ २६९ ॥ यो वाहीके प्रवर्तमानः स्वार्थसास्नादिमति वर्तमानस्य गोशब्दस्य संबन्धिनमर्थं निमित्तत्वेनावलम्बते तत्र विषये मुख्योऽर्थो निमित्तं
स्यात् । गौणस्तु निमित्तीत्युच्यते । एतदुक्तं भवति । यत्रास्वबलङ्गतिः शब्दस्तत्र मुख्योऽर्थः । स्वबलङ्गतित्वे तु गौणार्थतेति बोद्धव्यं । नन्वेतेनार्थो
पचार उक्तः स चैकशब्ददर्शने स्थितः । तत्र यस्यार्थो यो ऽवलम्बत इति शब्दभेद उक्तः स्यात् । असदेतत् । अत्रापि शक्तिभेदाश्रयेणाकल्पितस्य
भेदस्योपपत्तेर्युक्तमेतदिति न कश्चिद्दोषः । अथार्थप्रकरणादेः शुद्धस्य गौणमुख्यविभागहेतुत्वमिति प्रसंगमाह ॥ ॥ पुराणादिति भिन्नेऽर्थे यो
वर्तते विरोधिनि । अर्थप्रकरणापेक्षं तयोरप्यवधारणं ॥ पुराणश्छेदो भाविघ्नहराणीति कलक्षणेषु यथायोगं परस्परविरुद्धेष्वर्थेषु वर्तते ।
न त्वेतयोरर्थप्रकरणादिनार्थनिर्णयः ततस्तत्रापि गौणमुख्यभावः स्यात् । न चैतदिष्टं । अनयोरुभयत्रापि मुख्यार्थत्वमिष्यत इत्यतोऽर्थप्र
करणादीनां केवलानां गौणमुख्यभावो न प्रयोजक इति बोद्धव्यं ॥ २७० ॥ इदानीमपरं पक्षमाश्रित्य गौणमुख्यतामाह ॥ ॥ वाक्यस्यार्थात्पदार्थानामपो

५६ 56 द्वारेण कल्पितेः। शब्दांतरेण संबंधः कस्मैकस्योपपद्यते। २७१ पूर्वमेकशब्ददर्शनेऽनेकशब्ददर्शने वा पदपदार्थयोः सत्यत्वमभ्युपगम्यो कोऽसत्यत्वसत्यो पदपदा
र्थैर्लोके व्यावहार्यस्याखंडमेव वाक्यं वाक्यार्थः स समस्तायकामिति पदपदार्थसद्भावे कीदृशो गोणमुख्यभावः किल गौर्वाहीक इत्यत्र पदपदार्थाभ्युपगमे विह
द्ध सामानाधिकरण्यान्यथानुपपत्त्या गोपदस्योपचरितार्थत्वमुच्यते। यदा तु गौर्वाहीक इत्यनेनाखंडेनैव गोगतधर्मावच्छिन्नो वाहीकलक्षणो
र्थोऽखंड एव प्रतिपाद्यते। तदा पदपदार्थानामसत्यत्वात्कस्यैकस्याविद्यमानस्यैव तथाभूतेनैवं तेन संबंध इति कुतस्त्यो गौणमुख्यविभागः।
सद्भेवमेतस्मिन्पक्षे कथं गौणमुख्यविभागः स्यात् उच्यते। अपोद्धारसमाश्रयणेन पदपदार्थविभागमुपकल्प्य प्रसिद्ध्यप्रसिद्धिनिमित्तको गौण
मुख्यविभागोऽभ्युपगंतव्य इत्यभिप्रायः। ननु स्वतंत्रे पदे पदांतरमंतरेणाप्रयुज्यत एवानन्तत्र वर्तिवः पदपदार्थप्रविभाग इत्याह॥ ॥यच्चाप्येकप
देदृष्टं चरितास्तिक्रियं क्वचित्। तद्वाक्यांतरमेवाहुर्न तदन्येन युज्यते॥ एकं पदं चरितक्रियत्वाद्वाक्यमेवाखंडमिति प्रतिपादयिष्यति। अन्यत्तदन्येन
नैव प्रयुज्यत इति बोद्धव्यं। २७२ एतदेव स्फुटीकृत्य प्रतिपादयितुमाह॥ ॥ यच्चकोयमिति प्रत्यर्थगोरश्व इति वोच्यते॥ प्रष्ण

राम० ५६

एवं क्रियानंतरप्रक्रांता दर्शनारिका॥ कोऽयमिति प्रश्ने दृश्यते भवतीति वा कापि क्रिया गर्भीकृता सैवो ... नरेऽपि गर्भीकृतेति तदपि चरितक्रियमेकं वाक्यमेवेति मत
म्॥ इदानीं सूत्राधिकृतभाव एव ॥ गौणमुख्यविभागकारणं केचिदभ्युपगतमित्याशंकां निराकर्तुमाह॥ ॥नैवाधिकत्वं धर्माणां न्यूनता वा प्रयोजिका। कस्मा
दित्याह॥ ॥आधिक्यमपि मन्यंते प्रसिद्धेर्न्यूनतां क्वचित्॥ औपाधिकत्वादस्याव्यवस्थितत्वमेवेति न तेन गौणमुख्यव्यवहारः कल्पयितुं शक्यः॥ सादृश्यमिदा
नीं निमित्तत्वेनाह॥ ॥जातिशब्दोऽन्तरेणापि जातिं यत्र प्रयुज्यते। संबंधिसदृशाद्धर्मात्तं गौणमपरे विदुः॥ गोशब्दो गोत्वजातिं विनापि स्वव्यक्तिगतगुणसादृश्या
द्वाहीके प्रयुज्यत इति सादृश्यं गौणमुख्यभावे निमित्तं॥ अथ विपर्यासमेव निमित्तत्वेनाह॥ ॥विपर्यासादिवार्थस्य यत्रार्थांतरतामिव॥ मन्यंते स गवादिस्तु गौ
ण इत्युच्यते क्वचित्॥ अर्थस्य वाहीकलक्षणस्यार्थांतरतां गोरूपतां विपर्यासादिव यत्र मन्यते तत्र तस्मिन् वाहीके च को गोशब्दः प्रवृत्तो गौण इति केचिन्मतं। विपर्या
सश्चाध्यवसायेन भवत्याध्यारोपेण च रजतमिदमित्यत्र विपर्ययाध्यवसाय एव। इह त्वध्यारोप्य गोगतान् गुणान् वाहीकेऽध्यवस्यतीत्यध्यारोपितत्वाद्गौणो विपर्य
यः। अतएव विपर्यासादिवेत्युक्तं। तस्मादध्यवसितत्वाद्भावनिमित्तं प्रयुक्तो नास्ति गौणमुख्यव्यवहार इति॥ अथ रूपशक्तिनिमित्तको गौणमुख्यव्यवहार इति
पक्षांतरं दृष्टांतप्रदर्शनपूर्वकं दर्शयितुमाह॥ ॥नियताः साधनत्वेन रूपशक्तिसमन्विताः। यथा कर्मसु गम्यंते सीरासिमुसलादयः॥ खड्गमानेयेत्युक्ते संन
द्धानां संग्रामकथा वर्तत इति रूपशक्तिमाहात्म्यादभिधीयते। एवं सीरादिषु क्रियांतरे लवनाच्छेदादौ नैते यां शक्तयो भवंतीति वक्तुं पार्यते॥ तत स्वरूपेणानिय

॥२७८॥ प्रकृते योजयितुमाह॥ ॥ नथैवरूपशक्तिभ्यामुत्पत्त्या समवस्थितः॥ शब्दो नियततादर्थ्यः शक्त्यान्यत्र प्रयुज्यते ॥२७९॥ +१

५७ 57 तएवकर्मणि सामर्थ्ये मेषां व्यवसीयत इत्याह॥ ॥ क्रियान्तरेण चैतेषां भवंति न हि शक्तयः। रूपादेवनुत्पाद्यर्थ्ये नियमेन प्रतीयते॥ उत्पत्त्या स्वभावेनैव प्रयो
च्यते। औत्पत्तिकः शब्दस्यार्थे न संबंधः॥ सहज एवेति गम्यते। अनेकशक्तिसद्भावे चान्यत्रापि प्रयुज्यते॥ तत्र च गौणमुख्यभावः कथमवगम्यते इत्याह॥ ॥
श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते। तं मुख्यमर्थं मन्यंते गौणं यत्नोपपादितं॥ गौणं यत्नोपपादितमिति ~~हितं चार्थप्रकरणादिकं। अत्रानादि~~
तदभिधानशक्तिसद्भावेप्यप्रसिद्धत्वाद्यत्नेन प्रकरणादिना गौणत्वाध्यवसाय इत्यर्थः॥ तदेवमर्थप्रकरणाद्यंतरसन्निधानमात्रं प्रसिद्ध्यप्रसिद्धिसहितं
चार्थप्रकरणादिकं अत्रानादिसमुच्चयेन अंगांगिभावे नचेति द्वौ पक्षौ॥ न्यूनाधिकभावः। सादृश्यं। विपर्यासः रूपशक्तिः इति सप्त पक्षाः। तत्रार्थप्रकरण
मात्रं पुरःसरं दृश्यादिभिरतिप्रसंगादनिमित्तमेव। न्यूनाधिकभावस्याप्यव्यवस्थितेरनिमित्तत्वमेव। सादृश्यस्यापि कार्यप्रतिहतिः कार्यपदस्यादौ निमित्त
युक्तेपि गौणत्वासद्भावादनिमित्तं तेव परिशिष्यात्प्रसिद्ध्यप्रसिद्धिसहिताः प्रकरणादयः। प्रकरणादिसहिते वा प्रसिद्ध्यप्रसिद्धी॥ विपर्यासो ध्यारोपलक्ष
णो रूपशक्तिरिति चत्वारः प्रकाराः गौणमुख्ययोर्निमित्तत्वेन परिगृहीताः। इत्येतैर्निमित्तैः शब्दोपचारोर्थोपचारो वा स च द्विधा। वाक्यार्थोपचारः स्वरू
पोपचारो वेत्येवं गौणमुख्यविभागो मंतव्यः॥ इदानीमेतदेव लक्ष्ये योजयितुमाह॥ ॥ गोयुष्मन्महतां द्युर्थे स्वार्थोदर्थान्तरे स्थितो। अर्थान्तरस्य तद्भवत्त हेरंबः
त्र मुख्योपि दृश्यते॥ गवादीनां शब्दानां स्वार्थादर्थान्तरे ऽगवाद्यर्थलक्षणे आश्रितपूर्वावस्थोपचरितोत्तरावस्थात्मके स्थितो यद्यत्तोस्त्यामर्थान्तरस्यवा
॥२८०॥

ह्रीकारेस्तद्भावो गवादिरूपतापत्तिलक्षणो यदा तदा गौणोर्थस्तेषां दृश्यत इति बोद्धव्यं। न केवलं गौणार्थस्तदा शावन्मुख्योपि दृश्यत इति बोद्धव्यं। तत्र गो
गोः समपद्यत गोऽभवत् त्वं त्वं संपद्यते त्वद्भवतीत्यत्र गावि अयुष्मदि च गोरूपता युष्मद्रूपता चोत्तरावस्थायां विद्यमानेनैवोपचर्यत इति गौणार्थता। अमहा
न्महान् अशुक्लः शुक्लः संपद्यते महद्भूतश्चन्द्रमाः शुक्लीभवति पट इत्यत्र तत्तरावस्थावस्तुसत्त्वेवेति मुख्य एवार्थ महच्छुक्लशब्दयोः स्थितावितिना स्ति गौ
णत्वम्। ततश्च गोऽभवदित्यत्र गौणार्थत्वादोदंतस्य निपातत्वेप्योदिति प्रगृह्यसंज्ञाप्राप्तानास्त्येव प्राप्तिः। तथा त्वद्भवतीत्यत्रोपचरितस्य युष्मदर्थस्य प्रती
तेर्गौणार्थत्वादेव मध्यमपुरुषस्याप्यभावः। यतो गौणमुख्ययोर्मुख्ये संप्रत्यय इति भाष्ये स्थापितं॥ वार्त्तिककारस्तु गोऽभवदित्यत्र च्व्यर्थवृत्तित्वान्निपातस्य
गोशब्दस्य च्व्यर्थलक्षणां मुख्यमेव सर्वमर्थमवगच्छन् गौणमुख्यभावासंभवमेवाभिमन्यमानः प्रगृह्यसंज्ञानिवृत्तये ओत् च्व्प्रतिषेध इति यत्नमा
स्थितवान्। भाष्यकारस्त्वभिप्रायानभिज्ञ एवं तरं गत्वा द्वे गौणमुख्ययोर्मुख्ये संप्रत्यय इत्येवमत्र प्रगृह्यसंज्ञा न भविष्यतीति वार्त्तिकं प्रत्याख्यातवान्॥ तदे
वं गोऽभवदित्यत्र निपातत्वेपि भाष्यकारमतेन गौणार्थत्वान्न प्रगृह्यसंज्ञा ओतीति तरंगस्य कार्यस्य प्राप्तिरिति स्थितम्। ननु गौणार्थत्वे शब्दानां कार्यप्रवृत्तौ
गोर्वाहीक इति इति गां वाहीकमानयेत्यत्र कथं लेन प्राप्नुतः अत्रस्य उपचरितार्थो गोशब्द इति चेत्। द्विविधं हि शब्दानां कार्यमस्ति प्रातिपदिककार्यं
पदकार्यं च। तत्र पदकार्येषु गौणमुख्यन्यायः न प्रातिपदिककार्येषु। पदस्य भिन्नपदसामानाधिकरण्यान्यथानुपपत्त्या गौणार्थता। प्रातिपदिकस्य

५८ 58 प्रयोगानर्हस्य पदान्तरेण सामानाधिकरण्यासंभवाद्गौणार्थे तानेव निमित्तं तु शक्यते। प्रातिपदिककार्ये च ह्रस्वादिरिति तत्प्रवृत्तेरेव "तदुक्तम" अयोग्यत्वएत
देवं भवतीयद्विशब्दाश्रये शब्दमात्रेण द्रवति। शब्दाश्रये च ह्रस्वादिरिति। तदेवं गौऽभवत्त्वं द्रवतीति चात्र गौणार्थे सिद्ध्यतीत्यं। महद्भूतश्चन्द्रमा इत्यत्र तु
चन्द्रमसः पौर्णमास्यां महत्त्वस्य सद्भावादनुपचरितत्वमिति महच्छब्दस्यान्महत इत्यादिना प्राप्तोऽस्येवात्वमिसात्त्वं कथ्यत्रापि गौणार्थतां प्रतिपादयितुमाह॥
महत्त्वं शुक्लभावं च प्रकृतिः प्रतिपद्यते। भेदेनापेक्षिता सा तु गौणत्वस्य प्रयोजिका॥ २८२ महद्भूतश्चन्द्रमाः शुक्लीभवति पट इत्यत्रापि प्रकृतिर्महत्त्वं शुक्लभा
वं च भेदेनाश्रिता पूर्वावस्थोपचरितोत्तरावस्थतयैव प्रतिपद्यते। तत्तस्याः [illegible] एकएवार्थः तथापि वक्त्रापेक्षिता आश्रिता सती गौणत्वं प्रयोजय
ति। एतदुक्तं भवति। यद्यप्यत्र महत्त्वं शुक्लभावस्य तथैव विद्यते तथाप्यत्र शब्दवृत्त्योऽप्यज्ञ [illegible] तदवस्थेयो ऽतइतितरा [illegible] उपचरितत्वान्महत्त्व
सत भवत्यत्र महच्छब्दस्यासे। शुक्लीभवति पट इत्यस्य कार्ये न किंचिदस्ति अर्थप्रदर्शनार्थं केवलमत्र प्रदर्श्यते। २८३ अथाग्नीषोमौ माणवकाविह्यत्र संज्ञाशा
ब्दानां मुख्यार्थेऽग्ने स्तुतः सोमसोमा इति च कस्मान्न क्रियत इत्याह॥ ॥अग्नीषोमादयः शब्दा ये स्वरूपनिबन्धनाः। संज्ञिभिः संप्रयुज्यन्ते प्रसिद्धे
स्तेषु गौणता॥ २८३ इहाग्नीषोमादयः शब्दा देवतावाचकाः स्वरूपनिमित्तकाः संज्ञाभूतार्थं त्रयं इति त्रिविधाः संभवन्ति। तत्र देवतायां स्वरूपनिमित्तेषु
संज्ञासु चैते मुख्याः एवं तत्र संज्ञायां गौणतेति देवतायामग्नीषोमादयः प्रसिद्धिमुपगताः माणवके चाप्रसिद्धा इत्येवम् प्रसिद्धानां तेषां गौणार्थत्वमुच्य राम०

त्यार्थान्तरमेव तदध्यारोपेण यत्राभिदधति तत्र गौणार्थत्वं स्फुटमेवैते शब्दाः प्रतिपद्यन्ते इति बोद्धव्यम्॥२८४॥ त्र २

तेन तदध्यारोपेणेति बोद्धव्यो अतश्च पत्नीप्रवृत्तिरेवं [२८३] यत्र तत्र तस्मिंस्तदध्यारोपे गौणाग्निषोमादयः प्रवर्त्स्यते तेन तत्र स्फुटैव गौणार्थतेत्यभिसाह॥ ॥अग्निदत्तस्क
दत्तशब्दस्यार्थवृत्ति र्यस्यसतादेशोऽग्निशब्दः २ योऽग्निः स्यात्तत्र स्वार्थोपसर्जनः। शब्दोऽदत्तार्थं वृत्तिलाभे गौणत्वं प्रतिपद्यते॥ [२८४] स्वार्थं देवतालक्षणमुपसर्जनीकृत्य हरिश्चन्द्रो माणवक इत्यत्र स्फुटमर्थनार्थं
प्रस्तोतुमाह॥ ॥निमित्तभेदात्संक्रान्ते शब्दे व्युत्पत्तिकर्मणि। हरिश्चन्द्रादिषु सुटो भावाभावौ व्यवस्थितौ॥ [२८५] हरिश्चन्द्रादिषु सुटो भावाभावौ नियतावेव यस्मा
च्छब्दक्रियायां तत्र निमित्तभेदः समाश्रीयते। कृष्णावना दिम्बते प्रसिद्धो हरिश्चन्द्रः साधुः। हरिश्चन्द्रोपमेये तस्मिंस्तु व्युत्पत्तिकर्मण्यभाव एव सुट इत्यसांक
र्यमेव। अथ यदा पुरातनहरिश्चन्द्रगतगुणसंदर्शनेन साक्षाद्धरिश्चन्द्रोऽयं माणवक इत्युच्यते तदा किं गौणार्थत्वान्न भवितव्यमेव सुटः स्यसांकर्यमाह॥ ॥ दर्शयितुं ५
आख्यातेषामसंस्कारो यः शब्दोऽन्येन युज्यते। तत्रान्तरङ्गः संस्कारो बाह्येऽर्थे न निवर्तते॥ [२८६] हरिश्चन्द्रशब्दस्य बहिष्ठावेव संस्कृतः उत्तरकाले प्राप्तसंस्कारः सन्नसोऽय
दा हरिश्चन्द्रगुणः सधर्मेण यत्र प्रयुज्यते तदान्तरङ्गः संस्कारो वाक्यार्थवेलायामर्थान्तरसंबन्धावसरे न निवर्तत इति वैयाकरणसमयः। यथा करिष्यति श्वः वर्षेण
गमिष्यती त्यत्र श्वः शब्दसंनिधानाद्भविष्यदनद्यतनलक्षणकालप्रादुर्भावे भविष्यत्सामान्यसमाश्रयणेन विहितस्य लृटो न निवृत्तिः शक्या कर्तुमेवमत्रा
पि हरिश्चन्द्रो माणवक इति गौणार्थत्वेऽपि सुट्सिद्धिरेवेति॥ [२८७] इदानीं न्यायदर्शनच्छायया बोद्धव्य एव शब्दार्थे नास्ति कश्चिच्छब्देषु गौणमुख्यविभाग इत्याशङ्क्याह॥
॥ ॥असन्तविपरीतोऽपि यदा योऽर्थोऽवधार्यते। यथासंप्रत्ययं शब्दस्तत्र मुख्यः प्रवर्तते॥ [२८८] इह वस्तुरिक्थस्य विपरीतकर्तेऽप्येकश्चिद्यावच्छब्दः प्रवर्तते तावद्यदा

३

यथावत्त१

५९ 59 यथा विपर्ययेण तथार्थावधारणं क्रियते तत्र यथा संप्रत्ययस्यानुसारेण लोकव्यवहारः प्रवर्त्तमानः सर्वत्र मुख्यतयैव प्रवृत्त इति वा को ऽनयोः शब्देषु गौणमुख्यविभागः क
श्चित् इदानीमत्रापि गौणमुख्यविभागं समर्थयितुं असत्यस्य विभागं तावदुपक्रमितुमाह॥ यद्यपि प्रत्यक्षाधीनमर्थेन त्वावधारणं। न सर्वः प्रत्यक्षस्तस्मिन्प्रसिद्ध
इव जायते। दर्शने सलिले तुल्यं मृगतृष्णादिदर्शनेः॥ तुल्यत्वे दर्शनादीनां न जलं मृगतृष्णिका प्रदसाधारणं कार्यं प्रसिद्धं रज्जुसर्पयोः॥ तेन भेदः परिच्छेद्यस्त
योस्तुल्येपि दर्शने ~~धर्मिणि ज्ञातृकार्यान्तरसंनिमित्ताद्...~~ अपदर्शनस्य विषयाम
त्वेनाप्यसत्यत्वमुपदर्शयितुमाह॥ ॥प्रसिद्धार्थविपर्याससंनिमित्तं यत्र दृश्यते। यस्तस्माल्लक्ष्यते भेदस्तमसत्यं प्रचक्षते॥ यत्र नैमित्तिकदर्शनं प्रसिद्धार्थवि
पर्याससंनिमित्तं प्रसिद्धः सत्स्वरूपो ऽर्थः तस्य विपरीतो यो मिथ्यात्वलक्षणस्तस्य निमित्तं कारणं किंचिद्विषयगतो दोषदूषितः स्यात् तस्माद्भेदो विज्ञेयो लक्ष्यते हि चन्द्र
असत्यं ४ दिः तं तथाभूतं दर्शनविषयं प्रचक्षते। पुनरपि दर्शनभेदमाह॥ ॥यच्च निम्नोन्नतं चित्रे सरूपं पर्वतादिभिः। न तत्र प्रतिघातादिकार्यं तद्व्यवतिष्ठते। पर्वतादि
भिः सरूपं निम्नोन्नतं चित्रभित्तौ दृश्यते। न च तावता तत्र प्रतिघातादिकार्यभेदः। ज्ञानान्तरेण तत्र भेदावगतिरेव सत्यः। एतदेव दृष्टान्तान्तरैः प्रतिपादयितुमाह
॥ ॥स्पर्शप्रबन्धो हस्ते न यथालातचक्रस्य संततः। न तथालातचक्रस्याविच्छेदो ऽस्ति तस्मान्न विषयः कर्त्रा। महता नाक्रियते देशः प्रसिद्धैः पर्वतादिभिः। अल्पदे
शान्तरावस्थं प्रतिबिंबं तु दृश्यते। मरणादिनिमित्तं च यथा मुख्या विषादयः। न ते तस्मादिशुस्यास्य तद्दर्पस्य साधकाः अत्र हस्तिकान्विक्रीणीते अश्वकान् वि हेरंब०
नं स्पृश्यते हि तत्॥२९४॥ वप्रप्राकारतल्पेश्च स्पर्शनावरणे तथा॥ नगरेषु न ते तद्वद्गन्धर्वनगरेष्वपि॥२९५॥ मृगपश्वादिभिर्यावान्मुख्येरर्थः प्रसाध्यते॥ तावान्न मृग

+२९९+२

स्य श्लोक १

२८०

क्षीएगीतद्रसादौ कार्यभेदादेव भेदमवसायकन्यस्य यान्तान्यतिक्रतिवा चक्रानीश्तवानि तिमरगपम्बादिभिरित्यैसायेः। अन्यत्तस्यैवं इदानीमुपसंहर्तुमाह॥ देशका
लेंद्रियगतैर्भेदैर्येदूरस्यतैन्यथा। यथाप्रसिद्धिर्लोकस्य तथा नदवसीयतो देशभेदे नासन्निविप्रकर्षरूपेण कालभेदेन यथा ग्रीष्मे मरीचयो भौमेनोष्मणा स्पंदमा
नादूरस्थस्य जलज्ञानमुपजनयंति। इंद्रियभेदेन यथा तैमिरकस्य द्विचंद्रज्ञानमुपजनयंति। तैर्देशकालेंद्रियगतैर्भेदैरन्यथा दृश्यमानं वस्तु लोकप्रसिद्धिव
शाद्यावृद्धौ राद्धौ प्रत्ययभेदेनार्थक्रियाभेदेन च यथा वदैवे परीक्षेनाध्यवसीयते॥ ततस्ते दम त्रार्थतत्त्वं गोद्व्यमित्याह॥ ॥ अक्षोपघातजेत्तानेयज्ञानमलो
३००
किकं। नताभ्यां व्यवहारोस्ति न्याय्यालोकनिबंधनाः। उपघातजं सत्यतत्त्वविपरीतं तैमिरिकादिज्ञानं अलौकिके च यदपि परमर्षीणां संबंधिज्ञानं ताभ्या[redacted]
मुभाभ्यामपि व्यवहारनिर्वहणमशक्यमित्यतो यथैवाऽविसंवादो लोकप्रसिद्धा सकलव्यवहारनिर्वहणनिपुणं ज्ञानं यथावद्र्थतत्त्वावधारणाय समाश्रीयते॥
यथोक्तं प्रसमाख्येयतत्त्वानामर्थानां लौकिके यथा। व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेदिति। तथैवार्थस्वरूपप्रत्यायनायशब्दा लोकनिबंधना लोकव्यव
त्वा सवल ज नित्वा २ ...हारनिमित्तमस्ताश्च वर्तमानाः प्रसिद्धप्रसिद्धिभ्यामेव सवलक्षतिभ्यां गौणमुख्यविभागमापादयंतीति बोद्धेपि शब्दार्थे व्यवस्थित एव गौणमुख्यप्रवि
३००
भाग इति सिद्धं। एवं गौणमुख्यविभागमुक्त्वा तत्प्रसंगेन च समासान्त्यविभागं विधाय पुनरपि शब्दानां मुख्यानां तरीयकविचारं वैतत्तेन कर्तुमाह॥
घटादिषु यथादीपेनार्थेन प्रयुज्यते। न तोऽस्यापि समाचिव्यात्सकरोतिप्रकाशानौंद्रहयस्सातिपादनायशब्दाः प्रयुज्यंते तत्र तस्य प्रयोजकं मुख्यं। तस्य तिपादनावसरे च सं
पे १ ३०१

स्वार्थानुष्ठापकत्वं प्रयोजकत्वम् १

ज्ञापकहेतुदृष्टान्तकारकहेतुदृष्टान्तरूपेण।

६० निधानाद्यदन्यस्यास्य प्रत्ययति न तत्तस्य नान्तरीयकमुच्यते। एतत्तद्दृष्टान्तद्वयेन प्रदर्शयति। घटादिविषयस्य ज्ञानस्य प्रदीपदृष्टान्ते ज्ञापकदृष्टान्तो प्रदर्शनं। घटादिषु ज्ञा-
तेषु विषयेषु यथा ज्ञापको दीपोऽयं नार्थेन घटादिज्ञापनलक्षणेनान्तः प्रयोजकात्मप्रकाशनं नान्तरीयकं यथा करो एवं दार्ष्टान्तिके योजयितुमाह॥ संसर्गि- ति॥३०१॥ +२
60 ष्वतपार्थेषु शब्दो येन प्रयुज्यते। तस्मात्प्रयोजकादन्यानपि प्रत्याययत्यसौ। यथा भावद्रव्यादावर्थेषु बहुषु संसर्गिषु मध्याद्येनार्थेन सिद्धतादिना सो भावशब्दः प्रयु- सिद्धो धात्वर्थो भावः ३
ज्यते तस्मादन्यानपि लिङ्ग संख्यादीन्नान्तरीयकतयावस्थितान्सन्निधानात्प्रत्याययत्येवेति बोद्धव्यं। कारकहेतुदृष्टान्तोपदर्शनार्थमाह॥ ॥निर्मथनं यथार- इत्यादिको हेतुः कारकहेतुः ४
ण्योरनन्यार्थमुपपादितं। धूममप्यनभिप्रेतं जनयत्येकसाधनं। अरण्योः संबंधि यन्निर्मथनं तदनन्यार्थं अग्निनिष्पत्त्यपेक्षि निस्सप्रयोजकस्य पः। तस्मा-
न्नान्तरीयकतया धूममप्यनुपयोगिनं जनयत्येव। कीदृशमेकसाधनमेकहेतुकमित्यर्थः। अरण्योरित्यनेनोत्तरारणिरधरारणिश्च तत्रोच्यत इति दर्शितं। ३०३॥
पुनरपि दार्ष्टान्तिके योजयितुमाह॥ ॥तथा शब्दोपि कस्मिंश्चित्प्रत्याय्येर्थे विवक्षिते। अविवक्षितमप्यर्थं प्रकाशयति सन्निधेः। कस्मिंश्चित्प्रत्याय्येर्थे सि-
द्धताख्ये धर्मे विवक्षितमर्थं पुंस्त्वैकत्वलक्षणं प्रकाशयति प्रत्यायतिसन्निधानादिति। ननु च वस्तुगतिरीदृश्येव यत्प्रदीपादीनां नान्तरीयकं प्रत्यायनेन
प्रयोजकं प्रकाश्यते तत्सन्निधानान्नान्तरीयकतयाऽन्यदपि घटकुड्यादीति तत्र युक्तं शब्दस्तु स्वसंगतिपादनाय वक्त्रा प्रतिपादयितुमिष्टस्तथैव भूत्वा तत्प्रति- हेरंब ०
पादनं करोतु किं तस्य नान्तरीयकप्रत्यायनेनेत्याशंक्याह॥ ॥यथैवात्यन्तसंस्पृष्टस्य कुसुमर्गो न शक्यते। तथा शब्दोपि संबन्धी प्रविवेक्तुं न शक्यते॥ ३०५

यामत्स्यमांसार्थिना मत्स्यमांसं समस्त एव स्तोकं लक्कं टकादिरनुपयोग्यपित्युक्तुं न शक्यते तेन तथा शब्देऽप्युक्तं न संबंधाल्लिंगसंख्याप्रतिपादकस्तत्र न केवला प्रकृतिः प्रयोक्तव्या
न च केवलः प्रत्यय इति प्रविवेक्तुं परिहर्तुं न शक्यते। ३०५ अत एव तत्रार्थेषु बहुषु संसर्गेषु सन्निहितेषु कः शब्दस्यार्थो वाच्यः स्यादित्याह॥ ॥अर्थानां सन्निधानेऽ
पि श्रुतिर्चैषां प्रकाशने। प्रयोजकोऽर्थः शब्दस्य रूपाभेदेऽपि भिद्यते॥ ३०६ बहूनां संसर्गिणामर्थानां तत्र सन्निधाने तेषां च सत्यपि शब्दादौ पादिवाविशेषेण प्रकाश
ने प्रस्तुतस्य प्रयोजकः स एव वाच्योऽर्थोऽन्योनान्तरीयको न तस्य प्रयोजकत्वं। तत्रापि रूपस्याभेदे समानरूपत्वे [illegible] इति। ३०६ एतदेव वैतत्येन प्रकारभेदप्रदर्शनपूर्वक
माह॥ ॥क्वचिद्गुणप्रधानत्वमर्थानामविवक्षितं। क्वचित्सान्निध्यमेतेषां प्रतिपत्तावकारणं। ३०७ प्रत्वानुपात्तेशब्देन न तत्र कस्मिंश्चित्प्रतीयते। क्वचित्प्रधानमेवार्थो
भवत्यन्यस्य लक्षणम्॥ ३०८॥ अत्र च गुणप्रधानता विपर्ययः परार्थैकदेशाविवक्षा। सकलपदार्थविवक्षा। उपात्तपदार्थपरित्यागेनैवान्यार्थोपलक्षणमित्येव
मनेन श्लोकद्वयेन प्रकारचतुष्टयस्योद्देशः कृतः। ३०८ अथाद्यप्रकारप्रदर्शनार्थमाह॥ ॥आख्याततद्धितार्थस्य यत्किंचिदुपदर्शकं। गुणप्रधानभावस्य तत्र दृष्टो विप
३०९ र्ययः॥ तेन दीव्यती साख्याततद्धितार्थस्य निमित्तत्वेनोक्तं तत्र स्वतन्त्रक्रियाप्रधानमाख्यातमिति तदर्थस्यैव तद्धितांतादवगतिः स्यात् न तु च तत्र क्रियाप्रधान
त्वेऽपि चाख्यातस्य तद्धितः स्वभावात्साधनप्रधान इति साधनार्थस्यैव प्राधान्येनावगतिरिति तेन दीव्यसादौ निर्देशे गुणप्रधानभावो न विवक्षितः। स्वकरणके दे
वनादिक्रियाकर्तृमात्रमेव तत्र प्रयोजकमिति स एव मुख्योऽर्थः वक्ष्यति च गुणप्रधानतां दधुरुषादिविपर्ययः। निर्दिष्टस्यान्यथात्वास्त्रिनित्यत्वान्न विरुध्यते। प्र

मे १

५ तत्र ह्रस्वस्वरितादीनां कियदुदात्तं कियदनुदात्तम् आदौ किमुदात्तम् अथानुदात्तम् मध्येऽन्ते वेति सन्देहापाकरणायोक्तं। तस्यादित उदात्तम् अर्द्धह्रस्वम्
स्वरसमाहाररूपा भवन्ति॥ तत्र ह्रस्वस्वरितादीनां कियदुदात्तं कियदनुदात्तम् आदौ किमुदात्तम् अथानुदात्तम् मध्येऽन्ते वेति

६१ यानिर्देशमथोः स्युर्येषां शास्त्रे विधायकं। किंचित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनं। यो वेत्तियः पीठद्वयक्रमः तयोरश्वपीठयोः। यथोपलक्षणार्थत्वं तत्पार्थिव
61 नुशासनमिति। अपक्वचित्तानिध्यमिस्येनस्य प्रतिपादनायाह॥ ॥निर्देशो लिंगसंख्यानो सन्निधानमकारणं॥ सिद्धलक्षणो भावो घञादीनां निमित्तले
नाभीष्ट इति तत्प्रतिपादनाय भावइत्यस्मिन्निर्देशे लिंगसंख्ययोर्नान्तरीयकतया प्रतिपन्नावपि सन्निधानमकारणं। न तत्तयोः प्रयोजकत्वमिति यावत्। ननु नां
तरीयकतया प्रतिपन्नौ कथं कचित्सान्निध्यमप्येषां प्रतिपन्नावकारणमित्युक्तम्। प्रयोजकार्थवत्त्व व्यवहारपर्यन्ततायां प्रतिपन्नावकारणमित्यभिप्रायः॥१०॥ उदात्ता
द्यन्नानुपात्तमित्येतस्य प्रतिपादनायाह॥ ॥प्रमाणमर्द्धह्रस्वादस्वनुपात्तं प्रतीयते॥ इह उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं। ह्रस्वदीर्घप्लुताश्च मात्रिक द्विमा
त्र त्रिमात्रलक्षणा उदात्तानुदात्तमर्द्धह्रस्वमिति। अत्र चार्द्धह्रस्वग्रहणमर्द्धमात्रालक्षणस्य प्रमाणस्योपलक्षणमिति तदेव तस्मात्स्वरितो प्रतेइत्यर्द्धह्रस्वग्रहण
प्रतिपाद्यस्य प्राधानस्याविवक्षैवोक्ता। एतदेव प्रदर्शयितुमाह॥ ॥ह्रस्वस्यार्द्धं च यद्दृष्टं तत्तस्याऽसन्निधावपि॥ ह्रस्वस्य लक्षणार्थत्वात्तद्देशाभिधीयते॥ अत्र
ह्रस्वह्रस्वस्यार्द्धं च यद्दृष्टमर्द्धमात्रात्मकं तत्तस्य ह्रस्वस्यासन्निधावपि दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तमुच्यते। कस्मादित्याह। ह्रस्वस्य लक्षणार्थत्वादिति। अ
र्द्धह्रस्वमित्यत्र ह्रस्वग्रहणं मात्राया उपलक्षणार्थं अतो दीर्घप्लुतयोरप्यादिभूतार्द्धमात्रोदात्तं भवतीत्यभिधीयते। किंवदित्याह तद्देवेति। यथा तस्य ह्रस्वस्यार्द्ध हरंब०
मात्रोच्यते तथा तदसंनिधौ दीर्घप्लुतयोरपीत्यर्थः॥ अथवा प्रकारत्रयमत्र प्रतिपाद्यते। तत्राद्यं प्रकारमाह॥ ॥दीर्घप्लुताभ्यां तस्यार्थं ह्रस्वग्रहणेन तु कालो उक्त

ति बोद्धव्यम्॥ एतदेवान्ये रुक्तम्॥ अर्द्धह्रस्वमित्यनेनार्द्धमात्रा लक्ष्यते ह्रस्वग्रहणमतन्त्रमिति॥ तस्माद्ध्रस्वस्यात्र लक्षणार्थत्वाद्दीर्घप्लुतयोरप्यर्द्धमा
त्रोदात्ता २

स्वदीर्घप्लुतइत्यनेकयोगनिर्दिष्टत्वाद्दीर्घप्लुतावपि लक्ष्येते। ततश्च दीर्घप्लुताभ्यां तस्यार्द्धस्यावच्छेदः स्यात्। विषमविभागेप्यर्द्धशब्दोर्द्धस्येयामोर्द्धं नगरार्द्धइत्यत्र तथा त्रेति
दीर्घप्लुतयोरप्यर्द्धमात्रेदोत्ता भवति। द्वितीयं प्रकारमाह॥ ॥मात्रयावा विशेषणं। मात्रया अथवार्द्धस्यावच्छेदः। ह्रस्वसंज्ञकत्वस्याविवक्षितत्वात्। एतच्च निदर्शितं। ह्र
स्वस्यार्द्धमित्यनेन। ॥१०॥ अथवा निरस्तावयवविभागोऽर्द्धह्रस्वशब्दोऽखंडएवार्द्धमात्रे जातेः समप्रणादिवदुपलक्षकइति तृतीयमत्र प्रकारमाह॥ ॥जातेर्वालक्षणा
य स्यात्सर्वथा समप्रणवत्। ३१२ इदानीं क्वचित्प्रधानमेवार्थोभवत्यन्यस्यलक्षणमिति व्याख्यातुमाह॥ ॥गंतव्यं दृश्यतां सूर्य इति कालस्य लक्षणे। ज्ञायतां काल इत्ये
तत्सोपायमभिधीयते। ३१३ पथिकैः क्वचिदित्यमभिधीयते सूर्यतामयापरोधा गंतव्यः सूर्यश्च दृश्यतामित्यत्र सूर्यदर्शनप्राधान्येन शब्दः प्रयुक्ता णो ज्ञायतामस्तोया
न्भागोर्द्धः परिशिष्यत इत्यर्थे सस्तोपायस्यास निवृत्तयस्तोपलक्षकः संपद्यत इति प्रधानेनार्थेनान्यार्थोपलक्षणमिति लक्षितं परार्थमुख्यशब्दत्वेपि न स्यैइति॥३१३॥
एतदेव श्लोकत्रयेण शास्त्रलोकयोरुदाहरणेषु वितत्य प्रदर्शयितुमाह॥ ॥विध्यस्य धनुषेत्यत्र विशेषेण निदर्श्यते। सामान्यमात्रमः शक्तेरयः कश्चित्सति
३१४ पादकैः। अथ धनुषेत्यनेन विशेषेण करणसामान्यमात्रं निदर्श्यते। तत्कीदृशमित्याह। शक्तेः करणशक्तेराश्रयोधिकरणमात्रं। ततश्च तस्यायः कश्चित्सतिपाद
कउपादीयते एतदुक्तं भवति। करणनिषेधपरायां चोदनायां धनुर्लक्षणस्य विशेषस्याऽपरित्यागेनैव करणमात्रस्य मुख्यत्वमिति शास्त्रीयमुदाहरणं उक्तं च। वि
धायकरणेनेतीतरथा स्यातिप्रसंग इति। ३१४ विशेषाभिधायकेपि वाक्ये सामान्यमात्रमेव प्रयोजकं लोकेपि दृश्यत इत्याह॥ ॥काकेभ्यो रक्ष्यतां सर्पिरिति बालोपि

६२ चोदितः। उपघातपरेवामेनरत्वा दिम्योनरक्षति। सर्पिषः काकेभ्योरक्षणमत्रविशिष्टमेवविहितमप्युपघातमात्रनिवारणफलंपर्यवस्यतीतितदेवात्र प्रयोज
62 कंचोद्दृश्यं। किंचिसाक्षादनुक्तमपिमुख्यार्थनांतरीयकत्वात्प्रतिपद्यतएवेतिदर्शयितुमाह॥ ॥प्रक्षालनंद्वारवाणांस्थलानांमार्जनंतथा। अनुक्तमपिरू
पेणभुजंगत्वात्स्यतीयते। भोजनमस्योपपाद्यतामित्यत्रभोजनोपपादनंद्वारवः प्रसाद्यंस्तदंगानामासनदानपात्रप्रक्षालनंनांतरीयकत्वात्प्रसाद्यनंक नादी३
रोत्येव। प्रक्षालनइतिवापाठः। द्वारवाणांप्रक्षालनेद्वाद्धेनोपात्तेस्थलानिर्माजनाद्यनुक्तमपि [redacted] संभवाद्भुजंगत्वात्स्यतीयतेएवेति। तदेवंप्रयोजकमिदं
तेषामत्रेदंनांतरीयकमित्येतदेववितत्यप्रसंगादेचित्रेणोपदर्शितं। एवंप्रमाणमर्द्धहस्तादाविस्तारिनाप्रक्षालनंद्वारवाणामित्यंतेनग्रंथेनयत्वंनुगतमभि
मादिश्लोकैर्व्याख्यातः। एतेनश्लोकेनप्रकारद्वयेनलक्षणाप्रदर्शिता। कदाचिन्मुख्यार्थस्यागेनैवान्यस्योपलक्षणमेतदेवाविवक्षितंवाच्यमुच्यते। कदाचिन्मु
ख्यार्थाविरामोपायपूर्वकमन्यार्थोपलक्षणमेतदेवविवक्षितान्यपरंवाच्यमुक्तंवितेयंद्वयेवंमुख्यनांतरीयकविभागउपदर्शितः। अथात्रेदंगौणमिदंमुख्य
मिदंनांतरीयकमित्येवंरूपार्थनिर्णयप्रस्तावेनतन्निरूपणोपायानुपदर्शयितुकामआह॥ वाक्यात्प्रकरणादर्थादौचित्याद्देशकालतः। शब्दार्थाःप्रविभ
भीर ज्यंतेनरूपादेवकेवलात्॥ तत्रवाक्याच्छब्दार्थनिर्णयोयथा। कटंकरोतिभीष्ममुदारंदर्शनीयमितितुस्याद्यामपिभ्रक्तोप्रदाकटस्यैवकरोतिक्रियासंबंधः। तदाद्र
व्यस्यचनिर्गुणस्यानुपपत्तेर्गुणानांचनिरधिकरणानामसंभवात्साकांक्षादिनातत्सामानाधिकरण्यवाक्यात्समन्वयादितिभीष्मगुणान्वितस्यैवकटस्य हेरंब०

करणं वा कारकार्थः। वक्ष्यति च। आश्रयाश्रयिणोर्वाक्यान्निर्णयः स्वत्वनति स्वतेइति। तथा च श्लोके कर्मणि द्वितीयेत्यादीनि इष्यगे व प्रकरणानि विरचितानि तत्र प्रातिपदिका
दनभिहिते कर्मणीत्येवं देकत्वादितत्र द्वितीयाद्या विभक्तयो भवन्तीत्येवमर्थस्य संगतेराकांक्षादिवशाद्भिन्नेष्वपि प्रकरणेषु तात्पर्यालोचनकेन्द्रोनरिवाक्यीयः संबं
धोऽर्थं निरूपणपर्यवस्यतीति वाक्याच्छब्दार्थनिर्णयः। तथा तत्र प्रकरणमप्यन्यशब्दार्थनिर्णयनिमित्तं। यथा ग्रामप्रस्तावे सैंधवानां चोदनमश्वानयनपर्यवसा
यि भवति भोजनप्रस्तावे तु देवलवणप्रतीतिमुपजनयतीति। यथा स्त्रियां धातुप्रकरणात् धातुरित्युक्तं। तथा चोभयावरातो संस्था कर्तृकरणयोस्तृतीयेत्यत्र कार
काणां प्रक्रान्तत्वात्करणशब्देन क्रियाग्रहणं न विज्ञायते शब्दैरेत्यादौ सूत्रे च धात्वधिकारे करणशब्दात्क्रियाप्रतीयत इति। अर्थस्तु शब्दत्वाच्छब्दार्थ
निर्णयप्रकत्वं स्यति। पयोंऽजलिना जुहोत्यंजलिना सूर्यमुपतिष्ठतेंऽजलिनापूर्णपात्रमाहरतीत्यत्र जुहोतीत्याद्यर्थवशात् भिन्नार्थ [redacted]
[redacted] वा चक्रेंऽजलिशब्दः। शास्त्रेऽपि पूरणगुणसुहितार्थस्यत्रगुणेन सह षष्ठी न समस्यत इत्यर्थसामर्थ्याद्देशगमसंप्रत्ययः। तथा नञ्शब्ददवादिगु
॥औ२ णानामित्यत्र नाम्न यिणो ग्रहणं भवत्यर्थादिति चित्यादपि शब्दार्थ [redacted] व्यवस्थानं हन्यते यथा सीता मिमुसलैः केवलैरनिर्दिष्टक्रियापदेर
थ्यो विस्पादिहले खन युद्धावहननलक्षणा समुचितक्रियाप्रक्षेपे शब्दार्थनिर्णयः पर्यवसति। यथा वा प्रष्ठादयः शब्दा अग्रगामित्वादिनिमित्तसमा
श्रयणेन प्रवर्तमाना मानस्य च निमित्तस्यो चित्यात्तुस्ये वसंभवात्तु शब्दास्तु उच्यंते। [redacted] त योगात्स्त्रियां वर्तते न साक्षादिति

आश्रयिणोर्रूपरसगन्धस्पर्शसंख्यादेः ३

63

६३ प्रष्ठसंबंध एव प्रष्ठ्यादीनां प्रयोगादाख्यायामित्यनेन निमित्तत्वेनोपदर्शितः। यथा चैत्रस्य निंबं परशुना यस्त्वेनं मधुसर्पिषा। यश्चैनं गंधमाल्याभ्यां स

63 र्वस्य कटुरेव सः इत्यत्रानुक्तक्रियापदानि साधनान्वेषी विषयव्याप्त्युचितक्रियापदावगत्या अवांतरवाक्यापत्तावनप्रत्यायनपूर्वकमशक्तप्रत्य

मालक्षणस्य वाक्यार्थस्य प्रतीतिमुपजनयंति। तथा चैत्रो निंबं परशुना छिनत्ति यश्चैनं गंधेनानुलिंपति माल्येनार्चयति सर्वस्यैतस्य दुस्वाद्य प्रकृति

रितिकटुक एव दीमेनस्य दाननिपुण एवेति कस्य चित्स्वलत्व प्रतिपादनमत्र तात्पर्यार्थः। शास्त्रेषु प्रयोगादाख्यायामित्यत्रोक्तं। पुंस्त्रियाः स्त्रीप्र

वृत्तिनिमित्तस्यासंभवात्पुंस्त्वादेतदूति। देशात्तु व्यर्थनिर्णयो यथा। मधुरायाः प्राचीनादुदीचीनाद्वा नगरात् आगच्छामीत्युक्ते नगरविशेषात्पाटलि

पुत्रादागच्छामीति गम्यते। पाटलिपुत्रस्य मधुरासंबंधिनोस्य [redacted] प्राचीनोदीचीनभागयोर्विद्यतेत्प्रत्यासत्तिरिति कृतादेशावष्टंभादत्र निर्णयः।।

कालात्तु व्यवस्था दृश्यते। यथा शिशिरे द्वारमित्युक्ते पिधेहीति गम्यते। ग्रीष्मसमये त्वेवमभिधाने समुद्घाटयेति गम्यते। एतच्च शब्दार्थनिर्णयो

पायानां दिङ्मात्रप्रदर्शनं बोद्धव्यं। अन्येपि तन्निश्चयोपायप्रकारा अनुसंधातव्याः। श्लोकवशाच्चोदाहरणमात्रमेव दर्शितमिति मंतव्यं। सर्वथा नस्व

पमात्रात्तु व्यर्थप्रविभागनिर्णयः कर्तुं शक्य इति प्रतिपादयितुमुक्तं। ननु पादेवकेवलादिति तथा चापरैः संसर्गादयः शब्दार्थावच्छेदहेतवः प्रदर्शि

ता इत्याह।। ।।संसर्गो विप्रयोगश्च साहचर्यं विरोधिता" अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। हेरन०

३१८

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इह केश्चिदर्थभेदाच्छब्दभेदोऽभ्युपगतः तदपरैरेकशब्दतेति द्वौ पक्षौ । तत्र नानात्वपक्षे स्वभावभिन्नेषु तुल्यश्रुतिषु स्व-
पाभेदादनवच्छिन्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छेदः क्रियते । एकत्वपक्षे तथाभिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यमात्रादलब्धविभागासु तथैव सं-
सर्गादिभिरर्थनिर्णयः क्रियत इत्युभयत्रापि प्रकरणादयः शब्दार्थनिर्णयनिपुणा इति तदुपन्यासः क्रियते । तदत्र केचित्सामर्थ्यमेवैकं शब्दार्थनिर्ण-
यनिमित्तमिति मन्यन्ते । योऽप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते सोऽपि सामर्थ्यादेवात्र प्रतीयत इति कथयन्ति । सामर्थ्यमेव हि संसर्गादिभिर्व्यज्यत
इति । तत्र संसर्गो यथा । सकिशोरा धेनुरानीयतामित्यत्र नियतेन संसर्गिणा किशोरलक्षणेन विशेषावसायनिमित्तेन वडवाया एव संप्रत्ययः ॥ यथा च सव-
त्सा धेनुरित्यत्र वत्ससंसर्गाद्गोर्धेनोरेव संप्रत्यय इति संसर्गादर्थनिर्णयः ॥ रूढ्या गोरेव धेनुरुच्यत इति तु येषां दर्शनं तेषामत्र संसर्गो विशेषसंप्रत्यये नोपयुज्यत इ-
ति वो द्रष्टव्यं । शास्त्रे यथा ॥ अवाद्ग्र इत्यत्र यस्मादवेनोपसर्गेण संबंधः संभवति स एव गृह्यते गिरतिः । गृणातेस्तु स्वभावादर्थविरोधाद्वा संबंधो नोपपद्यत
एव । तथा संसर्गवद्विप्रयोगोऽप्यवच्छेदहेतुर्यथा निर्ज्ञातसंबंधः सोऽच्यते ॥ अकिशोरा धेनुः [redacted] अवत्सा अकरभा वा आनीयतामिति किशोरादिविप्र-
योगेन विशिष्टजातीयाया एव धेनोरवगतिरुपजायत इति । शास्त्रेऽपि भुजोऽनवन इति अस्य भुजेरवनमनवनं चार्थः तस्य ग्रहणं विज्ञायते । न तु कौटिल्या-
र्थस्य निर्भुजति पाणिमिति ॥ साहचर्यं यथा ॥ रामलक्ष्मणाविति उक्ते लक्ष्मणसाहचर्याद्दाशरथेरेव प्रतीतिः । अत्र यद्यप्येको दृष्टव्यभिचारः तथाप्यदृ-

ष्ट्यभिचारसाहचर्यात्तत्तुल्यधर्मतारात इतिवोद्धव्यं।शास्त्रेयथाविपराभ्यांजेरित्यत्रपराशब्दोऽदृष्टव्यभिचारेणविनासाहचर्यादुपसर्गएवगृह्यते।य
द्यपिबहुविवनमित्यादौविशब्दोऽनुपसर्गोस्ति।तथापिसमुदायोऽर्थवान्जहत्स्वार्थेहतिपक्षेवयवा अनर्थकाएव।अजहत्स्वार्थेहतिपक्षेकथं।उपसर्ज
नभाव मापन्नोवि[redacted]रप्राधान्यात यहीतुमशक्य एवेतिनास्तिविरनुपसर्गः।वीजयते इत्यत्रतुवीशब्दोनविशब्द इति।भाष्येप्युक्तमस्यगोर्द्वितीये
नार्थइतिगौरेवप्रतीयतेनाश्वोनगर्दभ इति।यथाचांतरांतरेणयुक्ते इत्यत्रद्वावपिटाव्तीयांतयोःसंभवात् दृष्ट्यापचारौ अतःपरस्परसाहचर्यान्निपा
तयोरेवग्रहणमित्येवंसाहचर्यमर्थनिर्णयहेतुःशब्दानांविरोधादप्यर्थोवधार्यते।यथारामार्जुनावित्यत्रार्जुनसन्निधानेनिसर्गवैरिणोजामदग्न्य
स्यैवप्रतीतिः।अर्थप्रकरणदेशकालौचित्यैर्विशेषैर्व्यवस्थापनंप्राक्प्रदर्शितं।लिंगाच्चवाक्यांतरेहृष्टाद्भेदःप्रसिद्धःप्रतीयते।यथाअक्ताःशर्कराउपद
धातीत्यत्रानेकसाजनद्रव्यस्यसंभवेतेजोवैघृतमितिघृतस्यस्तुतिरुक्ता।एतस्माल्लिंगात् घृतसाधनत्वमंजिक्रियायाःशर्कराकर्मिकायानिश्चि
यते।तथापशुमालभेतेत्यत्रपशुत्वसंबंधिषुप्राणिषुसत्स्वपिछागस्यहविषोवपायामेदसइतिलिंगाच्छागेकार्थसमवायिपशुत्वेप्रतीयते।शास्त्रेपृष्टंश
ब्दांतरसंनिधानात्विशेषावगतिः।यथा"अर्जुनःकार्तवीर्यःरामोजामदग्न्य इति"शास्त्रेपृष्टं।सामर्थ्याद्विशेषप्रतिपत्तिर्यथा"अनुदराकन्येतिसाम हेरंब०
र्थ्यादुदरविशेषप्रतिषेधप्रतीतिः।तथा अभिरूपायकन्यांदेयेतिअभिरूपवराय इतिसामर्थ्यात्प्रतीयते।शास्त्रेपिप्रथमानिर्दिष्टंसमासउपसर्जनमितिसमासेशास्त्र

समासत्वादस्य प्रवृत्तिः। एकविभक्ति चापूर्वनिपात इत्यत्र यः समासशब्दो ऽनुमीयते तस्य प्राथमकल्पिक एव समासे वृत्तिः। व्यक्तिर्लिंगं तस्मान्निर्णयो यथा।
तडागमस्याई लभेतेत्यत्र समप्रविभागे ईशब्दो न पुंसकेन परामृश्यते। तस्माडागमस्या ईसममेव प्रतीयते। तं ग्रामस्याईमित्यत्र तु तमिति पुंल्लिंगेन परामर्शा
डागमैकदेशमात्रं प्रतीयते। शास्त्रे प्यर्द्धं नपुंसकमित्यत्रार्द्धशब्दस्य नपुंसकत्वेन विशेषणात्समप्रविभागवृत्तेरेव ग्रहणम्। स्वरादयः स्वर एव सत्वणत्वन
त्वादयः। तत्र स्वरो यथा स्थूलपृषतीमालभेतेत्यत्रान्तोदात्तस्य श्रवणात्स्थूला चासौ पृषती चेत्येवंविधार्थप्रतीतिः। पूर्वपदप्रकृतिस्वरत्वदर्शने स्थूलानि
पृषंति यस्यामित्यन्यपदार्थप्रतीतिः। तथा वैपाठः कृपद इत्यत्राद्युदात्तस्य श्रवणाद्विपाशा उत्तरस्य विशिष्टस्यैव प्रतीतिः। अंतोदात्तश्रवणे तद्विपरी
तस्येति। सत्वाद्यथा। सुषिक्तमतिस्तुतमित्यादौ एजातिक्रमैयोः कर्मप्रवचनीयसंज्ञायामुपसर्गत्वाभावेन षत्वाभावेन तयोरेव प्रतिपत्तिः। उपसर्गसंज्ञायां तु सत्वं सु
षिक्तं सुष्टुतमित्यादौ षत्वप्रवृत्तेरर्थान्तरस्य प्रतिपत्तिः। णत्वं नत्वाभावो यथा। प्रणायकः इत्यत्रोपसर्गाश्रयणत्वसद्भावे प्रेयन क्रियाकर्तुः प्रतीतिः। ण
त्वाभावे तु प्रगता नायका अस्माद्देशादसौ प्रनायको देश इत्यन्यपदार्थप्रतीतिरिति। तदेवमेते शब्दार्थस्य संदेहपराकरणद्वारेण निश्चितार्थावसायहे
तुत्वाद्विशेषस्मृतिहेतवो निर्णयहेतवः संसर्गादय इति बोद्धव्यं। नन्वेकत्वदर्शने भेदाभावाच्छब्दानामर्थस्य संदेहे तन्निर्णयाय प्रकरणादय उच्यंत इति
चेन्न भेदपक्षे तु विभिन्नत्वादेव शब्दस्तदर्थप्रत्यायने क इष्यते। त्याशंक्यात्रापि रूपसादृश्यात्सादितसंदेहानां वहूनां प्रकरणादिभिरेवार्था

अ॰ २

६५ 65 व्यार्थनिर्नयइतिप्रतिपादयितुमाह॥ ॥भेदपक्षेपिसारूप्याद्भिन्नार्थाःप्रतिपत्तिषु॥नियताःयांसमभिव्यक्तिंशब्दाःप्रकरणादिभिः॥ ३२१ भेदपक्षेपिप्रतिपत्तिषुभिन्ना
र्थाअपिशब्दाःसारूप्याभिन्नाइवेतिप्रकरणादिभिरेवोक्तस्वरूपेर्नियता अवछिन्ना अर्थाभिव्यक्तावुपयोगंयांतीतिनकुत्रचित्प्रकरणादिमंतरेणशब्दार्थनि
र्णयइतिबोद्धव्यमुक्तंचैतत्प्राक्‌स्मारयितुमाह॥ ॥नामाख्यातसरूपायेकार्यांतरनिबंधनाः॥शब्दावाच्य ३२२ स्वतेषार्थानरूपादधिगम्यते॥ इहवाकोना
मरूपाआख्यातशब्दाअपिभवंतियथा अश्वइतिटुओश्विगतिवृद्ध्योरित्यस्माल्लुङिमध्यमपुरुषैकवचनेसिपिनिसंयङिततइतेकारलोपेच्लि श्वेती ४
प्रसप्रसङ्गस्तंभुम्रुच्चिम्लुचिस्यादिनाङादेशेऽश्वयतेरल्लस्यातोगुणेइतिरपरत्वेसकारस्यरुत्वविसर्जनीययोःकृतयोर्लुङ्‌ङ्‌ङ् [redacted] स्यादिनाटिकृते अश्वइ श्वि ५
त्याख्यातपदेश्वयतिक्रियायाःकर्तृवच्छिन्नायाःअतीतकालायाःप्रतिपादकं।अश्वइतिचनामपदमश्वजातीयस्यार्थस्यसत्वमस्तस्याभिधायक
इत्येतत् जिजय ४ मितिसारूप्यात्संदेहेप्रकरणादिभिरर्थव्यवस्था।अथाःजापयेइत्यस्माद्धातोःकश्चिदजेयंजितवान्तमन्योनुप्रयुक्तवानि [redacted] स्यर्थविवक्षायांहेतुर्थे
णिचिक्रीङ्जीनांणावित्यात्वेअर्त्तिह्रीव्लीत्यादिनापुकिजापीत्येवंस्थितेलङिशपिगुणायादेशयोःकृतयोःसकारस्यरुत्वविसर्जनीययोश्चलुङि
स्यादिनाडागमेचकृतेःजापयइत्याख्यातमपपाःजायाःपयोःजापयइत्यपिनामपदंतत्सदृशमिश्रयोदिनातन्निश्चयः।आख्यातसरूपाश्चनाम
शब्दास्तेनयस्यतस्येत्यादयः।तथाचतनुविस्तारेइत्यस्माल्लिटिमध्यमपुरुषबहुवचनेहित्वचनेकृतेतएकहल्मध्येइत्यादिनाएत्वाभ्यासलोपयोःकृ हेरंब०

॥कुशलैः प्रतिपन्नास्तामयथार्थां प्रतीयते॥३२३॥ या प्रवृत्तये स्तुतिकल्पना निवृत्तये च निन्दाप्रकल्प
ना ॥ ५

नपोस्तेने व्याख्यातं तत्कुत्रस्य तृतीयां तस्य सदृशमिति तत्सु उपलक्षयेयस्तु प्रयत्नदृष्ट्याभ्यां विधायिको लोटि तस्य च सिप्यपि सेलोपिश्चेति ह्यादेशे रदिवादिलाच्छान्दसो नुबन्धलोपे तो
हेरिति हेलुकि तस्य प्रसेस्याख्यात पदं यत्नदोः षष्ठ्येकवचनांत ओः सदृशमिति साम्यासंदेहे प्रकरणादिभिस्तन्निश्चीयते ॥ कीदृशाः कार्यान्तरनिबन्धनाः ॥ का
र्यान्तरं विशिष्टप्रत्ययलक्षणं प्रकरणादिना तन्निबन्धनं निमित्तं येषां ते तथाभूताः ॥ तेषु रूपमात्रात्पदार्थोऽवगम्यते तस्मात् समस्तवाक्यार्थपरः शत्रुमवजानीयादित्यादिवाक्यार्थे
पर्यालोचनयैव वाक्यार्थनिर्णयः ॥ आह च न हि किंचित्पदं नाम रूपेण नियतं क्वचित्। पदानामर्थरूपं च वाक्यार्थादेव जायते इति ॥ ३२२ अथ पुनः शब्दार्थनिर्णये प्रस्तावे पद
पदार्थानामसत्यत्वमभ्युपेत्यैव च वाक्यार्थस्य सत्यत्वमभ्युपगंतव्यमिति प्रदर्शयितुमाह ॥ ॥ या प्रवृत्तिनिवृत्त्यर्थं स्तुतिनिन्दाकल्पनोंताप्रेक्षावानस्य या
र्थामभिमन्यते परमार्थतस्तथाविधस्य वाक्यस्य प्रवर्तकत्वनिवर्तकत्वेति वासत्त्व भूतं वाक्यार्थं तत्रावगच्छतीति पदपदार्थव्यत्ययः सर्वत्रास्य एवेति सैवैषा तात्पर्य
शक्तिरिति कैश्चिद्व्यवस्थापितेत्येतदेव प्रकटीकर्तुमाह ॥ ३२३ ॥ विधीयमानं यत्कर्म दृष्टादृष्टप्रयोजनं। स्तूयते सा स्तुतिस्तस्य कर्तुरेव प्रशंसिका ॥ ३२४ दृष्टप्रयोजनं
किंचित्कर्म स्तूयते यथा यो राजानं भजते स सारं भुंक्ते। अदृष्टप्रयोजनमपि। योऽग्निष्टोमेन यजते स स्वर्गं गच्छतीति विलक्षणाः प्रवृत्तिनिवृत्तिप्रयोजनो स्तुत्या
विभागो वाक्यार्थस्तथाविधवाक्यनिबंधन एवाभ्युपगंतव्य इति स्थितं ॥ ३२४ नानुकम्पेनं तत्रस्य एवमेवकृत्वा प्रवृत्तिनिवृत्ती विधीयेते किमनुपयोगिनिन्दाशयेत प्रति
पादना संभारेणेत्याशंक्याह ॥ ॥ व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते। असत्योऽपि तथा कश्चित्प्रत्यवायो विधीयते ॥ ३२५ यथा रुदंतं व्याघ्रो भक्षयती

१०

संर

६६ त्तिवाक्ये सोच्यते न तत्र [redacted] या घ्रम क्षणं वक्तुस्थित्या भवति केवलमाकदाचिद्वेरो दीर्घीतिरेदन निषेध एव तस्य क्रियते तथा तत्र प्रतिषिद्धाचरणा
न्नरकपातो भवतीत्येतावन्मात्रं प्रतिपाद्यत इति तत्र दर्थसमाश्रयणेन सत्यस्वरूपपदपदार्थाभ्युपगमो न युक्तः। तथा प्रत्यवायोपदेशेन च यत्क्षुत्स्त्रेण प्रतिषिद्धं
ननु तत्राहो पुरुषिकया प्रत्यवायं विधानमारब्धप्रक्षापूर्वकारिणः प्रवृत्तिरुच्यते त्याह॥ ॥न सं विधानं कृत्वापि प्रत्यवाये तथा विधेः शास्त्रेण प्रतिषिद्धे र्थवि
द्वान्कश्चित्प्रवर्त्तते दृष्टप्रयोजनप्रत्यवायप्रतिविधाननिदर्शनपूर्वकमेतदेव व्याख्यातुमाह॥ ॥सर्पं वृश्चं विधायापि सिद्धैर्मन्त्रौषधादिभिः नान्यथा
प्रतिपत्तव्यं न दंतोगमयेदिति। न दंतो गमयेत्प्रवृत्तो गमयेत्सर्पोरगं घातुकाभवंती त्यनेन पुरोडाशस्यादंतोपदेशानपूर्वकं भोजनं निषिध्यते। तत्र कश्चित्स
र्पाणां प्रतिविधानं मंत्रौषधादिभिः कृत्वा यदि तथा प्रवृत्तस्तदानेन शास्त्रानुष्ठानं परित्यक्तमिति न शोभनमाचरितं अस्त्वेवं विधिनिषेधपरेषु स्मृत्यर्थादी धवि ६ चप्रवृत्ति ४
नामसत्यत्वं। यत्र तु स्मृति निर्देश एव मुख्यः प्रयोजिके तत्र न तदर्थानां सत्यत्वमेवोचितमित्याशंक्याह॥ क्वचित्तु समाख्यानं क्रियते स्मृतिनिंदयोः। तत्रापि निवृत्ति
प्रवृत्त्योपदिश्यते यत्रापि क्वचित्स्मृतिनिंदयोर्विधयेन योः संबंधितत्सौ ये तु वाक्यार्थाः पदार्थैरेवते समाः। एतदुक्तं भवति। अर्थान्तरवाक्यार्थयोः साकांक्षत्वा
त्पदार्थतुल्या एवेति न तत्र वाक्यार्थव्यपदेशः कार्यः अथ प्रत्येकस्मात्पदान्निराकांक्षोर्थः प्रतीयते तत्रापि किं तस्याऽसत्यार्थत्वं युक्त [redacted] मिधातुमित्याशंक्या
ह॥ ॥वाक्यं तदपि मन्यंते यत्पदं चरितं [redacted] देरं वं
ख्यानं क्रियते तत्रापि सर्वथा स्तुतिनिन्दयोः केवलयोर्न किंचित्प्रयोजनमुत्पश्याम इति प्रवृत्तिनिवृत्ती एवोपदिश्येते इति बोद्धव्यम्॥ ३२८॥ एवं पदपदार्थानामसत्यत्वे वाक्यवाक्यार्थयोरेव सत्यत्वे प्रतिष्ठापिते पदार्था
नां स्वरूपस्य वाक्यार्थ एव निबन्धनमिति दर्शयितुमाह॥ ॥रूपं सर्वपदार्थानां वाक्यार्थोपनिबन्धनम्॥ एकस्मिन्वाक्यार्थरूपे निबद्धास्ते साफल्यं भजन्ते अन्यथा विशरारव एवेति वाक्यार्थ एव ते
षां परस्परसमन्वये निबन्धनं॥ वक्ष्यति च पृथक् निविष्टतत्त्वानां पृथगर्थानुपातिनाम्॥ इन्द्रियाणां यथा कार्यमृते देहान्न कल्प्यते॥ तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम्॥ वाक्येभ्यः प्र
विभक्तानामर्थवत्ता न विद्यते इति॥ यथा वाच्यते॥ न हि केचिदित्यादि॥ ०॥ ननु वाक्यार्थस्यापि कस्याचिदवयवरूपत्वे किं तस्याप्यपरवाक्यार्थनिबन्धनत्वमङ्गीकार्यमित्याशङ्क्याह॥ ॥सापेक्षा ३

क्रियं। एतदुक्तं भवति। संतिवा केचिद्वाक्यैकदेशाः प्रसिद्ध्यादिना वाक्यार्थप्रत्यायका इति। तदप्येकपदं वाक्यमेव। यस्मात्तच्चरितक्रियमिति। चरितागर्भीकृता आख्यातक्रि
याप्रत्ययतद्गर्भीकृतक्रियापदं नामपदं वाक्यं प्रयुंजत इति चरितक्रियापदादस्मादर्थावगति। निराकांक्षोपजायमाना दृश्यत इति पदमात्रस्यैव गत्वा वाक्यत्वं। ३३० एवं यथाना
मपदं केवलमपि गर्भीकृताख्यातं निराकांक्षार्थप्रत्यायनाद्वाक्यमेवेति तस्य स्थापितादर्थात्स्वरूपनिहितपर्यंतव्यवहारसिद्धेः सत्यमेव तदर्थस्य। तथैवाख्यातं केव
लमोच्चार्यमाणं विशिष्टाभिधायकं वाक्यमेवोच्यत इत्याह॥ ॥आख्यातशब्दे नियतं साधनं यत्र गम्यते। तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते। ३३१ यथा वर्षती
त्युक्ते देवो जलमिति कर्तृकर्मोपक्षेपात्परिपूर्णार्थत्वं वर्षतीति देवो जलमिति यथा वाक्यं एवं तदप्येकपदं समाप्तार्थं परिपूर्णार्थं वाक्यमेवाभिधीयते। तदुक्तमादावेव। आ
ख्यातशब्द इति वाक्यमिति सर्थः। ३३२ अत्र मीमांसकः प्राह॥ ॥शब्दव्यवहिता बुद्धिरप्रयुक्तपदाश्रया। अनुमानात्तदर्थस्य प्रत्यये हेतुरुच्यते। ३३३ केवलात्पदाद्यासाधुव
द्भावना बुद्धिः सा साधुवदर्थस्य तस्मादप्रयुक्तस्य पदांतरस्यार्थस्तस्य हेतुरुच्यते। कीदृशी। शब्दव्यवहिता। यथा धूमेन स्वार्थानुमाने शब्दमंतरेण वह्न्याक्षेपः। नैव त्य ६
मत्रापि। श्रुतार्थापत्त्या परिकल्पितो योसौ तिष्ठत्यादिशब्दः तेन व्यवहिता। अथ तस्याश्रवणात्कथं तद्व्यवहितेत्याशंक्याह। अप्रयुक्तपदाश्रयेति। अप्रयुक्तमनुच्चा
रितं वाचकं श्रुतार्थापत्त्याक्षिप्तं आश्रयो द्वारमुपायस्तिष्ठत्याद्यर्थप्रत्यये यस्याः सा तथेति। कस्मात्तदर्थस्य प्रत्यये हेतुरित्याह। अनुमानादिति। तिष्ठत्यादिकं श्र
वं श्रुतार्थापत्त्योपस्थापितमनुमायाक्षिप्यासौ बुद्धिस्तदर्थप्रत्ययमुपजनयतीति यावत्। अतो न केवलमेव नामपदं सक्रियस्यार्थस्य वाचकम्॥ आख्यातं वा

॥३३२॥ १

६७ समाधनस्येति किं कथमुच्यते संतिवाक्ये सुवाक्यैकदेशगतानां कारकाणामर्थप्रतिपादकाद् इति भुतार्थोपस्थापकाभिसंबंधस्य किं प्रयोजनं नेएकपदादेव तस्माद् वृक्षस्तिष्ठती
67 त्यादिवन्निराकांक्षार्थप्रस्थापनमुक्तं कथं वाक्यैकदेशस्य सकलवाक्यार्थप्रतिपादकत्वमंतरेण शब्दांतरपरिकल्पनं युक्तमिति परमतमाशंक्याह ॥ यस्मिं
पदाद्या ३ न्नुच्चरिते शब्दे यदा योर्थः प्रतीयते । तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणं ॥ इह यस्मादुच्चरितादर्थप्रत्ययो दृश्यते तेन तस्यार्थमाहुः वृक्षदृत्यस्मादेव चार्थप्र
करणादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतेः एतदेवार्थवाचकत्वाद्वाक्यमित्युक्तमेव । एवं क्रियाकारकोपपद[redacted]सेत्येनेननारंभणीयैव
चतुर्थीतादर्थ्येन सिद्धत्वादित्याह ॥ ॥क्रियार्थोपपदे चैवं स्थानिनां गम्यते क्रिया । क्रियार्थोपपदेषु विषयेक्रियार्थोपपदानां चेति षष्ठीप्रयोगे सप्तमी । स्थानिनाम
धातूनां ६ प्रयुज्यमानां संबंधिनी क्रियाहरणलक्षणा । एधेभ्यो व्रजतीत्यत्र धत्राद्यर्थाहरणमभिदधातीत्येधाहरणार्थं व्रजतीत्यर्थप्रतीतिः अतस्तादर्थ्यस्फुटमेवेति सि
द्धा चतुर्थी । एवं च कुत्सायां निरादयः क्रांताद्यर्थप्रतिपादका इत्याह ॥ ॥ हंतो निरादिभिश्चैव क्रांताद्यर्थो वगम्यते निष्क्रांतो निरित्यादौ निरादय एव सामर्थ्यात्क्रां २४
ताद्यर्थप्रतिपादका इति गतार्थत्वात्क्रांतादीनां शब्दानां वृत्तावप्रयोग एव । उक्तं च । उपसर्गास्तेव मा लकाः यत्र क्रियावाची शब्दः श्रूयते तत्र क्रियांविशिंषंति अ
न्यत्र क्रियाविशिष्टं साधनमाहुरिति । एवं वृ[redacted]क्षस्तिष्ठतिनिष्क्रांतः कौशांब्या इत्यादौ तिष्ठत्यादीनां किं प्रयोगेण केवलं वृक्ष इत्यादिकं सर्वत्र नामपदमा
स्थातं वा प्रयुज्यतां केवले रेवसर्वत्र वाक्यार्थप्रतिपादनमित्याह ॥ नानिशब्दांतरापेक्षा । केवलो वृक्षशब्दो वाक्यार्थप्रतिपादको न्य एवा वृक्षस्तिष्ठतीति चान्यदे रम०

वत्ताकं। सादृश्याद्वृक्षस्तिष्ठतीति तत्र वृक्षशब्दं वृक्षइत्येकपदे वाक्येभिमन्यतइति॥१०॥ भवत्वेवं सर्वदा वृक्षशब्दएव केवलः किं न प्रयुज्यते। ततएव हि सामर्थ्यादिना वृक्षस्तिष्ठतीत्यर्थप्र
विततेनच २ तीतेः किमनेनैः स्तिष्ठतीत्यादिकेन प्रयुक्तेनेत्याह॥ ॥पर्यायाइव लौकिकाः। एतदुक्तं भवति। लौकिके शब्दव्यवहारे लाघवं प्रत्यनादरात्क्वचिद्वृक्षः क्वचिद्वृक्षस्तिष्ठ क्वचिद्वृक्षोदृश्यतां ३
तीति प्रयुज्यते। यथा तरुशब्देनैव लाघवाद्वृक्षार्थप्रतीतौ पादपशब्दं प्रयुंजतएवं लौकिकाइति न कश्चिद्दोषः॥ अथ वृक्षइतिकेवलं नाम पदं क्वचिद्वृक्षस्तिष्ठतीति क्वचिद्वृक्षोस्तीत्ये
वं विधस्य नियतस्यार्थस्य विशेषभेदेन कथं प्रतिपादकं स्यादित्याह॥ अर्थप्रकरणाभ्यां तु तेषां स्वार्थो नियम्यते॥३३५॥ एषामेकपदार्थानां वाक्यानां प्रतिनियतो योर्थः प्रकरणाभ्यां
व्यवस्थाप्यते॥ एवमखंडवाक्येषु वाक्यार्थे सत्यरूपे स्थिते किं पदपदार्थपदभागपदभागार्थकल्पनयेत्याह॥ ॥प्रतिबोधाभ्युपायाल्पायेतं तंपुरुषं प्रति। एतदुक्तं भवति। येवा
क्यार्थप्रतिबोधनोपायास्ते प्रतिनियतपुरुषसमाश्रयाः॥१०॥ ते चासत्यरूपा एव च परपदार्थाइत्याह॥ ॥नावश्यं तेभिसंबद्धाः शब्दाज्ञेयेन वस्तुना॥३३६॥ ज्ञेयेन वाच्येन वस्तुना सत्य
रूपेण लौकिकेन नैव नैवश्यं संबद्धा इत्यसत्य[redacted]भता यंतइति॥ अपयस्मिंस्तु चरितइत्यादिकं यदिशब्दार्थलक्षणमाश्रीयते न दाशब्दादुच्चरितादप्रतिच्छुरन्यासि
प्रचिनत्वादकृतसंकेतस्याबालादेः सामर्थ्यप्रतिपत्तौ कुतश्चिद्भ्रमाद्भ्रान्त्याप्रतिपत्तौ तदर्थानवगतेरनित्यत्वमेव शब्दार्थसंबंधस्यात्। न चैतद्युक्तमिति श्रुतार्थापत्तिवा
दी प्रतिपादयितुमाह॥ ॥असत्यां प्रतिपत्तौ च मिथ्या वा प्रतिपादने। स्वैरर्थैर्नित्यसंबद्धास्ते शब्दा व्यवस्थिताः॥३३७॥ तेते शब्दा नित्यसान्तश्छन्दसंबन्धस्यानियतार्थप्रतिपा
दका एव व्यवस्थिताः। कुतश्चिन्निमित्तादर्थानवगतौ शब्दार्थसंबन्धहानिः प्राप्नोति। तस्मादेकपदेषु पदान्तराध्याहारेण वाक्यार्थावगतिरुपपन्नेति प्रतिपादयितुमा
॥३३७॥ २

१२

६८ 68

ह॥ ॥यथाप्रकरणं द्वारमित्यस्यां कर्मणः कृतौ। यथा न देहि हि वेत्येतदुपायादधिगम्यते। प्रकरणानतिक्रमेण साधनं क्रियाया अविनाभावितया आक्षेपकं भवतीति द्वारं
द्वारमित्यत्र कर्मश्रुतिर्विधानं देहि हि वेति एतमर्थं प्रकरणादेरुपायाद्वाचकद्वारेणाक्षिपतीत्येतदेवमुक्तौ एवं यस्मिंस्तु चारितरस्यादिके शब्दार्थलक्षणे शब्दार्थसंबंधस्या
नित्यत्वमभिधाय दूषणांतरमभिधातुमाह॥ ॥यैत्रसाधनवृत्तिर्यः शब्दः सत्त्वनिबंधनः॥ न स प्रधानभूतस्य साध्यस्यार्थस्य वाचकः॥ यस्मात्साधनतामभिधायी सत्त्व
प्रधानः शब्दैर्नस एव प्रधानभूतस्यार्थस्य प्रतिपाद्यस्यासत्त्वभूतस्याभिधायक उपपद्यते विरोधात्। तस्मादिदमत्र वक्तुमुक्तमित्याह॥ ॥स्वार्थमात्रं प्रकाश्या
सौ साकांक्षो विनिवर्त्तते॥ अर्थस्तु तस्य संबंधी प्रकाशयति संनिधिं॥ असौ वाक्यान्तशब्दो नामशब्दो वा स्वार्थमेव केवलं प्रतिपाद्य सापेक्षः साकांक्ष एव वृत्तिनिवर्त्त
ते तस्य विनिवृत्तस्य संबंधी त्वर्थः अर्थांतरस्य तद्वाचकशब्दस्य कल्पनद्वारेण संनिधिमुपकल्पयति। ततश्च वाक्यार्थप्रत्ययः परिपूर्ण उपजायते इत्येवमुक्तमिति॥ इदानी
मखंडवादीष्टश्रुतार्थापत्तिवादिनं निराकर्तुमाह॥ पारार्थ्यस्याविशिष्टत्वान्न शब्दाच्छब्दसन्निधिः॥ नार्थाच्छब्दस्य सान्निध्येण गमयतीत्युच्यते। तदत्र किं शब्देन शब्द आ
क्षिप्यते उतार्थेन शब्दः आहोस्विच्छब्देनार्थः उतार्थेनार्थ इति चतुष्टयी गतिः। तत्र शब्देन शब्दस्याक्षेपो न युज्यते। स्वार्थप्रतिपादन एव शब्दाक्षेपात तत्राह। न शब्दा
च्छब्दसंनिधिरिति। अर्थार्थे न शब्दाक्षेप इत्युच्यते तत्राह। नार्थाच्छब्दस्य सान्निध्यमिति। नार्थेनापि शब्दाक्षेपो ऽस्ति। वाच्यं तु वाचकमाक्षिपतीति युक्तं॥ अतो न शब्दा
र्थस्य शब्दांतरस्य चैवाचकभावविरहात् कथमर्थेन शब्दस्याक्षेपः। अथ शब्देनोच्चारितेन श्रुतार्थापत्तिपरि [redacted] कल्पितशब्दवाच्योऽर्थ आक्षिप्यते हेरंब॰

ध्वंनशब्दादर्थसन्निधिः॥३४१॥ इहपीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र भोजनं विनापीनत्वं देवदत्तस्यानुपपद्यमानं रात्रिभोजनं
तद्वाचकशब्दपरिकल्पनद्वा ४

इत्युच्यते तदप्यनुपपन्नमित्याह। नशब्दादर्थे संनिधिरिति। नशब्दाच्छब्दान्तरवाच्यस्यार्थस्य सन्निधिरुपपद्यते वाच्यवाचकभावादेवेति कथं शब्देनार्थस्याक्षेपः। अथार्थेना
र्थो गम्यत इत्युच्यते। अनुमानमेवैतत्स्पष्टं भवति। नशब्दादर्थस्याभावः इति शब्दैकत्वमेव परिसमाप्तं स्यात्। अत एवात्र चतुर्थपक्षप्रदर्शनमौचित्यं न जहातीति मिन्निरा तर
सोनहुतएवं तस्मादेकपदेषु श्रुतार्थापत्त्याश्रयणं तदाक्षेपवाक्यार्थावगतिरिति यत्किंचिदेतत्। एकपदमेव वाक्यान्तराभिसंबंधमन्तरेण प्रकरणादिवशात्तत्तदर्थ
प्रसादन निपुणमित्येव मन्तव्यं॥ पुनः श्रुतार्थापत्तिवादाह॥ ॥नष्टरूपमिवाख्यातमाक्षिप्तं कर्मवादिनां। द्विप्राप्तं प्रधानत्वं युगपद्भावसत्त्वयोः॥ द्वारं द्वारं कर्म
द्रव्यं च कर्मपदेनैवाख्यातमसत्कल्पमाक्षिप्तं तयोर्यत्रोच्यते। नदयुगपत्परस्परविरुद्धयोः सिद्धासिद्धयोरर्थयोरेकस्मिन् शब्दे प्रधानत्वेन वाच्यत्वमापतितं। न चे
सर्वतत्प्रधानवत्ति ६ तत्परिहृत्य पूर्वं यत्र साधनत्वं निरस्तेनेनयः सत्त्वप्रधानो नाम्ना वाख्यातार्थवाचक उपपन्न इत्युक्तं। इदानीं पुनः प्रत्ययस्य च विरुद्धार्थवाचकत्वमुच्यत इति वि
रोधः सिद्धान्तवादाह॥ ॥नैरुक्तनामसरूपत्वमाख्यातस्योपवर्ण्यते। द्वारं द्वारमित्येतदाख्यातमेव नामपदस्वरूपं तु वर्ण्यते। अतएव चान्याख्यातवत्साधान्येन
क्रियाया एतदपि नामपदस्वरूपं प्रतिपादकमेवाय॥१०॥ द्येवं कथमस्माद्द्वितीया श्रूयत इत्याह॥ अन्वयव्यतिरेकाभ्यां व्यवहारो विभज्यते। ३४३ भांडं भांडं पिधेहि द्वारं द्वारं पि
धेहीत्यादावाख्यातस्य क्रियाभिधायकत्वं परिहृत्य नाम्नो द्रव्यवाचकत्वमित्यन्वयव्यतिरेकाभ्यामन्यत्रापि एकपदे द्वारमित्यादौ साध्यात्साधनाभिधायित्व
मेवेति भवत्येव द्वितीया। अथ द्वारं द्वारमित्यस्मानेकार्थवाचकत्वात्संदेहे कथमस्य वाचकत्वं भवेदित्याह॥ ॥न चापि रूपात्संदेहे वाचकत्वं निवर्तते॥११॥ रूपमा
३४२

६८ 69 द्वयेऽपि सामर्थ्यादिनां येन निर्णयो व्यवस्थाप्यत इत्याह॥ अह्नं पशो रिव यथा सामर्थ्यात्तद्विकल्प्यते। [३४४] अत्र पशुवपयोर्ह्नि देवदत्तावपशौर्द्धि पशुस्वामिकमिति सं
देहः॥ तत्र किं संदेहे वाक्यमवाचकमेव। अर्थप्रकरणादिनार्थस्तत्र कल्प्यत एवं चोदयति॥ ॥ सर्वं सत्पदं शुद्धं यदि भावनिबंधनं। संसर्गे च विभक्तोऽस्य
तस्यार्थो न प्रपद्यते॥ [३४५] क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता॥ चत्वारि पदजातानि सर्वमेतद्विरुध्यते [३४६] स्वोर्थः [३४६] एतच्चोद्यं निराकर्तुमाह॥ ॥ वाक्यस्य स्थ ३
बुद्धौ नित्यत्वमर्थयोगं च लौकिके। दृष्ट्वा चतुष्ट्वं नास्तीति वार्त्ताक्षौदुंबरायणौ। [३४७] वाक्यस्यार्थस्य च बुद्धौ प्रतिपत्तुर्बुद्धौ नित्यत्वं दृष्ट्वा तथा नस्येवार्थे न प्रतिभा
प५ लक्षणेन प्रयोगं संबंधं दृष्ट्वा यदेतत्पदपरिकल्पनं तदर्थपरिकल्पनं च तन्नास्त्येव नैवोपपद्यत इत्याचार्यो वाह नु। अतोस्माकमेषा विभीषिका पदानां च
तुष्टं नोपपद्यत इति। [३४८] यद्येवं किं शास्त्रेणेत्याह॥ व्याप्तिमांश्च लघुश्चैव व्यवहारः पदाश्रयः। लोके शास्त्रे च कार्यार्थं विभागेनैव कल्पितः। [३४८] पराश्रयो वाक्य
व्यवहारः शास्त्रेणोपदिष्टः सन व्याप्तिमान्सकलसाधुशब्दपरिज्ञानहेतुर्विभागेन परिकल्पित इति किमत्रानुपपन्नं। [३४८] अथ यदि पदपदार्थविभागः सर्वथै
वासत्यभूतः तत्कथं लौकिकानां तदाश्रयेण प्रवृत्तिरित्यादशंक्याह॥ ॥ न लोके प्रतिपत्तॄणामर्थयोगात्प्रसिद्धयः। तस्मादलौकिको वाक्यादन्यः कश्चि
न्न विद्यते। [३४९] लोके प्रतिपत्तॄणां सर्वथा न सत्यार्थयोगादेव प्रसिद्धयो व्यवहारनिष्पत्तयो यस्मादसत्येनाप्युपायेन मरीचिकास्वपि जलप्रसिद्धिस्तेषां दृश्यते।
अथवा रेखागवयवदसत्येनाप्यनेनोपायेन सत्यभूतवाक्यपरिज्ञानं भवत्येव सर्वथा न लोकस्यार्थं विना प्रवृत्त्यादर्शनसंतीति वक्तव्यं। कदाचित्सत्यगवेन हेरबः
य

गवशार्थप्रतीतिरसत्त न्यतेकदाचिद्रेखागवैनेतिबोद्धव्यं। यत एवं तस्माद्वाक्यार्थ [redacted] प्रत्ययोत्त

वा २ न्यत इति न कश्चिद्लौकिकः ससम्भवः पदार्थः पदैर्विद्यते उपपत्तिविरहादिति॥ ज्ञापकगमप्यार्थः सर्वत्र वाक्यादेवावगम्यत इत्याह॥ ॥अन्यत्र श्रूयमाणैश्च

लिंगैर्वाक्येषु सूचिताः। स्वार्था एव प्रतीयंते रूपाभेदादलक्षिताः॥ अक्ताः शर्करा उपदधातीत्यत्र तेलेन घृतेन वेति संदेहे तेजो वै घृतमिति घृतस्तुतिः

रूपक्रांतौ श्रेतत्सूच्यते ऽभ्यंजनं घृतेनैवोपदिष्टमिति। अतोत्राक्ताइत्यादौ वाक्ये घृताक्ता उपदधातीत्यर्थो वगतः किं ज्ञापकानुसारेणेत्याह। रूपाभेदादलक्षि

ताः। अक्ताः शर्करा उपदधातीति वाक्ये रूपमविशिष्टं परस्परतो विशेषमवगंतुमक्षमा इति लिंगानुसारेण नात्रार्थेनिर्णयो व्यवस्थाप्यत इति वाक्येषु वाक्यै

कदेशाः संतीत्येतदप्रमाणमेव। अथ बाध्यबाधकभावं निर्णेतुमाह॥ ॥उत्सर्गवाक्ये यत्त्व क्रमवादमिवत्राद्ववत्। तद्बाधकेषु वाक्येषु श्रुतमन्यत्र ग

म्यते। उत्सर्गवाक्ये सामान्यलक्षणे उपक्रम एव यत्त्व क्रमपवादाक्रांतं किं तत्र शब्देन परित्यक्तं। नेत्याह। अत्रादमिवेति। बाधकविरहेणेवा कथं यत्क्रमवा

द्ववत् बाधकदेवत्यक्तं। धातोः कर्मण्युपपदे ण्प्रत्यय इत्यावदेव बाधकानाक्रांतधातुविषयमेवाणप्रत्ययविधानमिति गम्यत एवं अन्यथा त्वविशेषेण

प्रवृत्तावुत्तरकालमाकारीतेभ्यः कथं निवार्यते। अतस्तात्पर्यपर्यालोचनवशाद्बाधकानाक्रांतधातुविषये ण्प्रत्ययो भवतीति वाक्यार्थो ज्ञायत एव तद्द

र्शिना। एतत्तु काल एव नावधारितं। उत्तरकालं तु बाधकेषु वाक्येषु तच्छ्रुतं सदन्यत्र सामान्यलक्षणे वर्जितमिति गम्यते। लौकिकेन दृष्टांतेनैतदेव व्याख्या

उपदधातीति वाक्यार्थो ज्ञायत इति विज्ञेयं। यद्वा क्वचित्प्रस्पेवच्चाक्ता। ४

70

७० 70 तुमाह॥ ॥ब्राह्मणानांश्रुतिरेद्विप्रक्रान्ता माठरं विना॑ माठरस्तत्र संबंधात्तत्राचष्टे यथा येतां। दधिब्राह्मणेभ्योदीयतामिसत्र श्रुसामाठरवर्जमेवात्रब्राह्मणा
नां दधिदानमुपक्रांतमितिबोद्धव्यं। उत्तरकालं तक्रं माठराये स्येतत्तत्र यथार्थबाधकविषयपरिहारेणैवार्थवत्तागमयति। एवं भिन्नवाक्यतासमाश्रयणेनतत्र
दृष्टानुमानं बाध इति बोद्धव्यं। ३५२ इदानीमेकवाक्यतामेवाभ्रिसोत्सर्गापवादयोर्बोध्य [redacted] कभावं दर्शयितुमाह॥ ॥अ
नेकाख्यातयोगेपि वाक्यन्यायापवादयोः। एकमेवव्यनेकेषि च भिन्नरूपमिवस्थितं। ३५३ केचिन्न्यायापवादयोरुत्सर्गापवादयोरारव्यातभेदेपि एकवाक्यतैवेष्यते।
कवाक्यतागप भिन्नवाक्यतेवनकालं प्रतिभाति। वस्तुतस्त्वाकांक्षायोग्यतासंनिधिवशादेतं वाक्यं बोद्धव्यं। एवं सतीदं तत्र बोद्धव्यमित्याह॥ ॥नियमः प्रतिषेधश्च विधिशे
षस्तथासति। इको गुणवृद्धी इत्यादिको नियमः सार्वधातुकार्द्धधातुकयोरित्यस्य गुणविधेः शेषः तेन सहास्यैकवाक्यतायां सार्वधातुकार्द्धधातुकयोः परतो गस्ये
को गुणो भवतीत्येवं वाक्यार्थो जायते। अन्यथा गस्ये गनिकोः स्थाने गुणवृद्धी अकस्मात्तरकालं नियमेनकिमत्र कृतं। उक्तं च यो हि भुक्त्वैतं ब्रूयान्मा भुंक्
था इति किं तेन कृतं स्यादिति। तथा प्रतिषेधोपि विधिना सहैकवाक्यतां गत्वा सफलं भजतीत्याह॥ प्रतिषेधश्चेति। प्रतिषेधश्च विधिशेष एव तथासति बोद्
व्य इत्यर्थः॥ अलुगुत्तरपद इत्यनेनोत्तरपदे परतो लुक्प्रतिषेध उच्यमानः सुपो धातुप्रातिपदिकयोरित्यस्य लुग्विधेरंगभावमुपगच्छन्नासैकवाक्यतया थेप्र
सायनं करोतीति बोद्धव्यं। १०॥ एतदेव दर्शयितुमाह॥ ॥द्वितीयेयो लुगाख्यातस्तस्मिन्नेष अलुकं विदुः। ३५४ द्वितीये अध्याये य आख्यातो लुग्विधिः तस्य षाष्ठिकं लुक्प्रतिषे हेरंबः

॥३५५॥

धं शेषमंगं विदुर्यास्व्यातारइति। अ॥३५४ यवाक्यमेदस्याह॥ निराकांक्षाणि निर्दिष्टानि प्रधानानि परस्परं। तेषामनुपकारित्वात्कथं स्यादेकवाक्यता॥ निर्दिष्टानि विशेषपरिपूर्णतयांगवा

क्यानि निराकांक्षाण्येव अतः परस्परं प्रधानानि तान्यभिधीयंते। नतेषामंगांगिभावइति। अतः परस्परमुपकार्योपकारकभावाभावात्कथं तेषां निष्प्रयोजनापेक्षा परिकल्प्य

तेनैकवाक्यते तिपूर्वःपक्षः॥ ॥३५५॥ अथैकवाक्यतामाह॥ ॥विशेषविधिनार्थिसाद्धाकांक्षोऽनुमीयते। विशेषवन्निवर्त्यर्थ्येतस्मात्तुल्यं व्यपेक्षणं॥३५६॥ उत्सर्गवाक्यशेषः सर्वत्रानु

मीयते। कस्मा[illegible]दित्याह। विशेषविधिनेत्यादि। अन्यथावाक्यांतरवदविशेषेण तस्य प्रवृत्तिःस्यात्। नचैतद्युक्तं। ततश्च निवर्त्यप्रतिषेध्यार्थापेक्षणमुपपद्यत एव तस्मात्

वशेना ५ तयोः परस्परापेक्षणं तुल्यमेवेति कृत्स्नार्थपर्यालोचनाकांक्षादिना परस्परसंबंधेनांगांगिभावापन्नावेकवाक्यतैवत्यायसी युक्ता॥३५७॥ उद्धारेण वाक्येषु वाक्यैकदेशाः संतीति चतु

भिःप्रकारैर्निरूपितं। अर्थप्रकरणाभ्यां यथाहस्त इत्यादौ प्रसिद्धे यावर्त्तीत्यादौ॥ लिंगाद्यथा अक्ताः शर्करा इत्यादौ। आकांक्षादिना वाक्यांतरस्य सन्निधानाद्यथा। दधि

ब्राह्मणेभ्यो दीयतां तक्रं कौंडिन्यायेत्यादौ॥ यथा चक्रमेणपण्आतोनुपसर्गे क इत्यादौ॥३५८॥ इदानीमपोद्धारसमाश्रयणेन प्रसंगात्पदेषु पदैकदेशाः संतीति विचारयितुं स्लोकैति॥ ॥

संज्ञाशब्देकदेशोयस्तस्य लोपो न विद्यते। विशिष्टरूपासा संज्ञाकृता चन निवर्त्तते॥ इहदेवदत्तादयः संज्ञाशब्दाः स्थिताः तत्र कदाचिद्देवः कदाचिद्दत्त इति प्रयुंजानाद्दृश्यंते। तदे

तत्कथमुपपद्यते। यस्मात्तेषु संज्ञाशब्देषु एकदेशास्तेषां लोपस्ताव च्छास्त्रेन कुत्रचिदुपदिश्यते। उपदेशोपि तेनकर्त्तुं न पार्यत इत्याह। विशिष्टरूपेत्यादि। यदालोके नियतव

र्णानुपूर्वीकः पदसमुदायः संज्ञातेन विनियुज्यते। तदा तदंतर्गता अप्यवयवा विनियुक्ता एव। यथा वृक्षः प्रचलन्सहावयवैः प्रचलतीत्याचारानुरोधेन किमसौ न्यूनवर्णोवा

२१

७१ चिका भवति। सा हि नियतानुपूर्वीका परिपूर्णैव लक्षतानेन निवर्त्यते। ३५८ अपोच्यते। दन्तशब्दो दशसंख्याप्रतीतावस्य संज्ञित्वप्रसायप्रतीत्याशंक्याह॥ ॥संज्ञांतरत्वाद् दन्तादेर्नान्यासंज्ञा
प्रतीयते। दन्तशब्दः स्वतंत्रो ऽन्य एवकस्यचित् संज्ञांतरत्वात् तस्मात् कथमन्यादेवदंत इति संज्ञाप्रतीयते। शब्दांतरत्वादकृतसंकेतत्वाच्च स्वाभिप्रायः॥ नापि तद्वाच्यसंज्ञिनमवगमयितुमलं
दन्तशब्द इत्याह॥ संज्ञिनं देवदत्ताख्यं दन्तशब्दः कथं वदेत्। ३५९ दन्तशब्दस्यान्य एव संज्ञी प्रसायस्तस्य कथं शब्दांतराभिधेयमसौ प्रसाययेत्। तदेवं नियतवर्णानुपूर्वीकाः शास्त्रस्यालो
पस्तावदेकदेशस्य नोपपद्यते। नापि दन्तशब्दाद् द्विवशाद्वा तदेकदेशभूताद्देवदत्तशब्दप्रतीतिरुपपद्यते। न चापि तद्वाच्यप्रतिपत्तिरिति प्रतिपादयितुं विदेनतः। ३५८ अत्र मतांतरं दर्शयितुमाह॥
॥ ॥सर्वैरवयवैस्तु त्वं संबंधे समुदायवत्। केचित्तु स्वरूपाणां मन्यंते सर्वे संज्ञिभिः। ३६० सर्वैरवयवैस्तत्त्वमेव समकालमेव संज्ञिनः संबंधः कथं समुदायवत्। यथा समुदायस्तस्य
वाचकत्वेन नियुक्तः तथा तत्काल एव तदवयवा अपीत्यतस्तदेकदेशस्तत्प्रसायनं करोतीति को दोषः। ३६० अत्र दूषणद्वयं दर्शयितुमाह। वर्णानामर्थवत्त्वं तु संज्ञानां संज्ञिभि
र्भवेत्। संज्ञानां ये वर्णास्तेषां संज्ञिनार्थवत्त्वं प्राप्नोति। तत्र चाभिमते कदेशवदेकोपि वर्णो वाचकः स्यात्। न चैतत्सारिहष्टं॥ अपि च तदवयवः पृथग्वाचको नोपपद्यत इत्याह॥ ॥
:दूषण २ संबद्धोवयवः संज्ञाप्रविवेकेन कल्प्यते। ३६१ योसौ भवता वाचकोवयव एकदेशः परिकल्प्यते। स संबद्ध एव वाचकत्वेन विनियुक्तः। समुदायाच्चतस्य प्रविवेके पृथग्भावे वाचकत्वं नक
ल्प्यते॥ विलक्षणत्वात्। ३६१ एतदेवापरेण श्लोकेन प्रतिपादयितुमाह॥ सर्वे स्वरूपे युगपत्संबंधे सति संज्ञिनः। नैकदेशाः स्वरूपेण स्तत्प्रत्यायनसंभवः। ३६२ युगपत्सर्वावयवस्वरूपैः सं
बंधे नैकदेशास्तद्वाचका उपपन्ना। अथवा तदेकदेशास्तेन भवंतीति प्रतिपादयितुं नैकदेशः स्वरूपेण इत्यादि। एकदेशाः स्वरूपेण युक्तः एकदेशस्तदृशास्ते दत्तादयः न पुनस्त हेरंब०
माह॥१

देकदेशा इति मतो तमाह॥ ॥एकदेशानुसंघातेके षां चिज्ज्ञायते स्मृतिः। स्मरते स्त विषयाच्छब्दात्संघातार्थः प्रतीयते स्फोटो र्थे ः॥३६३॥ एतन्निराकर्तुमाह॥ एकदेशात्स्मृतिर्भि
न्नेसंघाते जायते कथम्। कथं प्रतीयमानः स्याच्छब्दोर्थस्याभिधायकः॥ सदृशा वस्तु संदर्शनात्स्मृतिरुपजायत इति प्रसिद्धं। तत्र संघाते भिन्नस्वरूपे कथं तस्मात्स्मृतिः। कथं च तस्मा
त्प्रतीयमानो देवदत्तस्य संज्ञिनोभिधायक [redacted] उपपद्यते। प्रतीयमानस्य वाचकत्वेतिप्रसंगः स्यात्। प्रतिपद्यमवर्तीर्णाः शब्दा वाचका इति प्रसिद्धं। इदानीं सिद्धांतमा
ह॥ ॥एकदेशास्वरूपास्तु तैस्तैर्लिंगैः समन्विताः। अनुनिष्पादिनः शब्दाः संज्ञासु समवस्थिताः। यदा तु समुदायः संज्ञात्वेन विनियुज्यते तदैव तदंतर्गतावयवस्वरूपा अ
पि संज्ञात्वेन विनियुक्तं इति ते ष्वनुनिष्पादिन्यायेन सिद्धाः संज्ञात्वेन बोद्धव्या इति। तदंतर्गतावयवस्वरूपा अनुनिष्पादिन्यायेन विनियुक्ता अपि साधारणत्वात्संज्ञिनमभि
धातुमसमर्थाः। तथा हि देवशब्दो देवानां वाचकः कस्यचित्संज्ञिनो पि। तथा दत्तशब्दः क्रियाशब्दोपि संज्ञाशब्दोपि। तत्र कथं नियतस्य संज्ञिनस्तेभ्यः प्रतिपत्तिः स्यादिसाशंक्य
निश्चितार्थतामेषांसमर्थयितुमाह॥ साधारणत्वात्संदिग्धाः सामर्थ्यान्नियताश्रयाः। नेषामेसाधव [redacted] लेषु शास्त्रे लोपादिशिष्यते। साहृश्यात्संदेहेपि सामर्थ्यादिभिर्नियताश्रयाः +३६६+४
संज्ञ्यभिधायका व्यवस्थाप्यंते। तेषामनुनिष्पादिनामेव शास्त्रे लोपादिविधिप्रणालिकया साधुत्वमुच्यत इत्याह। तेषामित्यादि। तेन देवदत्तेस्तं तत्रः क्रियावाचकदत्तेदं साधार श्री ३
णोदत्तः संज्ञाशब्दः देवोपि संज्ञाशब्दोनुनिष्पादित्वान्न तदंतर्गता अपीति बोद्धव्यं। एतदेव शास्त्रे लोपादिद्वारेणान्वाख्यायते। पृथोक्तं। चतुर्थीस्नजासे च लोपः पूर्वपदस्य चेत्या
दि। एतत्स्फुटीकरणायाह॥ ॥तुल्यायामनुनिष्पत्तौ अपभ्रंशा इत्यसाधवः। न त्वन्वाख्यापके शास्त्रे तेषुदत्तादिवत्स्मृतिः। समुदायेयथापदान्यनुनिष्पादिन्यायेन तत्रवि

७२ निष्कृष्टं ते। नैव मन्त्रसमाम्नायामप्यनुनिष्पन्नो वर्णानां वर्णविनिष्कृष्टं ते। अत एव वृद्धेष्वादिषु न स्वादयो वर्णमात्रा इह द्व्यवहारे साधवोऽभ्यनुज्ञाताः प्रतीतिशास्त्रेऽप्यन्वाख्याप्रसेकेन
72 पु२ तथाभूतानामनुगमः क्रियत इति बोद्धव्यं। अतो नैते घादयो वर्णाभ्यघाटिका चेष्टर्थैर्वा चकाद्रिति। अथ पदेषु पदैकदेशाः संनीतिविचारप्रस्तावे संज्ञाशब्दानां शब्दार्थसंबंध
स्यानित्यत्वमाशंक्य समर्थयितुमाह॥ ॥कृतणत्वाश्रयेशब्दानि संस्करणसादयः। एकदेशोपदेशित्वात्संज्ञान्साधून्प्रचक्षते॥ इह संज्ञाशब्दानां संज्ञिसंबंधास्याग्लक्षण
योग उत्तदुत्तरकालं यदा प्राकृतदासो न कस्यचित्संज्ञेति तन्निबंधनं कार्यं कथं स्यात्॥ अत्रोच्यते। अत्र संज्ञासंज्ञिसंबंधानां संज्ञात्वेन तत्र लक्षणमिति। अथोत्तरकालेण
त्वं तदा चाकृतणत्वो सौ शब्दः संप्रति णत्वं भजत इत्यनित्यत्वं शब्दानां स्यादित्याशंक्याह। कृतणत्वाद्रसादि। इह द्वैरादी। कृतणत्वानामेकोराशिर्नित्य एव अकृत
णत्वानामपर इति। तत्रये कृतणत्वास्ते साधवो नित्या एव। एकदेश्योपदेशित्वात्तस्य भावे नैव तेसंज्ञाशब्दा इत्यर्थः। शास्त्रे पूर्वपदात्संज्ञायामग इत्यनेन कृतणत्वानामे
व तेषां साधुत्वमन्वाख्यायत इति। कृतणत्वं तु शास्त्रे प्रक्रियामृगसमाश्रयणेनैषामुक्तमिति न कश्चिद्विरोधः। एतदेव प्रतिपादयितुमाह॥ ॥गोत्वादिवत्तु तान्याहुः संज्ञा
शक्तिसमन्वयात्। निमित्तापेक्षणं तेषु स्वार्थे नावरुप्यते। संज्ञाशब्दकुलानि व्यवस्थितानि न तेषु स्वार्थे संज्ञिनि निमित्तान्वेषणमिष्यते नित्यत्वाच्छब्दार्थसंबंधस
प्र२ तद्वा चकास्ते स्ववाच्ये नियता इति स्वरूपव्यतिरेकेण निमित्तान्तरान्वेषणमव्यापकमेव ननु च नित्यत्वे संज्ञाशब्दानामनुपपन्नं संप्रति क्रियमाणत्वात्पश्यामः सुरु
वेहसाय यथा कथंचिन्नियुज्यसंज्ञा क्रियते। उक्तं च। कृतकत्वादनित्यत्वं संबंधस्योपजायते। संज्ञायाः साहि पुरुषैर्यथाकामं नियुज्यते। यथा हि पंसुरेखाणां बाल हेरंब०

कैमुधुरा स्पः॥ संज्ञाः क्रियंते संज्ञासु सर्वासु विशेषेव कल्पाने सामर्थ्यं क्ष समर्थयितुमाह॥ ॥व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित्। नित्य एव तु संबंधो डित्थादिषु गवादि
वत्॥ संज्ञाशब्दानां क्वचित्संज्ञिनि यदिपरं व्यवहारार्थं पुरुषे नियममात्रं क्रियते। यथास्मिन्नरहे ऽयं प्रभृति डित्थशब्द [redacted] वाच्योऽयम
ति बोद्धव्यं। शब्दार्थसंबंधस्तु डित्थादिष्वनादियोग्यतालक्षणो नित्य एव। यदुक्तं। इंद्रियाणां स्वविषयेष्वनादियोग्यता यथा। अनादिरर्थैः शब्दानां संबंधो योग्यता तथे
ति। तदेवं यथा गवादिष्वनादियोग्यतासंबंधाद्वाचकत्वं गोशब्दानां तथैव डित्थादीनां बोद्धव्यं। शास्त्रेऽपि तथैव व्यवहारनियमः संज्ञाशब्दानामवसातव्य इत्याह॥ ॥वृद्ध्या
दीनां च शास्त्रेऽस्मिन्शक्त्यवच्छेदलक्षणः। अकृत्रिमोऽभिसंबंधो विशेषणविशेष्यवत्॥ शास्त्रे वृद्ध्यादीनां संज्ञाशब्दानां सर्वार्थप्रकाशनशक्तियोगः संज्ञिनामादैजादीनां
च सर्वशब्दवाच्यता योग्यता॥ अतः केवलं शास्त्रे संज्ञान्तराद्व्यवच्छित्यै दैजादिप्रत्यायन एव शक्तिर्वृद्ध्यादीनां नियम्यते। आदैजादीनां वृद्ध्यादिशब्दवाच्यत्वमेव बोध्यत्या प्यतइति॥
सहजशक्तिप्रतिनियम एव वाच्यवाचकयोरुच्यते न पुनः कृत्रिमसंबंधाधानं विज्ञेयं। यथा विशेषणविशेष्ययोरनादिः शब्दवाच्यतात्मक एव संबंधो [redacted]
न पुनस्तत्र पुरुषेण नीलत्वादियोगः क्रियत इति। अथ संज्ञाप्रवृत्तिनिमित्तं विचारयितुमाह॥ ॥संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी। क्वाचित्प्रवर्तते काचिन्निमित्ता
संनिधावपि॥ सर्वसंज्ञाशब्दानां स्वरूपमेव प्रवृत्तिनिमित्तं बोद्धव्यं॥ तस्मिन्सति कुत्रचिदर्थानुगतं निमित्तं [redacted] विद्यते। कुत्रचित्तस्याभाव एव डित्था
दाविति केश्चित्तत्राप्युच्यत एव॥ न केवलं तत्रैकाक्षराणां स्वरूपमेव प्रवृत्तिनिमित्तं विद्यते यावन्महतीनामपि स्वरूपमेवोपनिबंधनं प्रवृत्तिनिमित्तं बोद्धव्यमित्याह॥ ॥

१७

७३ 73 ग्राह्येनुमहतीसंज्ञास्वरूपोपनिबंधना। अनुमानंनिमित्तस्य संनिधानेप्रतीयते॥ केवलंतत्रनिमित्तस्यावयवार्थस्यसंनिधानेस्यानुमानंततस्तु द्वावेवप्रतीयते॥ अनुमानेनावयवा
र्थोपितत्रनिमित्तमितिप्रतीयतदूर्ध्व र्थः। कथंतदनुमानमित्याह॥ ॥अर्थश्ते [redacted] रनुमानंवासारूप्यात्तत्रगम्यते। शब्दभेदानुमानंवाशक्तिभेदस्यवागतिः। सएकएवहिशब्दश्ने
विरूपि३ ते। ततएकेनस्वरूपं तसंज्ञिनः प्रतिपत्तिरपरेणावयवार्थनिबंधनतावस्थाप्यते। नत्वावृत्तिरनुमीयते। किंयदिहतत्रतवाभीष्टंस्यात्तद्द्विरुच्चारणादित्याह। सारूप्यादि
ति॥ सारूप्यादेकएवोच्चारितःशब्द [redacted] तिगम्यते। अथवातंत्रेणद्वावेवशब्दावनुच्चारिताविस्यनुमीयतइत्याह॥ शब्दभेदानुमानंवेति। ततएकेनस्वरूपाच्छादितसंज्ञिनः प्रति
पत्तिपरेणावयवार्थनिबंधनेति तृतीयमपिपक्षंप्रदर्शयितुमाह। शक्तिभेदस्यवागतिरिति। [redacted]
[redacted] सएवैकोद्विरुक्तिरुच्चारितस्ततएकस्यासंज्ञिप्रतिपत्तिरपरस्यावयवार्थसंगतिरिति। इदानींलौकिकस्याकृत्रिमस्यक्वचिद्ग्रहणं क्वचित्कृत्रिमस्यपारिभाषिक
कृत्रिमा३ स्यक्वचिदुभयस्यापीतिरिहशास्त्रेसंभवतीत्युभयोरपि कृत्रिमयोः क्वचिदकृत्रिमएवव्याप्तेः परिग्रहीतइतरस्यापिविषयंव्याप्नोतीतिचातुर्विध्यंसंज्ञाशब्दानांप्रदर्शयितुमा
ह॥ ॥क्वचिद्विषयभेदेनकृत्रिमाव्यवतिष्ठते। कृत्रिमाशास्त्रीयापारिभाषिकीउच्यते। साविषयभेदेनव्यवतिष्ठते। नतुसर्वत्रतथैवव्यवस्थापयिथाकर्त्तरिकर्मव्यतिहारइत्यत्र
कृत्रिमायास्तव्यतिहारस्यानकृत्रिमसंज्ञाश्रयणानुपपत्तेः। कर्मण्यपिसत्त्वकृत्रिमा। शब्दवैरेत्यादावकृत्रिमाधात्वधिकारात्कृत्रिमायाअत्रानुपपत्तेः। कर्त्तृकरणयो हेत्क

त्वन्नीशे सत्त्र कृतिमेति ॥०॥ कचिदेकत्रोभयरूपतायाग्रहणमितिदर्शयितुमाह ॥ ॥संख्यायामेकविषयं व्यवस्थानं द्वयोरपि । संख्या विषयेऽशास्त्रे कृत्रिमाकृत्रिमयोरपि समाश्र
यणं शास्त्रीयाणां बहुगुणवतुडतीसादिकायां अपिकृत्रिमायां लौकिक्यां अथकृत्रिमायां विंशत्यादिकायां अति शादंतायां इति प्रतिषेधाद [redacted] त्संज्ञापकाद्ग्रहणं कचित्कृ ॥३७६॥ २
त्रिमः संज्ञाशब्दोऽगृह्यतः कृत्रिमस्यापि प्रसाश्रनं करोतीति प्रदर्शयितुमाह ॥ ॥विषयं कृत्रिमस्यापि लौकिकाः क्वचिदुच्चरन् । व्याप्नोति दूरात्संबुद्धेन यथाहिग्रहणं तयोः ॥३७७
लौकिकोऽकृत्रिमः संज्ञाशब्दः समुच्चरन् कृत्रिमस्यापि [redacted] शास्त्रीयस्यापि विषयं व्याप्नोति । यथैकश्रुति दूरात् संबुद्धाविसत्र संबोधनं सं
बुद्धिरिति लौकिकेन शास्त्रीयमप्येकवचनं संबुद्धिरिति गृह्यत एव । तत्रापि संबोधनस्य विद्यमानत्वादित्यर्थः ॥ अथेदानीं वाक्यविचारप्रस्तावे क्वचित्स्वसंके वाक्यपरिसमा परिसमाप्तिरिति
संघैकदेशसंघेषु ६ प्तिः क्वचित्समुदाय इति प्रदर्शयितुं [redacted] माह ॥ ॥संघैकदेशेष्वेकस्य क्वचित्सामर्थ्यलक्षणं । प्रसाश्रयमवस्थानं क्रियाणां प्रतिजानते । वाक्यबद्धा कार्थस्यापि प्रसेकस वदर्शयति ६
मुदायपरिसमाप्तिं वाक्यपरिसमाप्तिं प्रसंगान्मतभेदेन निरूपयति ॥ तत्र वाक्यार्थे समग्रे एकपरिसमाप्तिरिति तावद्दर्शयति " संघैकदेशेषु द्वंद्वेष्वित्यादिना । कदाचित्संघे देशेष्वित्यादि ४
नैकदेशेषु द्वंद्वेन वार्थप्रतिपादनं क्रियते यथा ब्राह्मणा भोज्यंतां ब्राह्मणो भोज्यतां देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यंतां " अत्र ब्राह्मणा कर्तृकाया : भुजिक्रियायाः
वाक्यार्थभूतायाः प्रत्याश्रयमवस्थानं प्रतिजानते ऽभ्युपगच्छंति । कीदृशं सामर्थ्यलक्षणमिति " सामर्थ्यं समर्थभावात्मकं अपेक्षानिरूप्यमाणं लक्षणं स्वरूपं यस्य
तत्तथाविधं सामर्थ्यलक्षणत्वादित्यर्थः ॥ अथभुजिक्रियाकारकसमुदाय एव नाहें क्रियावत्कि न्नसमाप्यत इत्याह " भोजनं फलरूपाभ्यामेकैकस्मिन्समाप्यते ।

धृ२

अन्यथा हि व्यवस्थानेनानर्थः प्रकल्प्यते। इह हि केन पादप्रक्षालनम् अपरेण मुखप्रवेशनम् अपरेणान्नदानम् अन्येनान्निगरणम् इति नैवं भुजि क्रिया निर्वर्त्तेतेत्यनुमा-
नाति। यस्मात्सो भुजिक्रियाफलेन तृप्तिलक्षणेन रूपेणान्नादानादिनां चैकाधिकरणेनान्वेति। तेन यथा नानाश्रयेण न भुज्यर्थो निष्पद्यते भिन्नाधिकरणास-
स्वरूपं न भवति भजनतरति प्रत्यक्षसिद्धमेवार्थेन देवस्फुटयितुमाह॥ ॥अन्नादानादिरूपां च सर्वैर्न तृप्तिफलां भुजिं प्रत्येकं भवति प्रघट्टेन तु नाद्यक्रियाभिर्वा निष्पत्त-
स्वरूपा हि वस्तुगतेषो हृद्यते। नाद्यक्रियानेकसाधनसाध्या सती फलवस्तु प्रजायते। भुजिक्रिया त्वेकैककारकनिर्वर्त्येति वस्तुगतिः। एतदेव दृष्टान्तान्तरेण व्याच-
ष्टे। पाद्यवत्सा विभागेन सामर्थ्याद्व्यवतिष्ठते। भुजिः करोति भुज्यर्थे न तन्त्रेण प्रदीपवत्। श्राद्धकर्मणि ब्राह्मणेषु कर्त्री यथा पाद्यमनेकाधिकरणं कृतं तन्न दृष्टर्दना-
योपकल्प्यते। तथैवेयं भुजिक्रिया सामर्थ्याद् कृत्स्नस्वाभाव्याद्विभागेनैवावतिष्ठत इति। न तु तन्त्रेण साधारणरूपेनासौ प्रदीपवदेकाधिकरणी वभुज्यर्थं तृप्तिलक्षणं
करोति। अथ भुजिक्रियैकापि तथाभूतेषु कर्मसु। आहत्रिमन्तरेणापि समुदायाश्रया भवेत्। देवदत्तयज्ञदत्तविष्णुमित्राद्द्वयेनाभिमत्रदृशिक्रिया तथाभूते-
परि३ ष्वेकदेशास्थितेषु कर्मसु विषयेष्वप्रत्येकं समाप्तिं विना भुजिवन्नोपपद्यत इति नोच्यते। युगपद्देवादिदर्शनक्रियाधिगमफला समुदायमात्रोति एषौ समुदाया-
श्रया भवेत्। अथ पश्चादिक्रिया किं समुदायपरिसमाप्ता किं वा प्रत्येकं समाप्तेत्याशंक्याह॥ ॥भिन्नव्यापाररूपाणां व्यवहारादिदर्शने। कर्तॄणां दर्शनं भि-
न्नं संभूयार्थस्य साधकं। देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीति विक्लिद्यत्तण्डुलान्विक्लेदयतीत्यत्र भिन्नव्यापाररूपाणां कारकाणां दर्शनं भिन्नं दर्शनेसा हेरेब:

क्रियावदन्यासामपि क्रियान्तरसमाश्रयेण समुदायपरिसमाप्तिमुपदर्शयितुमाह॥ ॥इत्यादिस्तु ४

थेनादिको व्यापारो भिन्नः स संभूय संघाद्यस्य पाकक्रिया तस्य तस्य साधकोऽदृश्यते व्यवहारादिदर्शनमिति। व्यवहारः कश्चिन्नियतविषय एवोद्योगोऽभि
प्रेतः। आदिग्रहणेन तदन्येषां परिग्रहः तेषां दर्शनं समारंभः प्रारंभ इति यावत् तस्मिन्सतीत्यर्थः। एतदुक्तं भवति। कर्तृस्था वा क्रिया भवति कर्मस्था वेत्युभयपरि
क्रिया कर्मणि समवेतानां समुदाय इति केचित्। अन्ये त्वाहुः। यद्यपि कर्मणि समवेता तथाप्यधिश्रयणोदकासेचनविक्लित्तिर् अपि पचेरर्थः तस्य चांतरक्रियान्यभावेन प्र
धानक्रियासमाश्रयणेन व्यापारस्याविशेषात्संभूय सर्वैर्निर्वर्त्यत इति समुदाय एव समाप्यत इति। ३८३ अथ शास्त्रे प्रत्येकं वा का परिसमाप्तिमुपदर्शयितुमा
ह॥ ॥लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिंगस्यादर्शनात्। अर्थिषादेश्च भेदेन वृद्धिसंज्ञा समाप्यते॥ ३८४ वृद्धिरादैजित्यत्र वृद्धिशब्दः प्रत्येकमादैच्स्वर्थिषु संज्ञात्वेन
नियुज्यते। यस्माल्लोके न तथैव लक्ष्यं सिध्यति। आश्वगुप्तायनिः रैतिकायनिः। औपगव इति। तथा शास्त्रे प्रत्येकमादैचां वृद्धिसंज्ञा ... श्रूयते। यथा प्रस्थे वृद्धम
कर्क्यादीनां मालादीनां च वृद्धिर्यस्याचामादिस्तद्वृद्धं। प्रस्थे वृद्धमकर्क्यादीनामित्यत्र प्रस्थे उत्तरपदे पूर्वपदमवृद्धमाद्युदात्तं भवतीति। तदनंतरं मालादीनामादि
रुदात्तो भवतीत्युक्तं। यदि चैकैकस्य वृद्धिसंज्ञा। तदा मालादीनां वृद्धिर्यस्याचामादिस्तद्वृद्धमिति मालादयो वृद्धा भवंति। ३८५ इदानीं क्वचित्समुदाय एव कार्यपरि
समाप्तिरिति प्रदर्शयितुमाह॥ ॥गुणतादाने प्रधानत्वाद्द्वंद्वे शतकर्मके। अर्थिनां गुणभेदेऽपि संख्यायोगेन भिद्यते। ३८६ गर्गाः शतं दंड्यन्तामित्यत्र शतकर्म
कं दंडनं समुदाये परिसमाप्यते। अर्थिनश्च राजानो हिरण्येन भवंति न च प्रत्येकं दंडयंति यस्माद्द्वा कार्षापणा राजानो विवेचयंति। यथात्र हेऽकर्मणि प्रधानम प्र

हत पृत ८

लिङ्गाद्दृ६

१९

७५ 75 धानं चेतितत्र गतकर्मके दंडने गतादानमेव प्रधानं यदि च प्रत्येकं शतदानं समाप्येत तदा गर्गाः शतानि दंड्याः स्युः। ततश्च प्रधानकर्मणः स्वरूपभंगो
भवेत्॥ न च प्रधानार्थपरित्यागो युक्तः। अतः संख्यानरागणे विरोधो वाक्यस्य स्यात्॥ वीप्सायां वा धर्मापेः। अत्र गुणभेदे पि दंड्यभेदे प्यप्रधानत्वात्तेषां नात्र प्र
त्येकं अपितु अर्थिनो राज्ञः शतकर्मकं [redacted] दंडनं समुदाय एव वाक्यपरिसमाप्तिरिति बोद्धव्यं। एतदुक्तं भवति। प्रत्येकं वाक्यपरिसमाप्तिः समुदाये वा वाक्यपरिसमाप्ति [redacted]
[redacted] रित्येतन्न राज्ञाज्ञावशाद्व्यवस्थाप्यते। अपितु यथा तथाभावादिति न्यायसिद्धमेवैतदेदितव्यं। ३८५ शास्त्रे प्रदर्शयितुमिदानीमाह॥ संघस्यैव विधेयत्वात्का
र्यवत्प्रतिपादने। तत्र तन्त्रेण संबंधः समासाभ्यस्तसंज्ञयोः ३८६ समाससंज्ञाभ्यस्तसंज्ञा च समुदाय एव परिसमाप्यते। सह सुपा उभे अभ्यस्तमिति च अत्र समाससंज्ञाया
अभ्यस्तसंज्ञायाश्च तंत्रेण साधारणेन समुदायस्यैव संबंधः कस्मादित्याह। संघस्यैव विधेयत्वादिति। यस्मादत्र संघ एव विधीयते पूर्वपदोत्तरपदरूपे हि समाससंज्ञा
विधीयते। तथाभ्यस्तमिति च युगपत् द्वे रभ्यस्तसंज्ञा विधीयते। किं चित्कार्यं विधातुमिति। ननु समाससंज्ञायां कथं राजपुरुष इत्यादौ समुदायो विधीयते। यावता
नित्यत्वाच्छब्दार्थसंबंधानां विधेयतानुपपत्तिरित्याशंक्याह। कार्यवत्प्रतिपादन इति। यदा कार्यवदन्वाख्यानमिति पक्षः प्रतिपाद्यते तदैतदुक्तमित्यर्थः। ३८७ इदानीं
क्वचिदेकत्वे वीप्सायां वाक्यपरिसमाप्तिर्दृश्यत इति प्रतिपादयितुमाह॥ ॥ लक्षणार्थोक्ति तिर्यंचां कांचिद्देवक्रियां प्रति। तेष्वेकैकश्च समस्तेष्वसधर्मा उपल
क्ष्यते। उदाहरणमाह॥ वृक्षलेने प्रवेष्टव्यमित्येतस्मिन्नुदाहरणे यथा। प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते। ३८८ अत्र वृक्षजातीनामप्रवेशनिषेधः क्रियते तत्र [redacted] हेरंबः
३८९

चैकस्यापि द्रव्यत्वलब्धौ वा सामर्थ्यात्स्वर्गकृत्समुदाये च प्रवेशानिषेधः संपद्यत इति प्रकारांतरेणोपपादयितुमाह॥ संभूयत्वपर्येलिप्साद्दिप्रतिषेधोपपादने। एव
गप्रतिषिद्धत्वात्स्वर्गहतिर्न विरुध्यते। भवद्भिः समग्रैरेवाग्निप्रभृतिराजोपसेवा न कार्या समुद्गमनं वा न विधेयं कृषिकर्म वा नानुष्ठेयमिति त्रसमुदाये प्रत्येकं वा निषे
धेवाक्यस्य न प्रवृत्त्यनुपपत्तिः। अत्रापि शास्त्रीयमुदाहरणं दर्शयितुमाह॥ ॥अवायलक्षणार्थत्वादद्रकुमाद्रादिभिस्तथा। प्रत्येकं वा समस्तैर्वा पालनं प्रतिषि
ध्यते॥ अवायो व्यवधानं। तदुपलक्षणार्थत्वाद्द्रकुमारादिभिरिति प्रत्येकं समुदायेऽपि ते पर्यस्थिते व्यवायस्य सिद्धत्वात्तथैव पालनं प्रवर्त्तत इति न कश्चिद्दोषः। इदानीं भु
क्तिक्रियाया एकत्वानेकत्वविचारः तत्रापि किमेकस्मिन्देशे काले पात्रे चानुष्ठितायाः स्वरूपमात्रमाप्ति दर्शयति उत देशादिभेदेनानुष्ठितेति विचारयितुमाह॥ ॥अनु
+३९१+६ ग्रहार्थं भोक्तृणां भुक्तिरारभ्यते यदा। देशकालाद्यभेदेन नानुग्रहत्वातितानसौ देशकालाद्यभेदेनेति नात्र भुक्तेरनुग्रहार्थाया विशेषः कश्चित्तु उभयथापि तद
नुग्रहस्य निर्वर्त्तेरिति॥ अथास्या एकत्वानेकत्वविचारमाह॥ ॥पात्रादिभेदान्नानात्वं यस्यैकस्योपदिश्यते। विपर्यये वा भिन्नस्य तस्यैकत्वं प्रकल्प्यते॥
यस्यमते एकैव भुक्तिः तन्निलक्षणसमानफलत्वात्तस्य देशकालभेदान्नानात्वं स्वतस्त्वेकत्वमेवाकस्यचिन्मते तु भोक्तृभेदात्फलभेदे भुक्तिक्रियाभेद एव तस्य
विपर्यये पात्राद्यभेदादेकत्वं तस्यावोद्धव्यं। स्वभावतस्तु भिन्नत्वमेवेति मतभेदः। किंच संहत्यापि च कुर्वाणा भेदेन प्रतिपादिताः। स्वस्वंभोज्यं विभागेन प्राप्तं सम्भ
यभुञ्जते। देवदत्तयज्ञदत्तविष्णुमित्राभोज्यं नामि सत्र सामर्थ्यादिति देनवाक्यार्थे प्रतिपन्ना विद्यावशात्संभूय स्वस्वंभोज्यं विभागेन प्राप्तं संभूय भुञ्जते॥ अथशतादी

७६ 76 न प्रधानत्वादित्येतत्प्रतिपाद्यस्यार्थस्योपपत्तिं प्रतिपादयितुमाह॥ ॥वीप्साया विषयाभावात् विरोधादन्यसंख्यया द्विधासमाप्तिः प्रयोगाच्चरात् तं संघेवर्तिष्ठते।[३९४] यद्येकै
कंशां तत्र नं दंड्ये ततदा वीप्साविषयोऽपहृतः स्यात् तथा श्रतक र्मेक मत्रदंडनं प्राधान्येन विधीयते। यदि तु प्रत्येकं शातं दंडनं प्राधान्येन विधीयते। प्रत्येकं शातं दंडने सं
स्था ३ ख्यां तरोपजननाच्छूतसं विरुध्यते। न चाप्यत्र द्विधा वाक्यं समाप्यते। यत एकेन प्रधानकर्मणः संबंधोऽपरेण गुणकर्मणामिति वाक्यार्थेः पर्याप्तो यसंघए
वाक्य ४ वशातादानमवतिष्ठतेत्युच्यते।[३९५] अथ भुजिक्रियायाः प्रत्येकं परिसमाप्ता वपि प्रत्र देवदत्त यज्ञदत्तविष्णुमित्रैः सह भोक्तव्यमित्युच्यते। तत्र द्विधापि प्रत्येकं समुदाये च वा
क्यं वा वाक्यार्थश्चपरिसमाप्यत इत्याह॥ ॥भुजिर्द्वेद्वैकशेषाभ्यां [redacted] यत्रान्यैः सह विष्यते। न [illegible] पि लक्षणार्थत्वात् द्विधा वाक्यं समाप्यते।[३९५] लक्षणार्थत्वादिति
यस्मादत्र सहभोजनं न सहैव वा तत्प्रतिषेध इत्येवं तावल्लक्ष्यते। तत्र बहुभिः सहभोक्तव्यं द्वाभ्यां त्रिभिर्वा न वेत्येतदत्राभिधीयते। एवं च सहैव भोक्तव्यं न वेति समुदाय एव
विधिर्वा प्रतिषेधो वा विधीयते। केवलं सहभोजनं विधिस्तत्प्रतिषेधो वामीष्ट इति प्रत्येकं समुदाये च वाक्यार्थो ऽत्र समाप्यत इति बोद्धव्यो। एवं वाक्यार्थाश्रयणेन प्र
त्येकं वाक्यपरिसमाप्तिः समुदाये च वाक्यपरिसमाप्तिरिति प्रदर्शितं। इदानीं वाक्यसमाप्त्याश्रयणेन मतिपादयितुमाह॥ ॥वाक्यांतराणां प्रत्येकं समाप्तिः केश्चि
दिष्यते। सूत्रांतरेण युक्तानां वाक्यानां तेन संग्रहः॥[३९६] इहैकं शास्त्रं श्रुतं तेन वाक्यांतराणां वाक्यरूपाणां ग्रहो लक्षणं प्रत्यायनमिष्यते। तानि वाच कानि तस्मा
न्महावाक्यं प्रत्येकं समाप्यते। ततश्च तथैवार्थविगतिरिति। अथवा वाक्यांतराणां किमेकमेव तन्महावाक्यमभिधायकमुच्यत इत्याशंक्याह॥ ॥न वाक्य हेरंबः
[३९६]

सं २

प्रो ढवादि २

स्याभिधेया निमे द्वा वाक्यानि(निका)चित । तस्मिंस्तच्चरिते भेदं तथान्यान्यप्रतिद्यते ॥ ३९७ तस्मादुच्चरितादर्थप्रतिपत्ता वयवपर्यालोचनावशेनावांतरवाक्यप्रतिपत्तिः संपद्यत इत्युच्यते न पु
नस्तेन तान्यभिधीयंत इति । ३९७ अत्राखंड वाक्यवादीतं प्रयापरवादिमतं निराकर्तुमाह ॥ ॥ येषां समस्तो वाक्यार्थः प्रतिभेदं समाप्यते । तेषां तदानीं भिन्नत्वात् किं पदार्थस्य संगतिः ॥ ३९८
प्रत्येकमखंडस्यैव वाक्यार्थस्य परिसमाप्तेः पदार्थानामनुपयोगात् सदार्थकल्पना वृथैवेति ३९८ वाक्यवादाविकल्पयितुमाह ॥ ॥ अथ तैरेव जनितः सोर्थो भिन्नेषु वर्त्तते । पूर्वसा
र्थस्मते न स्याद्विरोधः सहवा स्थितिः ॥ ३९९ अथो चात्र पदार्थैरेव वाक्यार्थो जनितो भिन्नेषु वर्त्तते । पूर्वस्मात्तेन सह विरोधः सहानवस्थानलक्षणो वा स्यात् । अथवा सहावस्थितिरिति
द्वयी गतिः । तत्र सहस्थितौ चोद्यमाह ॥ ॥ सहस्थितौ विरोधित्वं स्याद्धि शिष्टाविशिष्टयोः । भेदसंसर्गयोर्विरुद्धो वक्रानुपलभ्येयानामिस्य र्थः ॥ ४०० ॥ अथ पदार्थवाक्यार्थयो
रत्र सहानवस्थाने स पूर्वः पदार्थो वाक्यार्थो वाक्यार्थेन त्वसमासे विनिवर्त्तेत तदायं दोषइत्याह ॥ ॥ व्यभिचारी तु संबंधस्तागे पर्यस्य प्रसज्यते । वाक्यार्थफलानां ४००
पदानामुपात्तार्थे परित्यागे शब्दार्थसंबंधो व्यभिचारित्व सः प्राप्नोति । अतः प्रत्येकं वाक्यपरिसमाप्तिपक्षे समस्तपदार्थासंभव एव । ४०० अथ समुदाये वाक्यपरिस
माप्तिपक्षे किं समुदायार्थेन समं पृथग्वार्थवान् नावयवाः आहोस्विन्न द्वयवा अपीति विचारयितुमाह ॥ ॥ एकः साधारणो वाच्यः प्रतिशब्दमवस्थितः । संघेसंघि
षु वा योसाः संनिधाननिदर्शकः ॥ ४०१ सोर्थसामाद्यः ससमस्तो वाक्यार्थलक्षण एको खंडः प्रतिशब्दमवस्थितो बोद्धव्यः । यतो सोसाधारणः सर्वेषां वाच्यमतः स्थितः । अथ
वेघे वस्थितो सोने साह संघिषु चेति । साधारणता समुदायेषु चातैतद्वयवे वापीति । यदि प्रतिशब्दमवस्थितः तन एक पदोपलंभ(ने) का लेकि मिस सौ नावगम्यत इत्या

२१

७७
77

हतं निधानमिदर्शकं इति। इतरपरसंनिधानं निदर्शकं कृष्यास्मात् तथामनोः यथोक्तं तस्मात्। प्रत्येकं तु समाप्तो ऽर्थः सहभूतेषु वर्त्तत इति। अतः सकलपदोपलम्भ
काले प्रतीयत इति न कश्चिद्दोषः। ४०१ एतद्दृष्टान्तद्वारेण व्यक्तीकर्तुमाह॥ ॥यथा साधारणे स्वत्वं त्यागस्य च फलं धने॥ प्रीतिस्त्वविकला तद्वत्संबंधो ऽर्थेन तद्वता॥ ४०२॥
धने बहूनां साधारणे स्वत्वं। स्वस्वामिभाव आत्मीयत्वं वा सर्वेषां। त्यागस्य च दानलक्षणस्य फलं तदपि सर्वेषां। अस्माकं बहुधनमस्तीति चेतसः प्रीतिर्निर्वृतिल
क्षणा साप्यविकला साधारणत्वादेव सर्वेषां भवति। तद्वत्तेनार्थेन सम्बन्धत्वात्तद्वतां संघातसंघिनां संबंधो बोद्धव्यः। ४०२ इदानीमेतत्प्रसंगेन संघातसेकाप्यांत्सुव
भावो वर्णादिष्विति तद्व्याख्यातुमाह। ॥वर्णानामर्थवत्तायां तेनैवार्थेन तद्वति। समुदाये न चैकत्वं भेदेन व्यवतिष्ठते॥ ४०३ यदा वर्णा अप्यर्थवंतः समुदायेष्वर्थवत्ता
तत्रा तदर्थवत्त्वस्य साधारणत्वेनैवैकत्वात्समुदायादेवैकत्वप्रतिपादनात् चैकवचनमुत्पद्यते न प्रत्येकं वर्णेभ्य इति। ४०३ एतदेव दृष्टान्तप्रदर्शनपूर्वकं प्रदर्शयितुमाह॥
एकेनैव प्रदीपेन सर्वेषां साधारणं धनं। पश्यंति तद्वदेकेन सुपा संख्याभिधीयते। संतमसे साधारणधनस्वरूपपरिज्ञानं यथैकेनैव प्रदीपेन संपद्यते। तद्वदत्रापि +४०४+४
साधारणार्थवत्ताभिव्यक्तये एकेनैव समुदायादुत्पन्नेन सुपा एकत्वलक्षणा संख्या समुदायगताभिधीयत इति न पृथक् प्रत्येकं सुबुत्पत्तिः॥ यत एवं साधा +४०४+३
रणो वा सावर्थवत्ता एकेनैव सुपाभिहिता तस्मात् सो वर्णपदयोरपि वाक्ये च भवंतीति न विशिष्यते न पृथगभिधातुमुपयुज्यत इति बोद्धव्यमित्यभिधातुमाह॥ ॥ हेरब०
नार्थवत्ता पदे वर्णे वाक्ये चैवं विशिष्यते। नानुपूर्वे वाक्ये वार्थवत्त्वं महता प्रबंधेन व्यवस्थापिते पदानामनर्थकानेवाभिहितानि वर्णानामर्थवत्त्वे केव कथा॥०॥

इदानीं वर्णे पदे वाक्ये च समंकल्पे वाऽर्थवत्त्वोद्द्योत्यते इति किमेतदुच्यत इत्याशंक्याह॥ ॥अभ्यासात्प्रक्रमोऽप्यस्य विरुद्ध इव दृश्यते॥ इह भिन्नान्यागमदर्शना ४०४
नि लौकिके शास्त्रे चागमदर्शिभिस्तत्र तत्राभिनिविष्टैः पुरस्सरं द्वाराणां पृथक् पृथक्प्रक्रमाः परिपाट्यो दृश्यन्ते विरुद्धा इव। परमार्थतस्तु संसमस्तरूपमेकमवि
रुद्धमेव सर्वत्र स्थितमिति। अतश्च सर्वपार्षदत्वादेतदनुपयोगात्कं यं विदाश्रिते। नैतावतोऽभ्युपगतस्याखंडपक्षस्य साग आयात इति बोद्धव्यं॥ इदानीं शब्दस्या
र्थाभिधाने स्वव्यापारं विचारयितुकाम आह॥ ॥विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः॥ अर्थाभिधानसंबंधमुक्तिद्वारं प्रचक्षते॥ इह केचन शब्दो
बद्धार्थः स यदा वक्त्रा प्रति नियतः प्रवार्ये विनियुज्यते तदा तमर्थं प्रकाशयतीति हृद्यं। अतः शब्दस्यार्थप्रतिपादनयोग्यता उक्तिद्वारेव स्यात्॥ अथ किं
दानीमीप स्वाभाविकः शब्दार्थयोः संबंधोऽपौरुषेयो दृष्टो दर्शनमुपेनीयः समीशब्दावक्तृविनियोगमुखप्रेक्षणसंबंधाः। हन्ते वैयाकरणादिनाभवता विमर्षितेन वैयाकरण धु
रेसाश्रौकेतत्समर्थनार्थमाह॥ ॥यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते। तथाभिसंहितः शब्दो भवत्यर्थस्य वाचकः॥ यथा सहजयैव योग्यतया च
क्षुरिंद्रियमर्थविषयदर्शनमुपकल्पसंधृक्संबंधि प्रणिधानमपेक्षते। अन्यथा सर्वदा दर्शनोपजननप्रसंगात् तथैव शब्दः स्वाभाविकेनैव संबंधेनार्थ
प्रत्यायकोऽप्यभिधानसंबंधाभिधानमपेक्षत एव। एतदुक्तं भवति। वाक्यानि स्वव्यापारे [redacted] प्रति यत स्वार्थभाजि भवंत्यमिधयार्थप्रकाशस्य
भिधाख्यं स्वव्यापारं पुरस्कृत्य स्वार्थप्रकाशनं कुर्वतीति बोद्धव्यं। स चाभिधाख्यो व्यापारः प्रयोक्तृसंबंधप्रसिसंधाननिमित्तक इत्यभिसंधानेनोपचर्यते।

७८ 78 यदाह। तथाभिसंहितः शब्दोर्थस्य वाचको भवतीति। अभिसंधानमेव च तत्र शब्दस्योक्तिलक्षणव्यापारतत्प्रीतिरिति शातिः। यदाह भेदपक्षस्तावत्कुर्वे(ते२)त्स्वभि
तापत्तिभेवाभिसंधिरूपात्रात्मप्रतीभवतिस्यच्चाभिसंधानोक्तेरभेदनिर्देशः। अतः प्रचारः च प्रसुषोपि व्यापारः प्रणिधानात्मक एव। उक्तिः कार
णविन्यासेन विना शब्दभावनाभिस्यनुसंधानकारणकः शब्दस्य व्यापारोभिधानानुसंधानमेव वाशात्मप्रतीयतमभिधेति विज्ञेयं। ननु चाभिधा
नमभिधेयं संबंधश्चैतयोरिति तावदेव सुप्रसिद्धं यच्च विनियोगयुक्तिरभिसं[redacted]यानमभिधेयेवं रूपस्य वस्तुनः सोपयोगः प्रतिपाद्यते तदप्रसि
द्धमेवेत्याशंक्याह॥ ॥अप्राप्यवेतः संबंधोदृष्टः कारणकर्मणोः। अभिधानियमस्तस्मादभिधेययोः॥ इह कारका एप यः शलाकाकस्यानिपरस्परमसं भिधाना ५
बद्धानेवंतेषां च यथा क्रियाव्यवधानेन क्रियासमाश्रयणेन संबंधो दृश्यते तथैवाभिधानाभिधेययोर्वाच्यवाचकभावलक्षणः संबंधोभिधा[illegible]व्येनशा ना ६
व्यापारेण नियम्यते इति नपूर्वमत्राभिहितमिति। एतदेव स्फुटीकर्तुमाह॥ ॥बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु। यत्नयोक्ताभिसंधत्ते शब्दस्त
सर्वेषु ३ त्रावतिष्ठते। तथा च बहुषु पर्यायेषु गवादिषु वस्तुन्येकाभिधानेष्वेकशब्दप्रतिपाद्येषु च तत्रार्थेषु सजातीयत्वादेकार्थकारिषु[redacted]
~~[redacted] तिष्ठते। तथा च बहुषु पर्यायेषु गवादिषु वस्तुन्येकाभिधानेष्वेकशब्दप्रतिपाद्येषु च तत्रार्थेषु सजातीयत्वादेकार्थकारिषु संनिहितेषु [redacted]~~
[redacted] ~~तिष्ठते। तथा च बहुषु पर्यायेषु~~ [redacted] संनिहितेषु सत्सु प्रयोक्ता यन्नत्रार्थरूपमभिधत्तेऽभिसंधानेन वि तान ०



णाध्यतदेव स्फुटयितुमाह॥ ॥आम्नायशब्दानभ्यासे केचिदाहुरनर्थकान्॥ स्वरूपमात्रवृत्तीश्च परे १

नियोगेनाभिधाविषयीकरोतीति तत्रैवार्थे वाचकत्वेन शब्दोऽवतिष्ठते नान्यत्रेति स्फुटमेव परिहृत्य[४०९] प्रकारान्तरैर्णां प्रतिपादने।[४१०] अभिधानक्रियायामेसादृर्थस्य प्रतिपादका
न्। नियोगमेदान्यन्यंते तानेवैकत्वदर्शिनः[४११]। तथा चाम्नायशब्दा वैदिका अभ्यासवेलायां नकंचिदप्यर्थमभिदधति। तदर्थानर्थकानेव तानाहुः। पदात एव स्वरूपग्रहणात्प्र
ज्ञिप्यायां प्रतिपाद्यं तेन तस्य स्वरूपप्रधानात्त्वमिति तत्र तदर्था एवोच्यंते। यदा पुनः क्वचिद्विद्यते कर्मणि विनियोगभेदेनाभिसंधानमेदेन त एव विनियुज्यंते तदा स्वव्यापारेणा
भिधात्वेन नन्तदर्थप्रतिपादकाः स्वदर्थनिष्ठाः संपद्यंत इति स्फुटमेवाभिधेयव्यतिरिक्तोन्मज्जंते समभिधायमभिधात्ये वेति न ततद्रूपहृद्वयुपपन्नः[४१२]। एवमेकत्वदर्शिनो ऽभि
धानेऽभिन्नाभिधालक्षणव्यापारसमाश्रयणे न शब्दस्य तत्तदर्थाभिधानैरनुपपादितमिदानीं शब्दस्मेदं समाश्रित्यैषां प्रकरणादिभिरेव तत्तदर्थप्रकाशनमुपपाद
यितुमाह॥ ॥तेषामसन्तनानात्वेनानात्वव्यवहारिणः। अक्षादीनामिवव्याहुरेकजातिसमन्वयात्[४१२]। तेषां शब्दानां भेदवादिनो नानात्वमाहुः। केवलमेकजातिस
मन्वयस्तेषां सादृश्यरूपोऽस्ति। उदाहरणमाह॥ अक्षादीनामिवेति। यथाक्षाद [redacted] सः शब्दाभिन्ना एव स्थिताः
सादृश्यात्त्वभेदेनैव प्रतीयंत इति[४१३]। अत आक्षिमिसाह॥ ॥प्रयोगादभिसंधानमन्यदेषु न विद्यते। प्रयोग उच्चारणं तस्मादन्यत्तेषामभिसंधानमुक्तिरभिधानैव
[redacted] विद्यते केवलं तर्हि नियतमेवार्थमभिदधातीत्याह॥ ॥विषयेषु तच्छक्तित्वात्तत्तु तत्र व्यवस्थितः[४१३]। तत्तत्तत्रविषयेऽनियतशक्ति
त्वाद्धि भिन्नशक्तित्वादेव सशब्दस्तत्रतत्र व्यवस्थित इति[४१३]। तेषामभिन्नत्वे सादृश्येऽपि सत्यर्थप्रकरणादिभिर्निगृहीतार्थाभिधानार्थमवगम्यत [redacted] इत्याह॥ ॥ना

७८ 79

नात्मैवसंज्ञानमर्थप्रकरणादिभिः। नजात्वर्थांतरे हन्तिरन्यार्थानां कथं च न।४७५। युक्तं चैतत् यथैकत्रार्थांतरव्यक्तिलंशाद्द्रव्यमोपलब्धे पुरुषत्वस्सैवान्यार्थत्वं कथमनु
पपद्येतेत्यभिधातुमाह॥ नजात्वित्यादि।४७५। इदानीं पूर्वोक्तग्रहणात्पुनरखंडवाक्योपक्रमेण वाक्यवाक्यार्थनिर्णयं संक्षेपेण कर्तुमाह॥ ॥पदरूपं तु यद्वाक्य
मस्तित्वोपनिबंधनं। कामं विनष्टोस्त्वत्रायं न वाक्यावयवे पदे।४७५। योयमत्र विमर्शो विचारः कामं स पदेष्वेकपदरूपमेव वाक्यं वाचकं नत्वप्रपन्नः। कीदृशं तत्पदरूपं वा
क्यमित्याह॥ अस्तित्वोपनिबंधनमिति। अस्तित्वं अस्तिक्रिया वाक्यत्वे वाचकत्वे उपनिबंधनं यस्य। यद्वस्यापि। अस्तित्वेनानुपक्तो वेत्यादि। अथवा प्रकरणादि
नास्तित्वोपनिबंधनमित्येतत्त्वोपलक्षणं कदाचिन्निष्पत्यात्मतया चेति वोद्धव्यं। तत्रैष विचारो यत्सुताभिधाव्यापारद्वारके वाचकत्वे प्रतिनियतशक्तिकृतं चेति
नतु वाक्यावयवभूते यो द्वारपरिकल्पिते पदे इति। तस्यार्थवत्त्वाविरहादित्यभिप्रायः।४७५। तस्मात्स्फोटरूपमखंडमेव वाक्यं निराकांक्षं वाचकमभ्युपगंतव्यमि
ति दृष्टांतद्वारेणाभिधातुमाह॥ ॥यथैवानर्थकैर्वर्णैर्विशिष्टार्थोभिधीयते। पदैरनर्थकैरेवं विशिष्टार्थोऽभिधीयते।४७६। यथा स्वन्मते वर्णैरनर्थकैरभिव्यक्तो
विशिष्टार्थः पदरूपः स्फोटात्मा वाचकोभिधीयते एवं पदैरनर्थकैरभिव्यक्त एव विशिष्टार्थः स्फोटात्मा वाचकोऽभिधीयत इति।४७६। ननु पदपदार्थसंप्रत्यय
स्तत्रोपजायते एवं पदानां त्वनर्थत्वे कथं तत्र द्रावइत्याह॥ यदंतरालेज्ञानं तु पदार्थेषु प्रजायते। प्रतिपत्तेरुपायोसौ प्रक्रमानवधारणात्।४७७। यदंतरालं पदपदार्थज्ञा
नं विभ्रम[illegible]रूपमेतदंतराले वाक्यवाक्यार्थप्रतिपत्तेरेवोपायभूतं वोद्धव्यं। तस्मान्निरंशत्वेपि वाक्यवाक्यार्थयोः प्रक्रम एव प्रथमस्य मपर एव रूपं तद्योनीवधार्य हेरंब०

४१७
तद्रूतिः। एवं वाचकाश्रयणे प्रकारद्वितयमुक्त्वेदानीं वाच्यमाश्रयणेन तथैव प्रतिपादयितुमाह॥ पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः। संसर्ग एव प्रक्रान्तस्तथा येषु
४१८
येव स्मृतः॥ अनेन श्लोकेनान्विताभिधानसमाश्रयणेन संसृष्टवाक्यार्थप्रदर्शनं क्रियते। तथा ह्यभिहितान्वयवादिनः पूर्वपूर्वार्थानुगतः संसर्गो वाक्यार्थः। अन्विताभि
४१८
धानवादिनस्तु तत्तत्पदार्थानुगतः प्रथमतरमेव संसृष्ट एव। यद्वि परमत्र संनिधानं निदर्शकं यस्येतीति कर्तव्यतामात्रस्वरूपावगतावपेक्षितमिति बोद्धव्यम्॥ ॥अंगीकृते
४१९
तु केषांचित्साध्येनार्थेन साधने। आधारनियमार्थैव सा ``धनानां पुनः श्रुतिः॥ यदा केषांचिन्मते तत्र साध्येनार्थेन साध्यायोनिष्ठे न संसर्गेणेति यावत्। साधनउपकारलक्ष
पुनः ५ णेंगीकृत आश्लिष्टे विनाभावितया स्वयमेवा वध्यते सति यान्तत्र वाक्ये साधनानां श्रुतिः सा नियमायैव बोद्धव्या। कारकाणां यदितत्र परमाधारनियमः क्रियत इति बोद्धव्यं। इंध
४१९
नाधारकरणशक्तिः स्थाल्याधारैवाधिकरणशक्तिरेवमन्यत्र तत्र निःसाधना क्रिया न भवतीति साधनमात्रमनियताधारमाक्षिप्तं न साधारस्सहितमित्याह॥ ॥आधा
४२०
रनियमाभावात्तदाक्षेपो न विद्यते। सामर्थ्यात्संभवस्तस्य श्रुतिस्त्वन्यनिवृत्तये॥ साधनानामाधार [redacted] नियमो नास्ति। करणादिकं तु यो हि नियताधारा हृत्यतदुत्सा
धारत्वाक्षेपः। तत्र साधनेनास्ति। सामर्थ्याद्यदि परं तस्य साधनस्य तत्र संभव एवाभ्यूह्यते। ततः किमाधारा एताः साधनशक्तयः स्युरिति इदं केनगापि सारिकाश्रुतिरन्याधार
४२०
निवृत्तये तासां पर्यवस्यतीति बोद्धव्यं। अथ क्रियां वाक्यार्थमाश्रित्याह॥ ॥क्रिया क्रियान्तराद्भिन्ना नियताधारसाधना। प्रक्रान्ता प्रतिपत्तॄणां भेदाः संबोधहेतवः॥ क्रियै
४२१
व विशिष्टा सर्वत्र प्रथमतरमेव वाक्यार्थत्वेन प्रक्रान्ता। क्रियान्तराद्भिन्नेत्यनेन विशेषकथनं एतदेव स्फुटीकर्तुमाह नियताधारसाधनेति। तत्रैव वाक्यार्थप्रदर्शनं कर्तुमाह॥

वाक्यभेदानां शेषाणां प्रयोगेऽसौ सम्बाधनोपायमात्रमिति बोद्धव्यम्॥ ४२१ ॥अथ स्वपक्षानुसारेण १

८० 80 ॥ ॥अविभागं तु शब्देभ्यः क्रमवद्भ्योऽपरक्रमं। प्रकाशते तदन्येषां वाक्यं वाक्यार्थ एव च॥ [४२२] अक्रम एव निर्विभागः पानकरसादिवत्प्रतिभात्मको वाक्यार्थः स्फोटात्मकं च वाक्यमिति
कयोग क्षेमत्वादेवमुक्तं वाक्यं वाक्यार्थ एव चेति॥ [४२२] इदानीमसत्सोपाधिः सत्यरूपः शब्दार्थ इति विचारपूर्वकं निदर्शयितुमाह॥ ॥स्वरूपं विद्यते यस्य तस्यात्मा न निरूप्यते।
ना..स्ति यस्य स्वरूपं तु तस्यैवात्मा निरूप्यते॥ [४२३] यस्य वस्तुनः प्रत्यक्षादिप्रमाणपरिच्छिन्नस्वरूपं विद्यते। नीलं पीतमिति। तस्य तावतात्मानि रूप्यते। न व्यवहारगोचरतां
नीयते। एतदुक्तं भवति। पदार्थः पृथग्रूपः सन्नपि पंगुप्रायो न विविक्तव्यवहारपदवीं नेतुं पार्यते॥ संसर्गस्य तु न यस्यात्मनः प्रधानस्य तदितरविविक्तरूपावधारणोपितदा
श्रयेण सकलव्यवहारोपपत्तेः पदार्थोपायवदुपायोद्धारमिति तन्निरूपणमेव साफल्यं भजतइति तस्यैव सत्यत्वं युक्तं॥ [४२३] अथ पदार्थासत्यत्वप्रतिपादनपूर्वकं तदाक्षुरि
तस्यैव संसर्गस्य वाक्यार्थत्वं परिघटयितुमुपक्रमते॥ ॥अत्रात्मपरं येषस्वरूपनिर्द्धारणं विदुः। अर्था[redacted]वभासरूपाहिशब्दा
देर्योजायते स्मृतिः॥ [४२४] अर्थस्वरूपनिर्द्धारणस्य स्वरूपपरिच्छेदोऽत्रात्र एव न तत्र शब्द उपायभावमुपयाति। तद्धि निर्विकल्पकैकसमधिगम्यमिति स पर्थः। तर्हि शब्दस्य
यां३ तत्र क्कोपयोग इत्याह अर्थावभासेत्यादि। अर्थप्रतिभासस्य हृष्टोऽस्य तावेव शब्दानामुपयोगः। तेन शब्दस्यार्थेन सह सुदूरमेव विप्रकर्षस्तत श्रुतकथं शब्दोऽर्थ
मभिदधीत सत्यसत्य एव शब्दार्थः पर्यवस्यति। [४२४] अत एतदेवं दृष्टमित्याह॥ ॥अन्यथैवाग्निसंबंधाद्दाहं दग्धोभिमन्यते। अन्यथा दाहशब्देन दाहार्थः
प्रतीयते॥ [४२५] यदि शब्देन यथावस्थितोऽर्थः प्रत्याय्येत तत दाहशब्दसंनिधापितो सौ नाम यक्रियां कथं न कुर्यात्। यतश्च अग्निसंबंधाद्दग्धो दाहमन्यथानुभवति दाहशब्देन हेरंब

बो२

चदाहमन्यथांवगछतीति वाच्यार्थेयोर्नास्ति कश्चिद्वास्तवः समन्वय इति बोद्धव्यं ४२५ तदेवं पदार्थो विपरीतख्यातिरूपोऽसत्ख्यातिस्वरूपो वा बोद्धव्य इति पदार्थस्यासत्य
त्वमभिधायेतराक्षुरितस्य वाक्यार्थस्य सत्यत्वं प्रतिपादयितुमाह॥ ॥एवमिन्द्रियविषयतत्त्वानां पृथगर्थानुपातिनां। इन्द्रियाणां यथा कार्यमृते देहान्न कल्प्यते। ४२६ एवमिन्द्रियवि
षयतत्त्वं स्वरूपं पार्थिवत्वादिना भेदेन यथावत् प्रतिनियतस्यानस्य माश्रयणेन निर्विष्टमभिव्यक्तं तत्त्वं स्वरूपं येषां तानि तथा तेषामिति। तथा पृथक् पृथगर्थं श्रोत्रादिलक्ष
णमनुपतंति विषयीकुर्वंतीति तच्छीलानि तथा तेषां यथा सत्यपि पृथक्स्वभावे देहादिना कार्यं प्रातिस्विकं नोपकल्प्यते। तथैव पदानां केवलानां वाक्यव्यतिरेकेण स्थिता
नामर्थवत्ताविरहः परिदृश्यत इति प्रकृतं योजयितुमाह॥ ॥तथा पदानां सर्वेषां पृथगर्थनिवेशिनां। वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते। ४२७ वाक्यार्थस्वरूपं प्र
तिपादयितुमाह॥ ॥संसर्गरूपं संसृष्टे ह्यर्थे वस्तु गृह्यते। नात्रोपाख्यायते तत्त्वमपदार्थस्य दर्शनात्। ४२८ न पुनरत्र पृथक् पदार्थप्रतिभासावसरे तत्तत्त्वमुपाख्यायते प्र
कटीभवति। यस्मात्पदार्थरूपाद्धि लक्षणमेव वाक्यार्थस्वरूपं दृश्यत इति। ननु वन्ध्यासुतो नास्ति विषाणमस्तीति वद्प्रतीतिकं कथं सर्वमभिधीयते। पदपदार्थप्रतिभासः सं
वेद्यमानोपि नाभ्युपगम्यते। पदार्थो यदि तो वाक्यार्थस्तु सत्यत्वेन निरूप्यत इत्याशंक्य संख्यापरिनिरूपितमेव व्यवहारगोचरतामुपयातीति न स्वरूपेणेति प्रतिपादयितु
माह॥ ॥स्वप्ने न सापि यत्नत्वं न तथा दर्शनं स्थितं। वस्तुसंसर्गरूपेण तद्रूपं निरूप्यते। ४२९ इह संसर्गपरिबोध एव पारमार्थिकस्तद्व्यतिरेकेणान्यस्य विचार्यमाणस्यानुप
पत्तेः स्वप्नयथासत्यत्वेन स्वस्थत्वादिरूपतया स्थितो न तथा तद्बोधस्वरूपदर्शनं पदार्थप्रतिभासावसरे स्थितं। [redacted]। तदवसरे हि वस्तुसंसर्गरूपेण नो।

(81)

८८ लपीताद्युपरक्तत्वमानीलबोधः पीतबोधइतितद्रूपविरहितमपिनिरूप्यते। एवमेतत्संसर्गादिकंवस्तुसंसर्गरूपेणपदार्थोपहितंतथारूपेनरूपविरहितमपिनिरूप्य
तइतिकिमत्रापराद्धं। तस्मात्सर्वथाकेवलःपदार्थः पदंवाऽव्यवहार्यमेवातस्मैतदसत्यमित्युच्यते। ४२९ वाक्यवाक्यार्थौतुव्यवहार्यत्वात्सत्यमतावित्यर्थः। प्रतिपन्नप्रेवाकामेव
प्रयुञ्जतइत्याह॥ ॥अस्तित्वेनानुषक्तोवानिष्कृष्यासमनिवास्थितः। अपोद्धृत्याभिधीयतेयस्माद्ततोवाक्यंप्रयुज्यते॥ ४३० एतदेवस्फुटयितुमाह॥ ॥क्रियानुषंगेणावि
नानपदार्थःप्रतीयते। सत्योवाविपरीतोवाव्यवहारेनसोऽस्त्यतः। ४३१ अतोव्यवहारेकेवलः पदार्थोनास्त्येवेतिबोद्धव्यं। येनाप्येकमेवपदंसाहित्येनान्विराकांक्षायाःस
त्तायाःप्रतिपादकंतत्रापितदप्यस्तिनाम्नास्तित्वेतिक्रियापदसंबंधमंतरेणपरिसमाप्तार्थोनभवतीतिसर्वथाकेवलस्यपदमात्रस्यनास्त्यर्थवत्त्वेतिप्रतिपादयि
तुमाह॥ ॥सदित्येवतुयद्वाक्यं तदप्यस्तीतिनेतिवा। क्रियाभिधानसंबंधमंतरेणनमन्यते॥ ४३२ तत्रचवाक्येसाध्यसाधनेपरस्परमविनाभाविनीअन्योन्यापेक्षकेस
ईये४ त्येएवव्यवस्थिते। तथाहि। साधनंयथानिष्क्रियंनभवतीसाकांक्षावच्चक्रियापेक्षमुच्यते। तथाक्रियापिनिःसाधनानभवतीसाख्यातपदप्रतिपाद्याक्रियालक्षणो पेरुमु४
सत्ताभिधानेनविनाकांक्षानिवर्त्ततइति। ४३२ तत्रसाक्रियासाधनमाकांक्षत्येवेतिप्रतिपादयितुमाह॥ ॥आख्यातपदवाच्येर्थेसाधनोपनिबंधने। विनासत्ता
भिधानेनाकांक्षाविनिवर्त्तते। साधनंहि सत्ताभिधायितत्स्तदवतिष्ठते। ४३३ किंकृतस्तत्रगुणप्रधानभावस्तत्रोच्यते साध्यस्यैवप्राधान्यप्रविभागइत्याशंक्याह॥
॥ ॥साधान्यंतुक्रियापूर्वमर्थस्यप्रविभज्यते। साध्यप्रयुक्तान्यंगानिफलंतस्याःप्रयोजकं॥ ४३४ अर्थस्यवाक्यार्थलक्षणस्याख्यात प्रतिपाद्यस्यक्रियाप्रधा राम
॥४३३॥ साधनमुपनिबध्यनंयस्याख्यातपदवाच्यस्यार्थस्यतस्मिंस्तथाभूते तस्मात्सत्ताभिधानेनविनानाकाङ्क्षाविनिवर्त्तते॥

न त्वा क्रियैव प्राधान्यात्पूर्वं प्रविभज्यते । न साधनानि । यस्मात्तादर्थ्यं साध्यनिष्पत्तये प्रयुक्तानि साधनानां तेनोऽगान्यप्रधानभूतानि तानीति न तेषां तत्र विभागः । एवं क्रियाप्र

युक्तानि बोद्धव्यानि । प्रसंगात्क्रियाया अपि प्रयोजकमाह । फलं तस्याः [redacted] प्रयोजकमिति । फलप्रयुक्ता क्रियापीति फलापेक्षया क्रियाया अंगत्वं बो

द्धव्यं । [४३४] इदानीं सर्वोऽयं साध्यसाधनव्यवहारः काल्पनिकत्वाद्ययोऽयं साध्यसाधनयोः परस्परसंबंध आपेक्षिक एव न वास्तव इति प्रतिपादयन्पुनरपि पदार्थासत्यत्वं व्यवस्थापयितु

माह ॥ ॥प्रयोक्तैवाभिसंधत्ते साध्यसाधनरूपतां । अर्थस्याभिसंबंधकल्पनां प्रसमीहते ॥ [४३५] इदं साध्यमिदं साधनं तयोश्चाभिसंबंधः सर्वमेतत्काल्पनिकं तत्तत्त्वतस्त्यमे

तमेत५ व प्रयोक्तुः समीहामात्रजीवितमिति यावत् । [४३५] यदि हि वास्तवोऽस्यात्तदा वस्तुस्वभावस्य ब्रह्मणाप्यन्यथा कर्तुमशक्यत्वाद्ध्यवस्थितमेवैतत् द्रव्येन्न च तथा परिदृश्यत इति प्रतिपादयि

तुमाह ॥ पचिक्रियां करोतीति कर्मत्वेनाभिधीयते । पक्तिः करणरूपं तु साध्यत्वेन प्रतीयते ॥ [४३६] देवदत्तः पचतीत्यत्र या पाकक्रिया साधाम्येनोपलब्धा सैव पचिक्रियां देवदत्तः करो

तीत्यत्र कर्मत्वेन पक्तिं पाकक्रिया व्यवस्थापिता । पचिक्रियाकरणं तु प्राधान्येनोन्मुक्तरूपं प्रतिपादितमिति नैषा वस्तुगतिः । साधनसमुद्देशे चास्यैवमेतद्वैवक्षिकमिति विस्त

रेण प्रदर्शयिष्यति । तथा संबंधस्यापि काल्पनिकत्वमेव वक्ष्यतीति नेह प्रतन्यते । [४३६] अथवा अनेकशक्तिरर्थः । स्थितोऽपि पदादुपकारवशाद्यथा प्रयोक्तुरभिविवक्ष्यते तथैवा

त्मानमुपदर्शयतीत्याह ॥ ॥यो यो येनोपकारेण प्रयोक्तॄणां विवक्षितः । अर्थस्य सर्वशक्तित्वात्स तथैव व्यवस्थितः ॥ [४३७] तथा चेदमपि [४३७] वस्तुस्वनेकशक्तिखचितत्वात्सहं तद्

तिप्रदर्शयितुमाह ॥ ॥आराद्वृत्तिषु संबंधः कदाचिदभिधीयते । आश्लिष्टो योऽनुपश्लिष्टः स कदाचित्प्रतीयते ॥ [४३८] आराद्वृत्तिषु इति दूरमपि विप्रकृष्टेषु पदार्थेषु कदाचि

ये॥४४०॥+२

८२ 82 स्वरसस्य संबंधः संज्ञो योऽभिधीयते। कदाचित्तु य आश्लिष्टः संबद्धोपि सोनुपश्लिष्टो ऽसंबद्धो दूरत इति विवक्षावशात्प्रतीयते।४३९ रूपांतरमप्याह॥ ॥संसृष्टानां विविक्तत्वं संसर्ग
श्च विवेकिनां। नानात्मकानामेकत्वं नानात्वं च विपर्यये। एकत्वेपि च कल्पनावशान्नानात्वं वस्तुनां दृश्यते। राहोः शिर इति यथा। ना [redacted] नात्मकानां च धवखदिरपलाशादीनामेकत्वमेकस्यां बुद्धौ संकलनरूपं दृश्यते वनमिति यथा। विवेकिनां परस्परविलक्षणानां पदार्थानामयः
शलाकाकल्पानां संसर्गो वाक्यार्थरूपो दृश्यते। यथा देवदत्तः काष्ठैः स्थाल्यां। संसृष्टानां च विभक्तत्वं यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ येषां बुद्ध्या संकलिता द्वा ४
नां सतां पश्चाद्विभागेनावस्थापनं क्रियते।४४० तदेतत्कथमुपपद्यत इत्याह॥ ॥सर्वात्मकत्वादर्थस्य नैरात्म्याद्वाव्यवस्थितं। असंतः प्रतिशक्ति वा शब्द एव निबंधनं।४४१ सर्व
शक्तिरर्थस्तेन तेन रूपेण निरूपितस्तत्तद्व्यपदेशपात्रं भवतीति नियतशक्तिभिः शब्दैः स यथायथं प्रदर्श्यत इति स्थितं। अथवा निरात्मक एवासत्सम्भूतो सावितियथायथं नथा ६
याविवक्षया निरूप्यते तथा तथा व्यवस्थानमुपदर्शयतीति शब्दैः सर्वथैव व्यपदिश्यत इति बोद्धव्यं।४४४ इदानीमर्थस्वरूपं शब्दानैवस्पृष्टमिति केवलं तत्तद्रूपविमर्शकोर्थपार्थ
स्योपलक्षणाभावेन स्थिता व्यवहारोपयोगितामुपयांतीत्यभिधातुमाह॥ ॥वस्तूपलक्षणं शब्दो नोपकारस्य वाचकः। न स्वशक्तिः पदार्थानां संस्पृष्टुं तेन शक्यते।४४२॥ स्व ३
शब्दार्थयोर्न वाच्यवाचकभाव उपपद्यते। तथा सति शब्दानामर्थस्वरूपं प्रकाश्यतामुपेयान्न च तथा दृश्यत इत्याह॥ ॥संबंधिधर्मा संयोगः स्वशब्देनाभिधीयते। संबं
धः समवायश्च संबंधित्वेन गम्यते।४४३ संयोगशब्दात्संयोगो द्रव्ययोरिति यथा वस्तुनि विशिष्टस्वरूपस्तत्र संबंधिस्वभावः प्रतीयते न च तस्य तद्रूपं। एवं समवायशब्दात्समवा हेरंबः
यः प्रतीयत इत्याह। सम्बन्धः समवाय इत्यादि सम्बन्धित्वेन सम्बन्धस्वरूपविरहेण समवाय इत्यस्मात्प्रतीयते॥ अथवा

पदासंयोगशब्देनासौ संबंधः स्वतंत्रोऽभिधीयते तदा तत्र समवायः संबंधत्वेन गम्यत इति। पदासंबंधत्वेन गम्यत इति पाठस्तदैवं योजनीयं। [४४२] पदार्थानां स्वतो रूपं न किंचिद्भवति स्थिते।
यथा यथा निरूप्यंते तेन तथा तथात्मानमासादयंतीत्याह॥ ॥लक्षणाद्भवति स्थितेपदार्थानं नु वस्तुतः। उपकारात्स एवार्थः कथंचिदनुगम्यते। [४४४] स एवार्थः केनचित्कथंचिदु
पयोगादन्यथा व्यपदिश्यते। इत्येवमनेकप्रपंचैरसत्यसंभूत एव पदार्थ इति संग्रहव्यवस्थापितं। [४४४] इदानीं वाक्यार्थस्य कस्य संभूत इति प्रतिपादयितुमाह। ॥वाक्यार्थे योऽभि
संबंधो न तस्यात्मा क्वचित्स्थितः। व्यवहारे पदार्थानां तमात्मानं प्रचक्षते। [४४५] परस्पराभिसंबंधस्वरूपः पानकरसादिवदनिर्विभागोऽनेकशब्दगोचरो वाक्यार्थस्तस्य न क्वचित्स्वरू
पतया आत्मा स्थितो वधारयितुं शक्यत इति यावत्। पदार्थानां पुनरयं शाब्दाकाकल्पानां व्यवहारावसरे तमात्मानं जीवितमिव प्रचक्षते। तद्भूतात्तत्स्मृति पारित्तपदार्थो
[redacted] देशो न सर्वस्य
कस्यचित्प्रवृत्तिनिवृत्त्योः साफल्यात्। स चैकस्मिन्न्यदार्थे समुदाये एव वा परिसमाप्तो बोद्धव्यः। [४४५] अथवानैवासौ क्वचित्परिसमाप्त इदं तदित्थं रूपतयानुपलक्षणात्केव
लं पदार्थसंबंधिना स्वरूपेणाखंडस्य वाक्यार्थस्य स्वरूपं प्रतिपद्यत इति प्रतिपादयितुमाह॥ ॥पदार्थसमुदाये वा समाप्तो नैव वा क्वचित्। पदार्थरूपभेदेन तस्या
८२ त्माप्रविभज्यते। [४४६] एतदुक्तं भवति। न पृथगेव गृहीतग्राहितया स्वरूपं विवेक्तुं शक्यते। परोपाधिद्वारकमेव सर्वदा तस्य निरूपणमवसातव्यमित्युच्यते। [४४६] एतदेव स्फुटीकरणमा
ह॥ ॥अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबंधनं। साकांक्षावयवं भेदे तेनान्यदुपवर्ण्यते। [४४७] तस्मान्वाख्यानाय योऽयं पदार्थभेदोऽपोद्धृत्य स तस्यैव प्रतिपत्ति [redacted] नि
भेदः

८३ 83 बंधनं बोद्धव्यः। अतः पदार्थानां भेदे क्रियमाणे सति तेनापोद्धृते न पदार्थभेदेनान्यदेव पदार्थव्यतिरिक्तं वाक्यार्थस्वरूपमुपवर्ण्यते प्रकारीक्रियते। कीदृशं सा कांक्षा
वयवमिति। भेदे सति साकांक्षा अवयवाः पदार्थस्वरूपाः प्रतिपत्त्युपायाः प्रसृतास्तथाभूतं तथाभूतस्य च वाक्यार्थस्य नानात्वं क्रियत एव तस्य निर्विभागस्योपाधिकृतः
पदार्थद्वारकः प्रविभागो ४४८ नानारूपत्वमनुगम्यते प्रतीयते ४४७। परमार्थस्त्वेक एवासाविसाह। अनेकत्वेऽप्येकस्य प्रविभागोऽनुगम्यते। एकार्थत्वं हि वाक्यस्य मात्र
यापि प्रतीयते। वाक्यस्य स्फोटात्मनो वाचकरूपस्यैकार्थत्वमेक एव निर्विभागस्वरूपो वाच्योऽर्थो यस्य तत्तथा तस्य भावस्तत्त्वं प्रतीयते कथं मात्रयापीति। यद्
तस्य मात्रया नियतसंख्याकेनाल्पीयसा शब्देन योगोऽभिसंबंधो दृश्यते। प्रयोक्तं। इग्यणः इति योगे स्थानादेशभावलक्षणो वाक्यार्थः स संप्रसारणमिति व्यपदिश्य
ते। अतः संप्रसारणमित्येवमेकसंख्येन लघीयस्त्वान्मात्रया व्यपदिश्यते। तस्य योगेऽप्यदात्र परिदृष्टस्य [illegible] दैतदवगम्यते यद् तानंशा एक एवाखंडस्वरूपो सो वा
॥४४८॥ नदे ४ क्यार्थोऽन्यथा संप्रसारणमित्येतेनैकसंख्याकेन कथं युज्येत वक्तुमेवं वाक्यार्थः स स्वरूपः पदार्थस्तस्य एवेति निर्णीतं। स च वाक्यार्थो बौद्ध एवाबाह्यरूप इति
प्रतिपादयितुमाह। ॥संप्रसार्यार्पा द्वाद्वार्थः सन्न सन्नु विभज्यते। बाह्यीकृत्य विभागस्तु शक्त्यापोद्धारलक्षणः॥ ४४९ संप्रसरो बुद्धिविज्ञानमित्यर्थान्तरं। संप्रसरोऽ न ३
र्थोऽभिधेयरूपो यस्यासौ तथा। तथाभूतात्तस्माद्वाद्वार्थाद्वाक्यार्थाद्वा स्वार्थः सन्न बाह्यरूपतया विद्यमान एवाथवाऽसन्न बहिरसत्यभूत एव विभज्यते। विभागेनानुग हेरंब ०
म्यते व्यवस्थाप्यते। कथं कृत्वेत्याह। बाह्यीकृत्येति। अवास्तव एवासौ बाह्यस्वरूपतया प्रथते विवेकानवधारणात्तद्रूपविकल्पेकाकारेण वाक्यार्थप्रतिपत्त्युपाया

ता:पदार्थव्यक्तयो नव्यवस्थिता: यदिहि तत्र ता:स्यु: तदाह्यतीतेऽवगते पर्यर्थे ३

दसौ विभागेनानुगम्यतेइतियावत्।विभागस्तत्रकीदृगाइत्याह॥शक्त्यपोद्धारलक्षणाइति।शक्तीनांपदार्थसंबंधिनीनामपोद्धार: पृथक्करणंलक्षणं।यस्यासौत थापदार्थशक्तयस्तस्मादपोद्धि [redacted] पंतरइत्यर्थ:।अन्यत्रतुबोद्धेवाक्यार्थसमाश्रितेश्च क्तीनांतत्राविद्यमानत्वात्तस्मादपोद्धारस्तासांकीदृश:स्या त्स्यादेवार्थक्रियावाप्ति:।तस्माद्धोद्धादर्थादन्यत्रवास्तुएवार्थेता:शक्तयोव्यवस्थितास्तत्रबोद्धादर्थादन्यत्रवास्येऽर्थेविद्यमानमपिताासांरूपंनिराकारेणविज्ञा नेनोपलभ्यते।तस्माद्विज्ञानाकारस्यवास्यस्यचार्थस्यशक्तितएकाकारेणविनाव्यवहारोनोपपद्यतइतिवास्तीकृत्येत्युक्तं।तथाचैकयोगक्षेमत्वाद्बोद्धार्थवास्या र्थयोरेसुक्तोबोद्धेप्यर्थेशक्त्यपोद्धारलक्षणोविभाग:।तत्रयदिविज्ञानाकारस्यविकल्पवासनामाहात्म्याद्बाह्येनैकीकृतस्यसत्यतोबहिरर्थोस्तियेनोपजन्यतेत द्बाह्यएवशक्त्यर्थ:नचेदसन्नेवबहिर्बौद्धएवशब्दार्थइतिनिर्णय:।अथवाक्यविचारप्र[redacted]स्तावेवाक्यानामेकवाक्यत्वंविभिन्नवाक्यत्वंवामतभेदेनप्रतिपा

तिङ्गंतिङ्गो४ दयितुमाह॥ ॥बहुष्वपितिङ्.तेषुसाकांक्षेष्वेकवाक्यता।तिङ्तेभ्योनिघातस्यपर्युदासस्तत्पार्थवानेहवार्त्तिककारेणाख्यातंस्यात्परकारकेविज्ञेयणंवाक्यमित्य

त्रैकवचनस्याविवक्षितत्वादेकतिङ्.तिवाक्यलक्षणंतत्प्रतिपादनादनेकाख्यातसद्भावेवाक्यभेदएवेष्यते।सूत्रकारेणत्वतिङ्इतिप्रतिषेधोपादानात्सामर्थ्यात्तत्र ने ३

पिबहुषुतिङ्.तेषुसमाकांक्षत्वात्तत्रैकवाक्यतेवेष्यतइतिप्रदर्शितंबहुष्वपीत्यनेन।वार्त्तिककारमतेनवाक्यभेदस्तत्रेत्युपदर्शयितुमाह॥ ॥एकतिङ्वाक्यस

वाक्यंतुशीर्षत्वेनियतलक्षणं।तस्यातिङ्ग्रहणेनाथोवाक्यभेदान्नविद्यतेनियतलक्षणमितिविवक्षितेनेकत्वमित्यर्थ:।केषांचित्तुनरनेकाख्यातसद्भावेपिवा

वा३

८४ 84 क्यापेक्षमेदा भेदौ व्यवस्थितावेवेत्याह॥ ॥तिङन्तं न तत्सुकेषु युक्तयुक्तेषु वा पुनः। मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः॥ ४५२ इह मृगः पश्यत यातीत्यत्र तिङन्तं
तरसद्भावाद्वाक्यभेदएवं तथा च मृगः पश्यत यातीत्यत्र च संबंधात् एकं वाक्यं। अनंतरं विभक्तिविपरिणामेन कर्मपदेन प्रत्यवमर्शो देवं मृगं पश्यतेति द्वितीयं
वाक्यं। अन्यस्त्वाह। युक्तायुक्तत्वाद्वयोरपि तिङंतेष भेदएवं तथा ह्यत्र मृगशब्देन यातिपदस्य योगः। तद्युक्ते न यातिपदेनाख्यातान्तरस्य योगः। तेनात्र मृगकर्तृ
केऽस्मरणे पश्यतेति हृष्टिक्रियापेक्षया एकमेव वाक्यमिति केचित्॥ पश्यतेति बहुवचनं ह्त्वानुरोधात्। वार्त्तिककारस्याप्येकतिङ् स्वेकतिङ् प्रधानतिङ त्वं ४
नापेक्षया प्रतिपाद्यमानं सत्त्वं कारमनानुगुण्यं भजत एवेत्यनयोर्नास्ति मतभेदः। तदपरिणामतभेद एव बोद्धव्यः॥ ४५३ अथ वाक्यपरिसमाप्ति ■ स्तेन पूर्विका
नानावाक्यतेकवाक्यतावाक्यं तुल्यानामंतेसाकांक्षतं शब्दलक्षणा वाक्यं परि समाप्तिर्वा द्रव्या नार्थलक्षणो यत्र साकांक्षता नाकांक्षत्व विचारमाह॥ ॥इतिक
र्त्तव्यतार्थस्य सामर्थ्याद्यस्य कांक्ष्यते। अत्र शब्दलक्षणाकांक्षं समाप्तार्थं तदुच्यते॥ ४५३ अविद्यमानाः शब्दलक्षणाश्रयाश्रिता आकांक्षा यस्मिंस्तद्वाक्यं समाप्ता
५५३ र्थमुच्यते। तदवगतस्यार्थस्य तु सत्त्वसामर्थ्याद्द्र्थितथाभावलक्षणान्नदीयाम् इति कर्तव्यतायामाकांक्षाजायनेनावताननत्वेतद्वाक्यमपरिसमाप्तमित्युच्य
त इति बोद्धव्यं। यथा व्रीहयो वहन्तंतामि स्वत्र शब्दापेक्षाताव नास्ति व्रीहीणां तु वहननमुलूखलमुसलकर्मकर्त्रादिसंनिधानमंतरेणानसम्पद्यत इति त ■
दपेक्षणाद्वाक्यं नात्र परिसमाप्तमिति न युक्तं वक्तुं। शब्दलक्षणापेक्षा योगादितिं तद्वस्फुटीकर्तुमाह॥ ॥तत्साम्नाख्यानमात्रे तु यावानर्थोनुषज्यते। विना हेरंब

॥४५३॥ए

योगेण शब्देन प्रतिपादनेन विना
पितत्त्वयोगेण श्रुतेर्वाक्यं समाप्यते ॥४५७॥ व्रीहीणामवहननमात्रमत्रान्वाख्यायते तस्मिंश्च सति उलूखलादिसन्निधानं यदत्रानुषज्यते तत्सम
पितत्वतद्वाक्यं श्रुत्या शब्दव्यापारेण समाप्तमेवेति बोद्धव्यम् ॥ इदानीमर्थमसाधारणाभेदेऽपि शब्दद्वैतेन गुणप्रधानरूपतयाऽभिधानं शब्देषु संभवतीति प्रसंगाच्चङ्क्रमणे प्रति
पादनं कर्तुमाह ॥ ॥ चंक्रम्यमाणोऽधीयानो जपं श्चङ्क्रमणं कुरु ॥ तादर्थ्यं साविशेषेऽपि शब्दभेदः प्रतीयते ॥ चंक्रम्यमाणो जपं कुरु । अथवा जपं श्चङ्क्रमणं कुर्वि
त्यत्र उभयत्राप्यत्र पविधिः प्रतीयते केवलं चङ्क्रम्यमाणो जपेत्यत्र जपः प्राधान्येनाभिधीयते चंक्रमणं गुणत्वेन । जपं श्चङ्क्रमणं कुर्वित्यत्र तु जपस्य गुणभावः
प्राधान्यं तु चंक्रमणस्य । अयमुभयथापि जपयुक्तस्य चंक्रमणस्यार्थभेदो न कश्चित् शब्दप्रतिपादनवैलक्षण्यमात्रमेवावसीयत इति । एवमर्थाभेदेऽपि शब्दप्रति
पादनवैचित्र्यमुपदर्शितमिदानीं शब्दभेदान्मामर्थाद्यर्थप्रतिपत्तिवैचित्र्यं भवतीत्यत्र शब्दमपि व्यापारं प्रदर्शयितुमाह ॥ ॥ फलवन्तः क्रियाभेदाः क्रियांत
रनिबंधनाः । असंख्याताक्रमो दृष्टो रेकाख्यातनिदर्शनाः ॥ यावज्जीवमग्निहोत्रं जुहोति । तथा यज्ञेऽते देवदत्तः सादावेकाख्यातनिदर्शनाः । एकमाख्यातपदं
निदर्शनं वाचकं येषां ते तथाभूताः क्रियाभेदाः प्रतीयन्ते भेदश्च स्वरूपेण फलेन च भवतीत्याह फलवंत इति । फलभेदवंतः इत्यर्थः । स्वर्गकामः कदाचिद्यु
जते कदाचिद्वृष्टिकामः कदाचित्पुत्रकामो धनकामो वेति । फलभेदस्वरूपमाह क्रियांतरनिबंधना इति । इतिकर्तव्यतांशक्रियांतराणि निबंधनं येषां ते त
थाभूताः । किं च बहुना क्रमेण प्रातिस्विकेनेतिकर्तव्यतया उद्देशेन फलस्वरूपेण च ते संख्यातुमशक्याः एव क्रियाभेदास्तेनाख्यातेनैकरूपेणाभिन्नेनेव
निदर्श्यन्त इति बोद्धव्यम् । एतदेव स्फुटीकृत्य प्रतिपादयितुमाह ॥ ॥ निवृत्तभेदस्य सर्वैव क्रियाख्यातेऽभिधीयते । श्रुतेरशक्याभेदानां प्रविभागप्रकल्पना । आ

८५ 85 ख्यातपदे क्रियासैवैव निवृत्तभेदा सामान्येनाभिधीयते। यस्माच्छ्रुतिसामान्येन कृताद्भेदानां प्रविभागरूपता व्यवसायानुमन्तव्या। ४५७ उदाहरणमाह॥ ॥अश्वमेधेन यक्ष्यं
तेराजानः सत्रमासते॥ ब्राह्मणा इति नाख्यातरूपं भेदः प्रतीयते। ४५८ अत्र फलसाधनभेदात् यजिक्रियायाः सत्यपि भेदे नैवाख्यातशब्दात्तत्प्रतीतिरस्यर्थे सामर्थ्यानु
भेदस्तस्या अवगम्यते इति नानाशब्दधर्माः ४५८ वैदिकमप्युदाहरणमाह॥ ॥[redacted] स कृच्छ्रुता सप्तदशसनाहत्त्रापि याक्रिया। प्राजापत्येषु सामर्थ्यात्सा भेदं प्रति
४५८ पद्यते। सप्तदशप्राजापत्यानेकवर्णान् ज्ञालभूपरालभेते त्यत्रानाहत्तापाला लभन क्रियासकृच्छ्रुता च वेमानाहत्त्रैव केनावगतोत्तरकालं त्वालम्भभेदद्भेदेनाव
यस्यांन्वाख्यानमा५ तिष्ठत इति बोद्धव्यं। ४५८ यस्मात्तु आख्यातानन्तर्गतोधातुर्निवृत्तभेदायाएव क्रियायाः प्रतिपादकस्तस्माद्भेदासंभवाद्यथासंख्येनसंबंधानुपपत्ते र्भुजिक्रियादेवदत्तादि
हु॥६ षु प्रत्येकं भवति छत इत्यौदेवदत्तादिषु भुजिः प्रत्येकं भवति छतेः प्रतिस्वंतंत्रं वाक्यं वाभेदेन प्रविभज्यते। ४६० देवदत्तादिकर्तृकाभुजिर्वाक्यार्थरूपात्र प्रत्येकं भवति छ
तइत्यर्थसमाप्तिप्रदर्शनं। शब्दस्य समाप्तिमप्युपदर्शयितुमुक्तं प्रतिस्वंतंत्रमित्यादि वाक्यमेवात्र प्रत्येकं देवदत्तादिषु भेदेनावतिष्ठत इति बोद्धव्यं। ४६० ननु देवद
दान्वयर२ त्तयज्ञदत्तविष्णुमित्राभोज्यन्तामित्यभेदरूपमेव वाक्यं प्रयुक्तमतः कथमस्माद्भेदेनावसायः स्यादित्याह॥ ॥उच्चारणे तु वाक्यानामन्यद्रूपं निगृह्यते। प्रतिप
त्तौ तु भिन्नानामन्यद्रूपं प्रतीयते। ४६१ वाक्यानामन्योच्चारणसमयेस्वरूपवृत्तिः प्रतिपत्त्यवसरे त्वन्यथैव स्वरूपावसायः इति संक्षेपाख्यानस्याभेदेऽर्थेपर्यालोच
नेनात्र प्रत्येकं समाप्तिर्वाक्यवाक्यार्थयोः पर्यवस्यतीत्युच्यते। ४६२ शास्त्र विषयमप्येतदेव प्रदर्शयितुमाह॥ ॥एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते। कर्तरीति स हेरंब०

दृष्टा ४६४

कवाक्यताविरहादन्येन प्रत्ययविधायकेन सम्बन्धं नैवापेयादित्यभिमतन्तं निष्पत्तिरेव तस्माद्यदेतदुपनिबन्धनभूतं सामान्येनासंयुक्तं विधि
नैवापान्तं सकृद्ग्रहणकवाक्यं सद्विभागवाक्यानामवान्तर ४

यान्तच्चपश्वादिषु विभज्यते। ४६२ शास्त्रेपि च कर्तृरिक्तादिसेकं प्रत्ययार्थप्रतिपादकं सामान्येन ग्रहणकवाक्यमुपादीयते। न च प्रत्येकं प्रत्ययार्थोपाधिषु पश्वादिषु विभि
न्नेषु विषयेषु विभागेन संबंधमुपनीयाभिमतलक्ष्यनिष्पत्तये व्यापार्यते इति प्रत्येकमेव तत्त्वारिस्समाप्यते। यदि पुनः संयुक्तविधिनोपादीयेत तदभिमतसिद्धये न सा
दित्याह॥ ॥यथाकांक्षानिवर्तनं तत्र दूनसा सकृदुक्तौ। नैवान्येनाभिसंबंधं तदुपेयालक्षणे च ४६४ नार्थः दिसकृदेव प्रत्ययविधायकेनैव सहैवोपादानार्थप्रसिद्धमानेराकां
क्षानिवार्येत तदा तद्योगेन तत्रैव परिक्षीणशक्तित्वाद्ग्रहणवाक्यानां योनिःकारणं बोद्धव्यमित्याह॥ ॥एकरूपमनेकार्थं तस्मात्तदुपनिबंधनं। यो निर्विभागवाक्यानां
तेभ्योऽनन्यदिव स्थितं। ४६५ अनेकेऽर्थाः प्रत्यास्यायत्ततत्तथा। अवान्तरवाक्यानुपनिबध्यंते यस्मिन्निस्तुपनिबंधनं। अथ तेभ्योऽनन्यदिवाभिन्नमिव स्थितं। अथ च प्र
त्येकं भेदेन संबंधमुपगच्छद्यथावल्लक्ष्यसिद्धये विभवतीति। ४६५ अयाख्यानेधातुवाच्याऽसत्त्वभूता पूर्वापरीभूतावयवासाध्यमानावस्थालक्षण पचयात्मिकाया
क्रियात्तस्याः कीदृशो जातिव्यक्तिव्यवहारः समाश्रीयत इत्याह॥ ॥क्वचित्क्रियाव्यक्तिभागे रूपकारे प्रवर्तते। सामान्यभाग एवास्याः क्वचिदर्थः प्रसाध
कः। ४६६ क्वचिदिति बाधकविकल्पसमुच्चयातिशयप्रशंसादौ विषये क्रियाव्यक्तिभागेः समीहिता [redacted] ये सिद्धो प्रव
र्तते। जातिसमाश्रयेण विकल्पसमुच्चयाद्यनुपपत्तेः नहि देवदत्तः पचति यज्ञदत्तः पचति इत्यादौ जातेः समुच्चयो घुपपद्यते। क्वचित्तु यजते पचत

नि॥ ६

८६ 86 इत्यादौ देशकालसाधनादेर्व्यक्तिव्यवहारो वास्तवः स्यादिति संदृष्ट्या लोकव्यवहारसिद्धये तत्तत्क्रियापरामर्शात्सामान्यभाग एव वाक्यार्थमुपकरोती। इ
हापि ज्ञातिभागमेव क्रियासंबंधिनं शब्दाः प्रत्याययंतीत्याह॥ ॥कालभिन्ना ह्यभेदाश्च ये चाप्युष्ट्रासिकादिषु। प्रक्रमे जातिभागस्य शब्दात्तेन भिद्यते॥ ये क्रि ॥४६७॥+२
भेदाः ३ याभेदाः क्रियाविशेषाः कालभिन्नाः पचत्यपाक्षीत्पक्ष्यतीत्येवमादयो ये चाप्युष्ट्रासिकादिषु विषये साधनभिन्ना उष्ट्रासिका आस्यते हतशायिकाः शय्यंते
इत्यादौ तेषु क्रियासंबंधतो जातिभागस्य प्रक्रमे सामान्येनैवापर्यालोचितदेशकालसाधनतया प्रक्रमे शब्दात् न। शब्दस्वरूपं न भिद्यते। साधनसंबंधकृतस्त
त्र भेदो न प्रथममतद्गतिप्रावर्त्ता। तदेवं देवदत्तादिषु भुक्तिः प्रत्येकमवतिष्ठत इत्यादिना पूर्वलक्षणभेदमाश्रित्यैका क्रिया नैकैः साधनैः प्रत्येकमर्थसमाप्त्या वा
कासंबंधमुपयातीति प्रदर्शितं। इदानीं यत्र विजातीया विभिन्नपदवाच्या क्रिया एकशब्दवाच्या निच साधनानि तत्र कथं भिन्नाभिः क्रियाभिस्तेषां साधना
नां संबंधः स्यादित्याशंक्य तत्रापि प्रतिपत्तिकालसमाश्रयेण न भिन्नानामेव साधनानामवगतानीति तथैवैताः क्रियास्तैर्भिन्नैरेव साधनैः प्रत्येकमर्थस
माप्त्या वा कासंबंधमुपयांतीति प्रतिपादयितुमाह॥ ॥एकसंख्येषु भेदेषु भिन्ना जात्यादिभिः क्रियाः। भेदेन विनियुज्यंते तत्तुल्यास सकृच्छ्रुतौ॥ समानसंख्ये
षु भेदेषु साधनविशेषेषु तेषु जात्यादिभिरिति जात्या आदिग्रहणादिति कर्त [redacted] यतादिभिश्च याः क्रिया भिन्ना असंबद्धा उपात्तास्ताः साधनाभि हेरव०
धायिनः शब्दस्य सकृदभेदेन श्रुतावपि प्रतिपत्तिभेदसमाश्रयेण न भेदेनैव विनियुज्यंते संबंधमुपगच्छंतीति द्योदाहरणमाह। अत्यादिषु यथा भिन्नाभं

जिमक्षिदिविक्रियाः।प्रयोगकालाभेदेपि प्रतिभेदंपृथक्स्थिताः।४६८ अक्षाभङ्ग्यंतांभक्ष्यंनोरीयंताभितियाभिन्नजातिका [redacted] भिन्नत्वाद्वाच्याप्यक्रियास्या
स्तावाक्यभेदोपादानरहिताअपिप्रत्येकंसमाप्ताभेदेनैवस्थिता इति।४६९ यस्मादत्रसाधनानितत्रनिबद्धानिभेदेनैवोपात्तानीतिप्रतिपत्तिवेलायांभेदेनैवक्रियायथास्वंसं
बंधमुपयांतीतितंत्रन्यायप्रतिपादनपूर्वकमभिधातुमाह॥ ॥अक्षाणांतंत्रिणांतंत्रमुपायस्तुल्यरूपता।एवंक्रमोविभक्तानांतन्निबद्धासहश्रुतिः॥ तुल्यरूपते
त्यनेनतंत्रंव्याचष्टे।युक्तंचैतद्यस्माद्द्वाः क्रमेणविभागेनैवकदाचित्प्रयुज्यंते।कदाचित्तंत्रन्यायसमाश्रयणेनयुगपदेवेतिशब्दानांप्रयोगवेलायांक्रमयौगपद्येउ
पायस्तत्रतंत्रेणयुगपदेवभिन्नाःप्रयुक्ताअक्षाइतिक्रियाभेदेनैवैषांसंबंधंगच्छंति ४७० अथक्रमयौगपद्यस्वरूपमत्रोद्दिश्यव्याख्यातुमाह॥ ॥द्वावभ्युपायौशब्दानां
प्रयोगेसमवस्थितौ।क्रमोवायौगपद्यंवायौलोकोनातिवर्तते।४७१ तत्रक्रमेविभिद्यंतेरूपंयौगपद्येनभिद्यते।रूपविभागेनैवक्रमः।साधारण्येनयौगपद्यं।१०॥ तत्रभिन्ना
[illegible]॥४ क्रियायौगपद्येपिशब्दानांप्रयोगेक्रमरूपमेवानुपततीत्यर्थः तथाभावात्क्रमरूपानुपातित्वेवबोद्धव्येतिप्रतिपादयितुमाह॥ ॥क्रियास्तुयौगपद्येपिक्रमरूपा
नी॥४७२॥+२ नुपातिनीतथाचैकाकृतात्कस्येवभंजनेनविभीतकदेवनाक्षयोः। न यथाविभीतकाक्षस्येवभक्षणेनेरतयोः।देवनाक्षस्येवदेवनेनपूर्वयोरित्यर्थः तथाभावाद्यौगपद्ये
पिक्रमानुपातित्वंर्थस्याविति।ततश्चनेक्रमयौगपद्येभेदसंसर्गशक्ति रूपेशब्दव्यापाररूपेअपिशब्देभ्योभिन्नेइवव्यतिरिक्तेइवस्थिते लक्ष्येते।परमार्थतस्तुश
ब्दशक्तीएवक्रमयौगपद्येइत्यभिधातुमाह॥ ॥भेदसंसर्गशक्ती देशब्दाद्भिन्नेइवस्थिते॥किंतु शब्दस्यैवेतेद्वेशक्तीपदेदृश्यक्रमाक्रमेणावभातिसंसर्गशा
स्य

३१

८७ क्यानुयुगपदिति॥७१॥ नन्वेवं भेदसंसर्गप्रयोगे नैकेन क्रियापदेन संबंधाद्दित्वम् तत्र एवासाधारण्याद्यौगपद्यं क्रमस्वरूपयोर्भेदात्कथं युगपत्प्रयोगे क्रमरूपानुपातित्वमेव क्रि
87 याया: श्रुतेरुक्तमित्याह॥ ॥यौगपद्येप्यनेकेन प्रयोगे भिद्यते श्रुतिः॥४७३॥ यौगपद्येपि साधनस्य प्रयोगे भेदेन क्रियापदसंबंधाद्दित्वत एव साधारणी श्रुतिरिति। त पा२
पा३ त्रैं हिंसाभिन्नैवोपात्तेत्यर्थः॥ अथवा अक्षा इत्यत्रोद्भूतावयवभेदः समुदाय एव प्रतिनिर्दिश्यते तत्रावयवधर्मेण समुदायोऽप्यपदिश्यते इत्येवं भेदमुपपादयति यथा
योगप्रत्येकमर्थे समाप्यावा क्रियाणां भिन्नानां विनियोगः क्रियत इत्याह॥ ॥अभिन्नो भेदरूपेण स एकोऽर्थो विवक्षितः। तत्रावयवधर्मेण समुदायोऽनुगम्यते॥४७४॥
अभिन्नः समुदायस्वरूपः भेदरूपेणोद्भूतावयवभेदतया प्रोक्तार्थो विवक्षितस्तत्रावयवधर्मेणाभेदेन क्रमेणेति यावत्समुदायोऽनुगम्यते उपोद्बलो क्रियत
इति भेदप्रतिपत्तौ भेदेनैव क्रियाणां संबंधः। अतश्चास्य समुदायस्य भेदप्रतिपादने प्रत्येकं वाक्यार्थः परिसमाप्यते॥४७५॥ अथवा वचनभिन्न एकशब्द एवाक्षो भुक्तां अ
सोदीक्षतामित्येवमवांतरवाक्योपश्लाविनी साधनश्रुतिर्भेदेनैवावृत्तिष्वत इत्याह॥ ॥भेदनिर्वचने वा स प्रत्येके वा समाप्यते। श्रुतिर्वचनभिन्ना वा वाक्यभेदे वति
॥४७६॥+२ ध्वनौ शब्दपरिसमाप्तिर्भेदप्रकारमाह॥ ॥तन्नैकवचनांतो वासौ क्षशब्दः प्रयुज्यते। एकस्मां द्वाक्यभेदेन संबंधिनि यच्च ह्रियमाणे समक्षो भक्ष्यतामित्याद्ये हाका ३
कवचनस्येवाक्षशब्दस्य प्रयोगः कदाचित्॥१०॥ अथवाप्याक्षेति प्रत्येकं बहुवचनांते नैव वाक्यभेद इत्याह॥ ॥प्रत्येकं वा बहुत्वेन प्रविभागोऽथवा श्रुतिः॥ अक्षाभ
अंतामित्यादिकः प्रविभागः श्रुत्यन्तनिक्रमेणैव वाक्यानां करणीयः॥४७७॥ इदानीमभेदवादिनामपि मते द्विष्ठानां वाक्यानां तत्र। किं भेदेनैव विभागमभिधानुमाह॥ ॥ हेलंब

दर्शिनाम्॥ अनेकशक्तेरेकस्य स्वशक्तिः प्रवि १

हि ष्टानि शानि वाक्यानि तेषामपेकत्वेंभज्यते॥ द्वयोरर्थयोरस्ति ष्टंतीति द्विष्टानि शास्त्रीयाणि लौकिकानि चयानि वाक्यानि तेषामपि शब्देकत्वदर्शिनां मतेएकस्यैव तस्य प्र
तिपादकस्य शब्दस्यानेकशक्तेरसौ स्वशक्तिरेव प्रविभज्यते। यथा इग्यणः संप्रसारणं द्विर्वचनेचितद्भूरति वहस्या वहति भा राहं शास्त्रिय ः॥ तदस्य ब्रह्मचर्ये मित्यादीनि
शास्त्रीयाणिं तथा श्वेतो धावति। अलंबुसानां यातेत्यादीनि यानि लौकिकानि वाक्यानि तेषामर्थद्वय प्रतिपादनाय शक्तिविभज्यत इति शक्तितंत्र प्रतिपादनं भेददर्शिनो ॥४७८॥+३
पुनर्मते भिन्नावेव शब्दौ तंत्रेणोपात्ताविति दर्शयितुमाह॥ ॥ अर्थसंभिन्नयोर्वा स्यात्स प्रयोगस्तत्र लक्षणः। उपायस्तत्र संसर्गः प्रतिपत्तुर्भिद्यते।तंत्रे
वंतंत्रेण द्वयोर्थयोरस्मिन्प्रयोगे प्रतिपत्त्रनुसारेणोभयात्मासौ संसर्गो वाक्याभिधेयलक्षणो भिद्यते। यथा अणुदित्सवर्णस्य चाप्रत्ययः इत्यत्र सवर्णस्य का संज्ञा स्यादित्येकेन पृष्टे तदप स्या ५
रेण प्राणिकोयं स्यात्सादेश्याभावलक्षणः संबंधः स किंसंज्ञ इति लाघवादाचार्यस्तंत्र न्यायसमाश्रयणात्संप्रसारणमित्येकेनैव शब्देनोत्तरमाह॥ तत्रैके नप्र [redacted]
ती स्य प४ [redacted] पृष्टे किं जातियो धावतीत्यपरेण किंवर्णो धावतीत्यनयोर्लाघवादस्ति चक्रि श्वेतो धावतीति। तत्रासौ वाक्यार्थः प्रतिपत्तुर्भिद्यते। येन पृष्टं किं जातीयस्तस्य श्वा इतो धा
वतीत्येवं रूपतयावतिष्ठते। येन च किंवर्ण इत्युक्तं तस्य श्वेतगुणयुक्तो धावतीत्यर्थरूपोसौ जायत इति तंत्रनिबंधनाद्द्विधा वार्थव्यक्तिरुपजायत इति एवमन्यत्र व्याख्येयं। एत ॥४७९॥+३
देव व्याख्यातुमाह॥ ॥ भेदेनावगतौ पूर्वं शब्दौ तुल्यश्रुती पुनः। तंत्रेण प्रतिपत्तारः प्रयोक्ता प्रतिपादिताः॥ पूर्वं प्रयोगशब्दो भेदेन रूपवैलक्षण्येनाधिगतौ श्वा इतः श्वेत इति
तावेव तुल्यश्रुती भिन्नावेव तंत्रेण प्रतिपत्तारः अस्मात्तंत्रन्यायसमाश्रयणेनात्र प्रयोक्ता प्रतिपादिताः प्रतिबोधिताः॥ इदानीमत्र वक्तुरेकस्यैव शब्दद्वयप्रतिपादने विवक्षोपजा

८८ 88 शते तस्यां सत्यामपरेणनुनिष्पद्यत इति शब्दभेदमतेन प्रकारान्तरेण तन्त्रमुपपादयितुमाह॥ ॥एकस्यापि विवक्षायामनुनिष्पद्यते परः। व्यक्तिछाविरहादपि साधारणत्वादपर
स्यानिष्पत्तिस्ततोर्थद्वयप्रतिपत्तिः॥१०॥ अभेदवादिनामपि मते तन्त्रस्य प्रकारान्तरमाह॥ ॥विनाभिसंधिना शब्दः शक्तिरूपः प्रकाशते॥ ४८ प्रयोक्तुरभिसंधानमन्तरेण तत्रासौ
शब्दः साधारणत्वाच्छक्तिद्वयसंयुक्तः प्रकाशते। एतदुक्तं भवति। शुक्लज्ञातोऽयमसायनशक्तिः प्राप्तिविशेषप्रत्यायनशक्तिर्वा भवेत शब्दस्य त्वौदीरितः। सततैकमर्थं प्रत्याय
यंस्तन्त्रेण सामर्थ्यादर्थान्तरप्रकाशनं करोत्येव। अपचानुल्पकल्पना पाशक्तिद्वययोगाद्युगपदेव अ र्थद्वयप्रकाशनं करोतीति शक्तितन्त्रतामाख्यापयितुमाह॥ ॥अ
नेकशक्तिरेकस्य युगपच्छ्रूयते क्वचित्। अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते॥ ४८२ एकस्य शब्दस्य कश्चिच्छक्तिगोधावनासादो विषये युगपदेवार्थद्वयप्रत्यायनसमर्थश
क्तिद्वयमाश्रीयते। यथा कश्चिदवसरे दाहप्रकाशाभ्यां युक्तो ऽग्निरेकत्रापि प्रकाशे दाहे वा नियुज्यते। उपयोगवशाद्धर्मद्वयायाम्युपादीयत इत्यर्थः। तथैवानेकशक्तियो
गाद्युगपदर्थद्वयप्रकाशनाय शब्दः समाश्रीयत इति॥ इदानीं शास्त्रविषयमप्येतदुपदर्शयितुमाह॥ ॥आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते। लिंगाद्यानंतर्य
म्भाद्विभागे नावतिष्ठते॥ ४८३ इग्यणः संप्रसारणमित्येतस्मिन्वाक्ये सकृदपि श्रुते। कीदृशे शब्दभेदवादिनां मते आवृत्तिभिन्नार्थे। एकत्ववादिनां मते शक्तिभ्यां भिन्ना
र्थे तत्र हि शक्तिभेदादर्थभेदः अनन्तरं तच्छक्यं प्रतिपत्तिः शब्दभेदमते लिंगानन्तर्यज्ञापकाद्विभागे नावतिष्ठते वर्णवाक्यार्थे प्रत्यायकतया वतिष्ठत इत्यर्थः। यस्मात्संप्र हेरंब०
सारणस्येति भक्तविभक्तिनिर्देशं पश्यन्ति ततो ऽवस्थितिवर्णः संज्ञीति वसोः संप्रसारणमित्यादौ भावविभक्तिनिर्देशाद्वाक्यार्थस्यापि संज्ञित्वमवस्थितीत्यावृत्तिमेवाश

वभेदवायनुमिनोति। अभेदवादी तु शक्तिभेदं तत्र धर्मोक्तिं तंत्रलक्षणादनुमिनोतीत्यत्र संप्रसारणशब्दः शक्तिद्वयवशाद्युगपद्वर्णवाक्यलक्षणस्यार्थद्वयस्यापि
प्रतिपादनं करोत्येवं ४८३ एतदेव व्यक्तं प्रदर्शयितुमाह॥ ॥संप्रसारणसंज्ञायां लिंगाभ्यां वर्णवाक्ययोः। प्रविभागस्तत्र सूत्र एकस्मिन्नेव कल्पते ४८४॥ लिंगाभ्यामुपदर्शिताभ्यां
भाविभक्तविभक्तिनिर्देशलक्षणाभ्यां। तत्र एकस्मिन्नेव सूत्रे वर्णवाक्यार्थयोः संज्ञिनोः प्रयोगो लभ्यत इति। उक्तं च विभक्तिविशेषनिर्देशस्य ज्ञापकं उभयसंज्ञात्वस्येति। ते
त्रं चेदमेकशेषसमानफलं भाष्ये प्रदेशे प्रपन्नस्तमिति ४८४। भाष्यकाराभ्युपगमेनार्थतंत्रसिद्धिमुपपादयितुमाह॥ ॥तथा द्विर्वचनेऽचीति तंत्रोपायादिलक्षणः। एकशेषेण
निर्देशो भाष्य एवोपवर्णितः ४८५। इहापि द्विर्वचनेऽचीत्यत्र द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचन एव कर्तव्ये स्थानिवदिति सूत्रार्थो व्याख्यायते। तत्रोक्तं तस्य न द्वितीयं द्विर्वे
चनग्रहणं कर्तव्यं। न कर्तव्यमपि स्यात्। एकशेषनिर्देशाद्वा सिद्धमिति। यद्येकशेषस्तदा द्विर्वचनं प्राप्नोतीत्यत एकशेषसमानफलसाधारणलक्षणं तंत्रमेवात्रैकशे
षशब्देनोक्तं। तेन तंत्रोपायाद्वैतोलक्षण एवैकशेषनिर्देशः प्रदर्शितः। तस्मादेकशेषमंतरेणापि तंत्रस्याश्रयणाद्द्विर्वचनेऽचीत्यत्रार्थसंगतेरेकशेषसमानफलं
शास्त्रप्रवृत्युपाय[illegible]भूतं तंत्रमभ्युपगतं भाष्य इति सिद्धं ४८५। अथ महाभाष्यस्यावतारान्वाख्यानपूर्वकं टीकाकारो महत्तामुपवर्णयन्स्वरचितस्य ग्रंथस्य गुरुपूर्वक्र
ममभिधातुमाह॥ ॥प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान्। संप्राप्य वैयाकरणान्संग्रहेऽस्तमुपागते ४८६। इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं ग्रंथ
लक्षपरिमाणं संग्रहाभिधानं निबंधनमासीत्। तच्च कालवशात्सुकुमारबुद्धीन्वैयाकरणानप्राप्यास्तमुपागतं। तस्मात्क्लेशभीरुत्वात्संक्षेपरुचयः प्रयोजनाः। अतएवा

३३

८८ 89 सोपि विद्यासु परिग्रहः स्वीकारो येषां तेन तथा तत्र तैः संग्रहाध्ययनमुपेक्षिते सत्सु सत्स्वयातः संग्रहः ॥४९६॥ साधुत्वज्ञानोपयिकतया धर्मसाधनत्वेनोपजातोपयोगाय व्याकर
णस्मृतेरविच्छेदाय कृपाप्रयुक्तेनाथ भगवता पतंजलिना वार्त्तिकव्याख्यानपुरःसरं महाभाष्यनिबंधनमुपरचितमित्यभिधातुमाह ॥ ॥कृतेथ पतंजलिना गु
रुणा तीर्थदर्शिना । सर्वेषां न्यायबीजानां महाभाष्ये निबंधने ॥४८७॥ गुरुणेति भाष्यकर्तुः पूजापदं ॥ तीर्थान्यागमविशेषाः तान्युपनिविज्ञानातीति तीर्थदर्शी । अने
न गुरुत्वनिबंधनः प्रभावातिशयो भगवतउक्तः । तच्च भाष्यं न केवलं व्याकरणस्य निबंधनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव
महच्छब्देन विशेष्यं महाभाष्यमित्युच्यते लोके ॥४८८॥ अयमहत्त्वमेव विशेषणद्वारेणास्योपपादयितुमाह ॥ अलब्धगाधे गांभीर्यादुत्तानइव सौष्ठवात् ॥४९०॥ गाधो निष्ठाप
रिच्छेदइयत्तेति यावत् अलब्धो गाधो यस्य । कस्मादित्याह गांभीर्यादिति । गांभीर्यं गहनतामर्मप्रकाकुल्येन दुरवगाहत्वं । अतिगंभीरं हि भाष्यमुपरचितं भगवता पतं
जलिनेति । न तस्याभिधेयं व्यक्तं तु केनचित्कुतइति । किमेवमेकांतेन गहनमिदं भाष्यं नेत्याह । उत्तानइवेत्यादि उत्तानं स्पष्टं सौष्ठवं परिपाटी । प्रस्तारेण तु ष्ठं परिपाटि
लक्षणादत्र सौष्ठवादुत्तानेस्य रूपायं । एतएव प्रतिभाति । अतो नेदमसेव्यं । सज्जनमानसमिव निसर्गसुकुमारमतिगंभीरं चैतदतएव महाभाष्यमुच्यत इत्यर्थः । ए
तेन संग्रहानुसारेण भगवता पतञ्जलिना संग्रहसंक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमित्युक्तं वेदितव्यं ॥४९१॥ तदेवं ब्रह्मकांडे कायवाग्बुद्धिविषया ये मलास्तेषां दि श्लो
केन भाष्यकारप्रशंसोक्ता इह चैवं भाष्यप्रशंसेति शास्त्रकर्तृश्च टीका कृता महत्त्वोपवर्णिता । अत एव दमहाभाष्यमकृतबुद्धयो नैव बोद्धुमलमित्याह ॥ ॥तस्मिन्नकृ राम०

शास्त्रस्य

तेबुद्धीनां नैवावास्थितनिश्चयः[४८५]। कृतानुसंख्याप्रकर्षे प्राप्तामहतांबुद्धिर्येषां ते तथा तद्रूपवैकल्येनाकृतबुद्धयः स्वल्पप्रज्ञा उच्यन्ते। तेषां निश्चयो निर्णयः पर्यन्तो बोधो नैवात्रावा
स्थितः नप्रतिष्ठामलभत। न तेनास्मद्गुरोस्तत्रभवतो वसुरातादन्यः कश्चिदिमं भाष्यार्णवमवगाहितुमलमित्युक्तं भवति[४८६]। तथा च संग्रहप्रतिपक्षभूतैराचार्यैस्तर्कैर्विद्यामात्र
वेदिभिर्बुद्धापाटवादिदमाप्लावितमाभासीकृतमित्याह॥ ॥बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः। आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके[४८७]। शुष्कतर्कैः केवलएवानपशा
स्त्रपरिमलरहितो भराप नेता तमेवानुसरन्ति प्रमेयनिर्णयाय ये ते तदनुसारिणः। महाभाष्यं हि बहुविधविद्यावादरत्नहरणमार्षं यत्र व्यवस्थितं ततं आन्वीक्षिकीमात्रकुशलः कथं तन्नि
श्चिनुयादिति तर्कमात्रानुसारिभिस्तैस्तद्विप्लापितं। तर्कश्च पुरुषाणां स्वबुद्धिमात्रनिर्मितविग्रहो व्यवस्थित एव। यदुक्तं। यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः। अभियु
द्वा ६ क्ततरैरन्यैरन्यथैवोपपाद्यत इति[४८८]। इत्थं च परस्परं देमत्यादागमसंख्यागाचयपावस्थितो व्याकरणागमः। पतञ्जलिशिष्येभ्यः कालपरिवासाद्भ्रष्टः सन् ग्रन्थमात्रे पाठमात्र एव व्य
स्थितो दाक्षिणात्येष्वित्याह॥ यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः। काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः[४८९]। तदेवमुत्पन्नकलः संज्ञानो व्याकरणागमः[४९०]। अथ प्रका
लान्तरेण चन्द्राचार्यादिभिरागमं लब्ध्वा ते न चोपायम्भ्रतेन सकलानि भाष्यावस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि स्फीततां नीत इत्यभिधातुमाह॥
॥ ॥पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः। स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः[४९१]। पर्वतात्त्रिकूटैकदेशाव तीर्णितिलिंगैकदेशादिति। तत्र ह्युपलततलेराघवणे रचि वि २
तोमलभत व्याकरणागमल्लिहति केनचिच्च ब्रह्मरक्षसानीय चन्द्राचार्यवसुरातगुरुप्रभृतीनां दत्त इति तेरवलु यथावद्व्याकरणस्य स्वरूपं तत उपलभ्य सततं च शिष्याणां

९० 90 व्याख्यायबहुत्राखिलेनीतो विस्तरं प्रापितइत्यनुश्रूयते ४८१ अथ कदाचिद्योगेनो विचार्यतन्त्र भगवता वसुरातगुरुणा ममायमागमः संज्ञाय वात्सल्यात्प्रणीत इति स्वरचितस्या
स्य ग्रंथस्य गुरुपूर्वक्रममभिधातुमाह॥ ॥न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनं प्रणीतो गुरुणास्माकमयमागमसंग्रहः ४८२ न्यायस्य प्रतिष्ठा प्रस्थानं तस्य मार्गा न्या
यप्रस्थानमार्गाः न्यायप्रतिष्ठितैर्बहुभिर्मीमांसैः शितिशावत। न्यायप्रस्थानमार्गांस्तान् स्वं च दर्शनं व्याकरणसिद्धान्तलक्षणमभ्यस्याप्रणीतः। अनेन गुरुणा संज्ञायन त
थाममाय [redacted] मागमसंग्रहः प्रणीतः येन संदेहो भवेदपि तु सावधानेनेत्युक्तं भवति। अस्माकमिति बहुवचनादन्येषामपि सहाध्यायिनां ग्रहणम्। अथ वामयानुतद
नुच्छेदायास्य मुपनिबंधः कृतइत्यात्मानो बहुमानः प्रकटितः ४८२ नन्वेतावानेव किमयं काण्डद्वयप्रो [redacted] क्तो व्याकरणागमइत्याशंक्याह॥ ॥वर्त्मनामत्र केषांचिद्वस्तुमा
त्रमुदाहृतं। काण्डे तृतीये न्यक्षेण भविष्यति विचारणा। ४८३ अत्रास्मिन्वाक्यकाण्डे काण्डद्वये वा केषांचिद्वर्त्मनां पदवर्त्मनो वस्तुमात्रं बीजमात्रं प्रदर्शितमिवं शिष्टं तु तृतीये ऽस्म
परसिद्धान्त ४ यथं स्यपदकाण्डे काण्डद्वयनिष्पन्दभूते न्यक्षेणादरविशेषेण स्वसिद्धान्तवर्त्मनां विचारणा युक्तायुक्तविचारपूर्वकनिर्णीतिर्भविष्यति ततो नायमेतावान् व्याकरणा
गमसंग्रह इति ४८३ ननु तत्र न्यायप्रस्थानमार्गाभ्यासेन किं कृतं स्वदर्शनमेव निश्रुतं किं न विचार्यत इत्याह॥ ॥प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः। कियद्वा शक्य
स्व२ मुन्नेतुं स्वतर्कमनुधावता॥ ४८४ नानाविधैरागमदर्शनैरागमसिद्धान्तैः खलु प्रज्ञा विवेकं लभते वैशारद्यमाप्नोति। तत्र स्वनिःसंदिग्धं स्वसिद्धान्तमेव सपरिकर्तुं भिन्ना
गमदर्शनैः क्रियते। अन्यथा ऽऽहत्य परकीयागमस्वरूपेण प्रतिपत्त्यात्मो प्रेक्षामेव नेतुं तेषु चावस्थानेष्वनुसरता किं स्वच्छकाम उन्नेतुं [redacted] हे खं०

प्रतिविधातुं ४९४ कदाचित्परमर्षयोपि गतधर्मोसन्नता मप्प्नोय्य यावत्सदार्थान्यपश्यतः सिद्धांतमप्रमितिनिघ्नो भवते ये त्वाक्षेपकाः प्रायः कल्पिकाव्याम लिनचित्तवृत्तयः शा
स्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निश्चिन्वंति तेषां नान्वागमोपसेवयैवानुप्रसीदति भगवती प्रतिभेति युक्तं ४९४ एतदेव निरूपयितुमाह ॥ ॥तत्तदुत्प्रेक्षमाणानां
पुराणैरागमैर्विना। अनुपासितवृद्धानां विद्या नातिप्रसीदति। प्रतिष्ठामुपगतैः पूर्वैरागमैर्बहुविधैर्विनास्वयमेव तत्तद्विस्य यथायथमेवोत्प्रेक्षमाणानां विकल्पयतां
प्रतिपत्तॄणां शास्त्रोपन्नमेधाविरहिणां पंडितंमन्यानामभिमानाग्रहाघ्रातानां तेषां भगवती विद्या विशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदतीत्यसमर्थे। किं तर्हि वृद्धो
पसेवाशालिनः मागमजुषां विगलिताभिमानानामेवैषा भगवती प्रज्ञा प्रसादमुपयातीति सिद्धं ४९५ तदयमत्रसंक्षेपसमुच्चयः। वाक्यानामष्टधे वादो विभागः परिकी
र्तितः। शास्त्रीयमेभ्यां समकर्षः कीर्तने वाक्यप्रोक्तः बलाबलविचारोपि शास्त्रीयोव्याप्तिनिर्णयात् ततस्यात्र समासेन वाक्यलक्षणनिर्णयः। संदेहश्च आगमेनापि
वाक्यभेदस्य दर्शितः स्फोट एव तु सिद्धान्ते वाक्यं वाक्यं प्रसाधितं पदवादस्त्वनुमतो नेति आकरणे स्थितः तोन्विताभिधानस्याभिहितान्वयकस्य च रक्षा आगमार्थआगमा
दूषणं जातकीर्तनं। प्रसंगेनापरेप्यत्र वाक्यार्थाः षट् प्रदर्शिताः। अखंडवाक्यपक्षे च चोद्यपंचककीर्तने। उपपत्तिः प्रातिभिपे वाली खोति प्रथमं पश्यादिकादिप्रसंगे
हेतोनोपपद्यत इत्स पिष्टमिति वाक्यविरोधितुष्कजिरेवबलीयसी॥ प्रतिष्ठितस्य न्यायस्याप्येवं प्रागः प्रसज्जते। अवांतराणां वाक्यानामुपपत्तिर्विरुध्यते। प्रासंगिकादिषु
तथालक्षणेष्वप्यसंभवः प्राप्तो लेवमसंबद्धेस्मिन्वाक्ये दोषा उदाहृताः। अपोद्धारं समाप्तिसरो... स्वेते निराकृताः। संहितायां विभागे पापदस्पोर्विलयं गतौ तु पा
न

ना

९२ दाशावधिकं तु तयोरर्थः प्रकल्पितां । इति दूषणमत्राधासदेवाकोचवाकावितं ॥११॥ तत्र न्यायव्रशादत्र स्वपक्षेदोषसंहतिः । वाक्यार्थस्यात्र भेदोपि विकल्प्य परिकल्पितः ॥१२॥
प्रतिभेदं च सिद्धांते शक्यार्थ उपपादितः । प्रविभागाश्रयादत्र पदार्थस्यापि संभवः ॥१३॥ स च द्वादशधा भिन्न इत्यपत्रोपपादितं । प्रतिभालक्षणं सम्यग्विधानुसंहितं
कृतं ॥१४॥ पदभागार्थभागाश्च वित्तस्य प्रतिपादिताः । अन्वयव्यतिरेकाभ्यां विविक्तोपपादितौ ॥१५॥ सनिमित्ता च सा व्यंजनी ख्यातसमाश्रयाद् उपसर्गनिपाता श्च कर्म
प्रवचनीयकाः ॥१६॥ पदभेदाः प्रसंगेन लक्षणेनोपलक्षिताः ॥१७॥ सार्थकानर्थकत्वाभ्यां विचारेवर्णेनिष्ठिते ॥१८॥ कृतेथाखंडपक्षेत्र प्रतिष्ठामुपनायिनः पदवादे च दोषाणां चतुर्णां
परिकीर्त्तनं ॥१९॥ समासेषु विरुद्धार्थप्राप्तिरादावुदाहृता ॥ अध्यादीनां तथा वाक्ये साधनुसाभिधायिता ॥२०॥ अर्थासंगतिरप्यत्र बहुव्रीहे रुदा [redacted] हृता । प्रत्तु
संख्यादिषु तथा नास्त्यर्थो वर्णेषु विपि ॥२१॥ इति वीप्सा च तु ख्येण पदवादः पराहतः । स्यापि ते खंडपक्षे पि चोद्यसप्तकमाहितं ॥२२॥ द्वंद्वे समासे नैवस्याद् द्व्यर्थस्याभिधायिका ।
विभक्तिरिति दोषोत्र प्रथमं परिकीर्त्तितं ॥२३॥ वाक्यार्थसमाप्तिस्तत्र सेकं नोपपद्यते । परामर्शश्च नैवस्यात्सर्वनाम भिरेव च ॥२४॥ अनुष्ठानक्रमेणाथवा वाक्यार्थस्य
न ज्ञातुचित । स्यात् क्रमेणानुष्ठानं शक्या तेन कथं च न ॥२५॥ एकदेशस्य करणे समासेष्वर्थवर्णनात् पृथक्त्वं पृथक्कृदातस्या सा च शास्त्रे प्रकीर्त्तिता ॥२६॥ न समासे पद
र्थेस्य विकल्पे बहुभिः पुनः । प्राधान्यं परिकल्प्यापि भाव्यपक्षाः परिष्ठिताः ॥२७॥ प्रद्युत्खंडमिदं वाक्यं नैषामाकल्पनाकृचित । दोषावेतावपि शब्दशक्तिप्रामात्रमेव चा ॥२८॥
शास्त्रप्रवृत्ताविति च निराकरणमेतयोः । तेन श्चाखंडपक्षस्य सबाधउपरर्शितः ॥३०॥ जहत्स्वार्थविकल्पेन बहुव्रीह्यादिगामिना । प्रस्तुतप्रस्तुदोष श्चपदवादेष हेरंव०
समुदायेऽर्थकारिता । अभिमन्यन्त इत्येतदखंडेनोपपद्यते ॥३१॥ एतानि पंचचोद्यान्यपोद्धारस्य समाश्रयात् । समर्थितानि वैसम्यगखंडं
वाक्यमिच्छता ॥३२॥ अथाखंडयदावाक्यं ३०

पदाश्रयः ॥३७॥ उपात्तत्यागसंज्ञापत्ते सर्वत्रैतिच दूषणम् ॥ सह प्रागुक्तदोषैश्चापेक्षकाद ४

कीर्तितः ॥[३२] प्रकृत्सर्थः प्रत्ययार्थ इति भिन्नोपरस्परं ॥ यावत् स्थितौ तयोरेकापायेनावगतिः कथं ॥[३२] इहाऽहन्नत्ती निच साहृद्वासाद्यास्त्वेव कथम् ॥ पदार्थप्रतिदोषौ ग्र
पद्वादे समुद्धृतः ॥[३३] प्रत्ययद्रूपणम्येर्थे एकस्मादेव तन्मतेः ॥ अन्नीस्यादेककथं च स्यात्तत्स्युतापद्पद्धतेः ॥[३४] स सर्वेयपदानां स्यात्प्रकृतिप्रत्ययार्थयोः ॥ कथं लक्षणया शा
स्त्रेषु सांकर्येण व्यवस्थितिः ॥[३५] पदार्थसमन्वये वादौ प्रतिपद्यान्यथा पुनः ॥ वाक्यार्थे प्रति[redacted]पत्ति श्च दृष्टा नैतत्समं ततः ॥[३६] ससम्भे तेष यपदेष्विति वा क्वचिदोजगुः" नञ्
र्थानुपपत्ते श्च नास्तिवादः ॥ समीरिता ॥[३७] परवादैर्त्त्रदोषास्तु एव कपक्ष हतं पुनः ॥ न्यायभागार्थभागाभ्यां विस्तरेण विचक्षणे ॥[३८] निराकृतमतो युक्तो वाक्यवाद
परिग्रहः ॥ दोषः संक्षिप्य तिक्तान्तः सत्रकाराभिसंमतः ॥[४०] अपोद्धाराश्रयात् स्त्रगोणमुख्यविचारणा ॥ ततः कृतासु निपुणं टीकाकारेण सादरं ॥[४१] स सामस्य विभागो
पि ज्ञानानामुपपादितः ॥ मुख्यान्तरीयकयोरर्थयोरनिवर्तनं ॥[४२] ततस्तथे चतुष्कस्य चिंतनं विहितं क्रमात् ॥ शब्दार्थनिर्णयोपायाः सादरं परिकीर्तिताः ॥[४३] तासर्थे
परिपाद्याश्च आर्थना स्यपमपीति चावाक्यनिष्ठसमासेन विचारितमतः एप कृ ॥[४४] उत्सर्गस्यापवादस्य विवेकः परिकीर्तितः ॥ संज्ञाशब्देषु पक्षतो निर्णयः परिवर्त्सरा
न[४५] प्रत्येकं समुदाये च समाप्त्या वाक्यनिश्चितिः ॥ न्यायः संचिंतितश्चात्र लक्षितो व्यभिधीयते ॥[४६] अथ पूर्वोक्त संक्षेपद्वारेणाप्युपपादितः ॥ वाक्यवाक्यार्थ
निष्ठश्च पदनिष्ठश्च निर्णयः ॥[४७] वाक्यैकवाक्यतायाश्च विचारोपि [redacted] निरूपितः ॥ साकांक्षत्वं निराकांक्षावाक्यानां परिकीर्तिता ॥[४८] शब्दाचिंता
समासे प्युद्दुस्त निरूपिता ॥ अथान्तंतन्त्र्यापस सिद्धिर्भाष्यानुगामता ॥[४९] अवतारेपि भाष्यस्य संशयहेतुसमुपागते ॥ निबंधहेतौ शास्त्रस्य टीकाकारेण की

न्यस्मा

का

९२ त्रितः ॥[५०] संग्रहार्थाद्यनुगुणत्वं चोपपादितं ॥ विज्ञातव्यमथैतस्य संग्रहप्रतिपक्षतः ॥[५१] कृतमाचार्यदेवज्ञैरावेज्ञाविवक्षीस्ततः ॥ अत्रस्यास्मन्नापसारस्यैवैर्प्रकरणगा
मिनः ॥[५२] मलभूतमवा[illegible]प्याय पर्वतादागमं स्वयं ॥ आचार्यवसुरातेन न्यायमार्गान्विचिंत्य चो[५३] प्रणीतो विधिवच्चायं मम व्याकरणागमः ॥ मयापि गुरुनिर्दिष्टाद्य
ख्यान्यायाया ऽविलुप्तयैः[५४] काण्डत्रयक्रमेणायं निबंधः परिकीर्त्तितः ॥ ग्रंथकारेण ग्रंथेस्मिन्नस्मिन्नुपागमः स्फुटं ॥[५५] इत्येवं वाक्यकांडस्य प्रमेयविषमविष
यास्फुटं संगतिः कीर्त्तिता लघ्वी समासेन निराकुला ॥[५६] विद्वज्जनानां यः खलु सर्वत्र गीयते जगति ॥ ततउपस्थविरचिता राजानकम्स्रव मेना मात्रौवै[५७]शग्वंक
त्रिव्यक्तुबैत वाक्यकांडं समासतः ॥ पुण्यराजेन तस्योक्ता संगतिः कारिकाश्रिता ॥[५८] गुरवे भर्तृहरये शब्दब्रह्मविदे नमः ॥ सर्वसिद्धांतसंदोहसारामृतम श्रुतीका ५
यायचा ॥ ५९ ॥ इति श्रीपुण्यराजकृतावाक्यपदीयद्वितीयकाण्डटीका समाप्ता ॥ ॥ शुभमस्तु सताम् ॥ ॥ श्रीरामायनमः शिवहर ॥ ...॥ ७५ ॥

व्याकरण
वाक्यपदीटीका
२२००



हेरंब